A DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS

IN THE

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS.

BY

M. RANGACHARYA, M.A., RAO BAHADUR,
PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE;
CURATOR, GOVERNMENT ORIENTAL MSS. LIBRARY; AND
REGISTRAR OF BOOKS, MADRAS.

Prepared under the orders of the Government of Madras.

VOL. XII.—RELIGION—*continued.*

MADRAS:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.

[PRICE, 1 rupee 12 annas.] 1912. [2 shillings 9 pence.]

A DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS

IN THE

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS.

BY

M. RANGACHARYA, M.A., RAO BAHADUR,

PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE;
CURATOR, GOVERNMENT ORIENTAL MSS. LIBRARY; AND
REGISTRAR OF BOOKS, MADRAS.

Prepared under the orders of the Government of Madras.

VOL. XII.—RELIGION—*continued.*

MADRAS:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.

1912.

CONTENTS.

CLASS VIII.

RELIGION—(*continued*).

3. ŚĀKTA.

3. ŚĀKTA—(*continued*).

3. ŚĀKTA—(*continued*).

4. MISCELLANEOUS.

4. MISCELLANEOUS—(*continued*).

5. MANTRAS.

5. MANTRAS—(*continued*).

5. MANTRAS—(*continued*).

5. MANTRAS—(*continued*).

5. MANTRAS—(*continued*).

5. MANTRAS—(*continued*).

A DESCRIPTIVE CATALOGUE OF THE SANSKRIT MANUSCRIPTS.

VOLUME XII.

CLASS VIII.—RELIGION—(*continued*).

---

3. ŚĀKTA.

No. **5559.** अष्टादशपीठाः.

AṢṬĀDAŚAPĪṬHĀḤ.

Substance, palm-leaf. Size, 16¼ × 1⅛ inches. Page, 1. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 16*b*. The other works herein are Bhuvanēśvarīstōtra 1*a*, Vīrāghōramahōgrasālvaśarabhastōtra 2*a*, Rājarājēśvaryaṣṭaka 5*a*, Mahiṣāsuramardanīstōtra 7*a*, Ambāṣṭaka 10*b*, Tripurasundaryaṣṭaka 11*a*, Tripurasundaryaṣṭaka (Telugu Language) 12*a*, Bhramarāmbikāṣṭaka (Two copies) 13*a*, Annapūrṇāṣṭaka 14*a*, Pañcāśadvarṇamālikā 15*a*, Bhuvanēśvarīstōtra 17*a*, Rājarājēśvaryaṣṭaka 20*a*, Navaratnamālikāstōtra 21*a*, Tryakṣarastōtra 22*a*, Śāradāmbāṣṭaka 23*a*, Raktacāmuṇḍīstōtra (Telugu Language) 24*a*, Śivagadya (Telugu Language) 25*a*, Aṣṭādaśapīṭhamaṅgala (Telugu Language) 26*a*, Dēvīcūrṇikā 27*a*, Hanūmaddaṇḍaka (Telugu Language) 32*a*, Pañcākṣarāṣṭōttaraśatastōtra 34*a*, Sadāśivaliṅgastōtra 38*a*.

Complete.

The eighteen different names by which the goddess Śakti is worshipped in various holy places are given herein, and the mere utterance of her holy names is said to absolve the worshipper from all sin.

Beginning:

लङ्कायां शाङ्करी देवी कामाक्षी काञ्चिकापुरे ।
प्रद्युम्ने(म्ना) सिंहळद्वीपे चामुण्डा क्रौञ्चपीठके ॥

अलम्पूज्ये गळा देवी श्रीशैले भ्रमराम्बिका ।
कोल्लापुरे महालक्ष्मी गाहुराये कवीरका (?) ॥

End:

वाराणस्यां विशालाक्षी काश्मीरे ति(तु)सरस्वती ।
अष्टादशसु पीठेषु योगिनां देव निर्मिता(:) ॥

तासां स्मरणमात्रेण ज्वरदारिद्र्यनाशनम् ।
कोटिजन्मकृतं पापमपमृत्युर्विमुच्यते ॥

No. 5560. आत्मपूजा.

ĀTMAPŪJĀ.

Substance, paper. Size, 9¼ × 6 inches. Pages, 19. Lines, 16 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 65*a*. The other works herein are Ṣaḍāmnāya 1*a*, Pañcamīstavarāja 17*b*, Kauladarśa 26*a*, Yōginīhṛdaya 33*b*, Sūtrōktapaddhati 75*a*.

Complete.

On the worship of one's self as identified with Śiva and Śakti.

Beginning:

आत्मपूजाविधिरुच्यते—

ततः स्वपुरतस्त्रिकोणमण्टपे साधारं पात्रं संस्थाप्य स्वदेहं चन्दनादिरक्तोपचारैरलङ्कृत्यात्मानमभीष्टदेवतारूपं ध्यायन् गुरुगणपतिपरदेवताः प्रणम्य मूलादिब्रह्मरन्ध्रान्तं बिसतन्तुतनीयसीं सूर्यकोटिप्रतीकाशां सम्यक् कुण्डलिनीं स्मरेत् ।

End:

चक्रेशं ललितामेव बिन्दौ सञ्चिन्त्य पूजयेत् ।
सम्पूज्य सुन्दरीं सर्वयोनिमुद्रां प्रदर्शयेत् ॥

ऐं योनिमुद्रायै नमः—इति मुद्रां प्रदर्शयेत् । एषा परापररहस्ययोगिनीसर्वानन्दमयबैन्दवचक्रे [नचका] शान्तरसात्मिकां ध्यायेत् । सजल.

Colophon:

नवमावरणम् ॥

No. **5561.** आनन्दकल्पवल्ली.

ĀNANDAKALPAVALLĪ.

Substance, paper. Size, $11\frac{1}{8} \times 8\frac{1}{4}$ inches. Pages, 260. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Jñānārṇava 138*a*.

On the worship of the goddess Śakti: by Ānandanātha.

Contains the following Parispandas:—

१. श्रीनाथपूजनम्.
२. आह्निकविधिः.

३. सौरपूजाविधानम्.

४. पीठपूजाविधानम्.

५. अर्घ्यसाधनम्.

६. न्यासविधानम्.

७. देहपूजाक्रमः.

८. पूर्वपरापूजनम्.

९. अपरापूजनम्.

१०. षडन्वयशाम्भववीरशिवपूजनम्.

११. परापूजनम्.

१२. मेधादीक्षाहोमविधानम्.

Beginning:

सौवर्णाद्रितटस्थलीपरिणमद्दन्ताग्रविस्फूर्जित-
स्वर्णाक्षुण्णविकीर्णरेणुपटलीनीरन्ध्रसिन्दूरिता ।
गण्डोड्डीनमधुव्रतोरुविरुतस्फारीभवद्भ्राम्भिता
हैरम्बी तनुरस्तु नश्शुभकरी शुण्डालदण्डो(न्तो)द्धुरा ॥

* * * *

यावदेवंविधं ज्ञानं गुरुणा नोपदिश्यते ।
न दीयते मया देवि कल्पकोटिशतैरपि ॥

एवं ध्यात्वा तत्त्वषोडशोपचारान् कुर्यात् । यथा—अं पृथिव्यप्तेजोवाय्वाकाशगन्धरसरूपस्पर्शशब्दोपस्थपायुपादपाणिवाग्घ्राणजिह्वाचक्षुस्त्वक्छ्रोत्रमानसात्मिकायै आसनं नमः.

End:

कृपाणधारागमना(त्)व्याघ्रकर्णावलम्बनात् ।
भुजङ्गधारणान्नूनमशक्यं कुलवर्तनम् ॥
अनाघ्रेयमनालोक्यमस्पृश्यं चाप्यपेयकम् ।
इति मत्वा महायोगी मोदते शिववच्चिरम् ॥

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमदवधूतमहेश्वरतेजानन्दनाथविरचितायामानन्दकल्पलतिकायां प्रायश्चित्तमोक्षदीपसमयाष्टककुलार्णवसारं नाम त्रयोदशपरिस्पन्दः ॥

No. 5562. आनन्दतन्त्रम्.
ĀNANDATANTRAM.

Substance, paper. Size, 12½ × 8 inches. Pages, 183. Lines, 20 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Paṭalas 1 to 20.

Begins on fol. 1*a*. The other works herein are Garbhakulārṇava 92*b* and 100*b*, Garbhakaulāgama 96*b*.

Complete.

Forms part of Bhagamālinīsaṁhitā in Nityāṣōḍaśikārṇava, a standard work on Sāktēya religion.

Beginning:

आनन्दकन्दभूताय जगदानन्दहेतवे ।
नमस्सततभोगाय महालिङ्गाय शम्भवे ॥
मेरुपृष्ठे सुखासीनं मृगाङ्ककृतशेखरम् ।
कामेश्वरं महादेवं श्रीदेवी परिपृच्छति ॥

श्रीदेव्युवाच—

देवदेव महादेव जगदानन्ददायक ।
करुणामृतवाराशे निष्कलङ्क निरञ्जन ॥

अस्वतन्त्रजगच्चक्रसतताधारमूर्तये ।
स्वतन्त्राय नमस्तुभ्यं यत्किञ्चित्पृच्छ(च्छ्य)ते मया ॥
मय्यनुग्रहबुद्धिश्चेत्कथयस्व मम प्रभो ।
त्वमेव संशयच्छेत्ता सर्वशास्त्रेषु कीर्तितः ॥

* * * *

Colophon:

इति द्वात्रिंशत्कोटिविस्तीर्णे नित्याषोडशिकार्णवे तन्त्रे भगमालिनी-संहितायां शतसाहस्रयामानन्दतन्त्रे प्रथमः पटलः ॥

* * * *

चमत्करोति यज्वासौ निजकं कर्मसाधनम् ।
लिङ्गमूलस्थितं देवमानन्दोदयलक्षणम् ॥
अभ्यर्चयति गीर्वाणि भगपुष्पसमर्पणैः ।
तस्मादानन्ददेवस्याराद्धिरेव परं फलम् ॥

End:

मल्लिङ्गार्चनहेतुर्यस्त्वया पृष्टः कुलेश्वरि ।
स मया विशदः प्रोक्तः किं भूयः श्रोतुमिच्छसि ॥

Colophon:

इति द्वाविं(त्रि)शत्कोटिविस्तीर्णे विद्यास्वरूपं नाम विंशति(तम): पटलः॥
आनन्दतन्त्रं समाप्तम् ॥

No. 5563. आनन्दतन्त्रम्.
ĀNANDATANTRAM.

Substance, paper. Size, $12\frac{1}{2} \times 7\frac{3}{4}$ inches. Pages, 140. Lines, 28 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 126*b*. The other work herein is Śivasamayāṅkamātṛkā 1*b*.

Complete.

Same work as the above.

No. 5564. आनन्दतन्त्रम्.

ĀNANDATANTRAM.

Substance, paper. Size, 8 × 6 inches. Pages, 264. Lines, 13 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

Same work as the above.

No. 5565. आनन्दतन्त्रम्.

ĀNANDATANTRAM.

Substance, paper. Size, 8⅝ × 6⅛ inches. Pages, 286. Lines, 13 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

Same work as the above.

No. 5566. आनन्दतन्त्रम्.

ĀNANDATANTRAM.

Substance, palm-leaf (Śrītāla). Size, 15⅞ × 2¼ inches. Pages, 58. Lines, 13 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Svacchandasārasaṅgraha 30*a*, Mātṛkāmantra 86*a*, Vāgīśvarīmantra 86*a*, Bālātripurasundarīmantra, Pañcadaśākṣarīmantra, Siddhavidhyāmantra 86*b*, Mātaṅgīśvarīmantra, Laghumātaṅgīmantra, Caṇḍamātaṅgīmantra 87*a*, Kalyāṇamātaṅgīmantra, Bhuvanēśvarīmantra, Tripuṭīmantra, Bṛhadvārāhīmantra 87*b*, Laghuvārāhīmantra, Kirātavārāhīmantra, Svapnavārāhīmantra 88*a*, Madhyāhnavārāhīmantra, Bakulāmukhīmantra, Tvaritāmantra, Klinnāmantra, Annapūrṇēśvarīmantra 89, Vanadurgāmantra, Jātavēdasadurgāmantra, Pañcabāṇēśvarīmantra, Aśvārūḍhāmantra,

Sammōhanasundarīmantra, Dhūmāvatīmantra, Gāyatrīmantra 90, Pañcākṣarīmantra, Aghōramantra 91, Aghōrāstramantra, Mahāvīraśarabhamantra, Mahāśarabhamantra 92, Śarabhasāluvamantra, Vīrabhadramantra, Dakṣiṇāmūrthimantra 93, Mēdhādakṣiṇāmūrtimantra, Haṁsadakṣiṇāmūrtimantra, Nīlakaṇṭhamantra 94, Kukkuṭākhyasadāśivamantra, Cidambaranaṭanamantra, Putrakāmēṣṭisaubharīmantra 95, Pāśupatāstramantra, Nārāyaṇāṣṭākṣarīmantra, Dvādaśākṣarīmantra, Aṣṭādaśākṣarakṛṣṇamantra, Kṛṣṇadaśākṣarīmantra, Ēkākṣaramantra 96, Aindragōpālamantra, Putragōpālamantra, Ṣaḍakṣarīmantra 97, Sudarśanamantra, Hayagrivamantra, Rāmamantra, Dvādaśākṣararāmamantra 98, Ṣōḍaśākṣararāmamantra, Hanūmanmantra, Dvādaśākṣarahanūmanmantra, Mahāgaṇapatimantra, Ēkākṣaragaṇapatimantrā 99, Ṣaḍakṣaragaṇapatimantra, Ucchiṣṭagaṇapatimantra, Haridrāgaṇapatimantra, Dvyakṣaragaṇapatimantra, Gaṇapatimantra, Saurāṣṭākṣarīmantra, Sauracaturakṣarīmantra 100, Āpaduddhāraṇamantra, Suvarṇabhairavamantra, Kārttikēyamantra, Kāmadhēnumantra, Kāmarājamantra, Mahāpāśupatamantra 101, Brahmāstramantra 102, Brahmadaṇḍāstramantra 103, Nṛsiṁhamantra, Dvādaśākṣarīmantra, Ṣaḍakṣarīmantra, Ēkākṣarīmantra, Turyagāyatrīmantra, Ratipriyāmantra, Mahāśāstāmantra, Gāruḍapañcākṣarīmantra, Amṛtapañcākṣarīmantra, Ēkākṣarabandhamōcanamantra, Mahābhairavīmantra, Amṛtasañjīvinīmantra 104.

Complete.

Same work as the above.

No. 5567. आनन्दतन्त्रम्.

ĀNANDATANTRAM.

Pages, 255. Lines, 16 on a page.

Begins on fol. 120*b* of the MS. described under No. 5553.

Complete.

Same work as the above.

No. 5568. आनन्दतन्त्रम्.
ĀNANDATANTRAM.

Substance, paper. Size, 7⅞ × 6¼ inches. Pages, 42. Lines, 15 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 109*b*. The other works herein are Rāmārcana-candrikā 1*a*, Dakṣiṇāmūrtimantrastōtra 73*a*, Sarasvatīmantra 102*b*, Bhairavatantra 157*a*, Vighnēśvarapūjāvidhāna 179*a*.

Breaks off in the 5th Paṭala.

Same work as the above.

No. 5569. आनन्दतन्त्रम्—सव्याख्यानम्.
ĀNANDATANTRAM WITH COMMENTARY.

Substance, paper. Size, 9½ × 7¼ inches. Pages, 152. Lines, 23 on a page. Character, Telugu. Condition, injured. Appearance, old.

Breaks off in the 5th Paṭala.

The same as the above, with a short commentary thereon by Narasiṁhārya of Maudgalya family.

Beginning :

श्रीमानस्तु समस्तविश्वजननस्थेमादिलीलारतः
कामारिप्रमुखाखिलामरमुनिस्तोमाविशेषार्चितः ।
भूमा यस्य विचिन्वतामपि सतां ज्ञातुं न सा(वा)शक्यते
क्षेमाय प्रथमानसर्वसुगुणस्तोमाश्रयो नस्सदा ॥
यन्मायापरिमोहितं जगदिदं लीनं तमोमण्डले
गन्तुं नेच्छति वाञ्छितात्पविभवं नाना परिभ्रामितम् ।
विश्वोत्तारणहेतवे प्रविमलज्ञानैकवेद्यात्मने
सत्यत्वादिगुणाश्रयाय च नमस्तस्मै परब्रह्मणे ॥
यत्पादसेवानिरतात्मकानां न यान्ति कार्येष्वखिलान्तरायाः ।
नमामि तं नागमुखादिविघ्ननिवारकैरर्चितपादयुग्मम् ॥

(व्या.)

इह खलु भगवती महादेवी अनादिसंसारसागरनिमग्नभक्तजनानुग्रहार्थं सर्वव्यापकमूर्तेः सकलजगदानन्दहेतोः सदाशिवस्य ज्ञातुमिच्छन्ती प्रथमं स्वरूपयाथात्म्यं तत्रादौ प्रस्तौति—आनन्दकन्दभूतायेति ।

(मू.)

आनन्दकन्दभूताय जगदानन्दहेतवे ।
नमस्सततभोगाय महालिङ्गाय शम्भवे ॥

आनन्द इति । आनन्दो ब्रह्मानन्दः तस्य कन्दभूताय मूलस्वरूपायेत्यर्थः । चैतन्यविशिष्टसकलजन्तूनामानन्दप्राप्तिहेतुभूताय । सततभोगाय अनवरतानुभूयमानपरमानन्दसौख्याय दुःखलेशरहितायेति भावः ।

* * *

अत्र कामेश्वरः—

महादेव्यै महालिङ्गस्वरूपं तन्माहात्म्यमेतदधिकारिजनलभ्यमानफलादिकं निरूप्य विज्ञान[वि]स्वरूपादिकं कथयामीत्युक्तवानिति भावः ।

इदं शास्त्रमाधुनिकं प्राचीनं वेति शङ्कानिरासार्थमेतन्मूलग्रन्थोदाहरणम् । इदमानन्दतन्त्रं द्वात्रिंशत्कोटिग्रन्थसङ्ख्याविशिष्टनित्याषोडशिकार्णवतन्त्रनामकग्रन्थान्तर्गतशतसहस्रसङ्ख्याकग्रन्थपरिमाणविशिष्टभगमालिनीसंहिताख्यग्रन्थस्थितमिदमानन्दतन्त्राख्यशास्त्रमित्यर्थः ॥

Colophon:

आनन्दतन्त्रग्रन्थे प्रथमाध्यायस्य टीका रचिता ॥

श्रीमद्राजाधिराजातितराविनुतवाक्चातुरीवैभवेन
पिल्लिर्पावीन्सुब्रौन्भूपारिवृढमणिना सन्ततं पोषितेन ।
श्रीमौद्गल्यान्ववायप्रजनितनरसिंहार्यनाम्ना प्रणीता
टीका लोकोपकर्त्री वि(हि)जयतु विदुषां मानसं तोषयन्ती ॥

End:

(मू.)

किं तन्त्रवात्मकं नाम का वा सा च नवात्मिका ।
किं व्यस्तं किं नु कूटं वा कथयस्व मम प्रभो ॥

(टी.)

अत्र श्रीदेवी पुनः पृच्छति—किमिति । नवात्मिथुनाख्येति विद्याया नाम त्वया प्रोक्ता.

No. 5570. आवरणपूजा.

ĀVARAṆAPŪJĀ.

Substance, paper. Size, 12¾ × 4 inches. Pages, 22. Lines, 13 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Āmnāyastava 12*a*, Āmnāyadīkṣāmantradīpikā 37*a*.

Contains the Āvaraṇas 1 to 8 complete.

On the worship of the minor deities around goddess Śakti.

Beginning:

गुरुर्ब्रह्मा गुरुर्विष्णुः . तस्मै श्रीगुरवेनमः ॥

तत्र गृहप्राङ्गणे एकदेशे प्राङ्मुख उपविश्य जानुपादावा मणिबन्धौ प्रक्षाळ्याचम्य.

* * * *

एवंगुणतिथौ महात्रिपुरसुन्दरीमुद्दिश्य महात्रिपुरसुन्दरीप्रीत्यर्थं महात्रिपुरसुन्दरीपूजां करिष्ये ।

End:

इत्यद्भुतरसात्मिकां ध्यायेत् । सजलपुष्पाक्षतैः चक्रेश्वर्यै पूजां समर्प्य बिन्दुत्रयेण देवतां सन्तर्पयेत् ।

Colophon:

इत्यष्टमावरणम् ॥
अथ नवमावरणम्.

No 5571. ओघत्रयम्.

ŌGHATRAYAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 128*a* of the MS. described under No. 673.

Complete.

On an arrangement of the principles of the Śakti religion into three groups.

Beginning:

परप्रकाशः प्रथमो द्वितियः परमश्शिवः ।
परा शक्तिश्च कौळेशः शुक्ला देवी कुळेश्वरः ॥
कामेश्वरी च दिव्यौघो भोगक्लिन्ना ततः परम् ।
समयस्सहजश्चैव सिद्धौघः परिकीर्तितः ॥
गगनानन्दनाथश्च विश्वानन्दस्ततः परम् ।
विमलानन्दनाथश्च मदनानन्दनाथकः ॥
भुवनानन्दनाथश्च लीलानन्दस्ततः परम् ।
स्वात्मानन्दः प्रियानन्दो मानसौघः प्रकीर्तितः ॥

End:

आत्मा च परमात्मा च शाम्भवानन्द एव च ॥
चिन्मुद्रा वाग्भवानन्दो नीलकण्ठश्च सम्भ्रमः ।
चिदानन्दः प्रसन्नश्च नाथा नव समीरिताः ॥

No. 5572. ओघत्रयम्.

ŌGHATRAYAM.

Substance, palm-leaf. Size, $16\frac{7}{8} \times 1\frac{1}{8}$ inches. Pages, 6. Lines, 5 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 16*a*. The other works herein are Ṣaḍāmnāyamantra 1*a*, Kuṇḍalihōmaprakaraṇa 18*b*, Mahālakṣmiratnakōśa 21*b*, Cakrāvalī 40*a*, Kāmēśvarīkhaḍgamālā 44*a*, Kāmakalā-

vyākhyāna 45*a*, Mahāvidyāmantra 52*a*, Pañcadaśākṣarīmantrākṣaramālā 54*a*.

Complete.

Same work as the above.

No. 5573. कात्यायनीतन्त्रम्.
KĀTYĀYANĪTANTRAM.

Pages, 12. Lines, 5 on a page.

Begins on fol. 57*b* of the MS. described under No. 537.

Paṭalas 20 to 23.

A small work on a certain Mantra connected with Śāktēya religion.

Beginning:

ईश्वर उवाच—

मार्कण्डेयेन ऋषिणा स्वप्ने लब्धस्स्वयं मनुः ।
व्यासाय प्रददौ तेन स्व(ा)त्स्नेहात्प्रकटीकृतः ॥
मार्कण्डेयऋषिः प्रोक्तः प्रथमश्लोकरूपतः ।
व्योमादिवर्णसम्भूतान्(तो) द्वितीयस्वरसंयुतान्(तः) ॥
नृपान्तं प्रवदेन्मन्त्रान् सर्वे चाष्टादश प्रिये ।
वैश्योवाच ततः श्लोका व्योमाद्याः पञ्च मन्त्रकाः ॥
यादिवर्णा नृपस्योक्तिर्द्वादशस्वरसंयुता ।
सकारो बिन्दुसंयुक्तश्चान्ते स्तो मनुरीदृशी ॥

End:

यदिदं ते मयाख्यातं गुह्यार्थं(द्गु)ह्यतरं महत् ।
रहस्यं परमं स्थानं देवानामपि दुर्लभम् ॥
यन्मनोर्मानसी सिद्धिरणिमादिरथामृतम् ।
नान्यै(न्य)स्तत्सदृशो मन्त्रो नित्यं जानीहि पार्वति ॥

Colophon:

इति श्रीकात्यायनीतन्त्रे ईश्वरपार्वतीसंवादे मालामन्त्रभागकथनं नाम त्रयोविंशतितमः पटलः ॥

विजयाब्दे चैत्रमासे द्वादश्यङ्गारवासरे ।
सर्वेशो(श्वरः)सप्तशतीमालिख(त्तां)यथाश्रुतम् ॥

No. 5574. कात्यायनीतन्त्रव्याख्या.

KĀTYĀYANĪTANTRAVYĀKHYĀ.

Substance, paper. Size, $10\frac{1}{3} \times 8\frac{1}{4}$ inches. Pages, 38. Lines, 19 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Garbhakulārṇava 21*a*, Vanadurgāmahāvidyā 25*a*, Vanadurgāmahāvidyā (different) 41*a*, Nṛsiṁhadigbandhana 64*a*, Parāpūjā 73*a*, Bhadrakāḷīmantra 82*a*, Śūlinīmantra 83*b*, Ākāśabhairavakalpa 88*a*, Caṇḍikāpūjā 117*a*, Catuṣṣaṣṭibhairava 118*a*, Amṛtamṛtyuñjayamantra 121*a*.

Incomplete.

A commentary on the work described under the previous number.

Beginning :

अथास्य सप्तशतीव्यवहारप्रयोजकशतहोममन्त्रविभागो दर्शितः कात्यायनीतन्त्रे —

(मू.)

मार्कण्डेयऋषिः प्रोक्तः प्रथमश्लोकतः प्रिये ।
व्योमादिवर्णसम्भूतो द्वितीयस्वरसंयुतः ॥

(टी.)

व्योम हकारः । तस्यादिः सकारः । द्वितीयस्वर आकार इत्यर्थः ।

(मू.) नृपान्तं प्रवदेन्मन्त्रान् सर्वे चाष्टादश प्रिये ।
वैश्योवाच ततः श्लोका व्योमाद्याः पञ्च मन्त्रकाः ॥

(टी.) व्योमादिराद्ये येषामि(ति)मृगनयनावत्समासः ॥

(मू.) नृपस्योक्तिर्मान्तवर्णो द्वादशस्वरसंयुतः ।

(टी.) मान्तवर्णो यः सः द्वादशस्वरेण ऐकारेण युक्त आदिभूत इत्यर्थः ।

End:

(मू.) दशवारं पठेद्यस्तु सद्यः पापैः प्रमुच्यते ।
महादुर्गाणि तरति महादेव्याः प्रसाद(तः) ॥

(टी.)

सायमधीयानो दिवसकृतं पापं नाशयति । प्रातरधीयानो रात्रिकृतं पापं नाशयति । यत्सायम्प्रातः प्रयुञ्जानः पापोऽपापो भवति । निशीथे तुर्यसन्ध्यायां जप्त्वा वाक्सिद्धिर्भवति । नूतनायां प्रतिमायां जप्त्वा देवता-सान्निध्यं भव(ज)ति । प्राणप्रतिष्ठायां जप्त्वा प्राणानां प्रतिष्ठापयति । भौमा-श्विन्यां महादेवीसन्निधौ जप्त्वा स महामृत्युं तरति स महामृत्युं तरति स महामृत्युं तरति । य एवं वेद । इत्युपनिषत् । सह नाववतु . वहै । तच्छं यो . ष्पदे । नमो ब्रह्मणे . करोमि । पूर्णमदः . शि-ष्यते ।

No **5575.** कामकला.

KĀMAKALĀ.

Pages, 11. Lines, 20 on a page.

Begins on fol. 240*b* of the MS. described under No. 3907.

Complete

On the worship of Śakti : by Puṇyānanda.

Beginning:

सकलभुवनोदयस्थितिलयमयलीलाविनोदनोद्युक्तः ।
अन्तर्लीनविमर्शः पातु महेशः प्रकाशमात्रतनुः ॥

सा जयति शक्तिराद्या निजसुखमयनित्यनिरुपमाकारा ।
भाविचराचरबीजं शिवरूपविमर्शनिर्मलादर्शः ॥

End:

उदितः पुण्यानन्दादिति कामकलाङ्गनाविलासोऽयम् ।
(परशिव)भुजङ्गभावाकर्षितहर्षाय कल्पते नित्यम् ॥
चिन्तातरङ्गतरलस्तृष्णासलिलः प्रपञ्चवाराशिः ।
यदनुग्रहेण तीर्णस्तस्मै श्रीनाथनाविकाय नमः ॥

Colophon:

इति कामकलामूलं सम्पूर्णम् ॥

No. 5576. कामकला.
KĀMAKALĀ.

Pages, 5. Lines, 7 on a page.

Begins on fol. 58*a* of the MS. described under No. 673.
Complete.
Same work as the above.

No. 5577. कामकला–सव्याख्या.
KĀMAKALĀ WITH COMMENTARY.

Pages, 31. Lines, 20 on a page.

Begins on fol. 98*a* of the MS. described under No. 5477.
Complete.
Same work as the above with a commentary.

Beginning:

अथ तत्र भवान् पुण्यानन्दमुनीन्द्रः सत्सम्प्रदायानिष्णातः सकल-निगमागमावधारितात्मतत्त्वयाथार्थ्यवत् सकलविद्याधिदेवताभूतश्रीमहात्रि-पुरसुन्दरीमन्त्रराजचक्रक्रममध्य(व्या)चिकीर्षया तदधिष्ठानभूतकामकामेश्वरी-रूपमादौ व्याचष्टे—सकलेत्यादिना ।

सकल . . मात्रतनुः ॥

सकलभुवनानामुदयस्थितिलयाः सृष्टिस्थितिसंहाराः । तिरोधानानुग्रहयोरिदमुपलक्षणम् ।

End:

उदितः पुण्यानन्दादिति कामकलाङ्गनाविलासोऽयम् ।
परशिवभुजङ्गभावोत्कम्पितहर्षाय कल्पते नित्यम् ॥

* * * *

लोके प्रियतमाविलासावलोकनेन रसिकविटस्य शृङ्गारभावोदयो यथा तद्वत् परमशिवस्य स्वात्मशक्तीक्षणाभिमुखस्य तच्छक्तिभूतकामकलाविलासः पदविक्षेपादिरूपो निरवधिकानन्दप्रदो भवति । इति शब्दस्तवसमाप्तिद्योतकः ॥

चिन्तातरङ्गतरलस्तृष्णासलिलः प्रपञ्चवाराशिः ।
यदनुग्रहेण तीर्णस्तस्मै श्रीनाथनाय(वि)काय नमः ॥

Colophon:

इति श्रीमदद्वैतसमानविलासपुण्यानन्दोदितकामकलाविलासस्संपूर्णः ॥

No. 5578. कामकला–सव्याख्या.

KĀMAKALĀ WITH COMMENTARY.

Pages, 30. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 3472.

Complete.

The first two leaves are not found.

Same work as the above.

No. 5579. कामकला–सव्याख्या.

KĀMAKALĀ WITH COMMENTARY.

Pages, 14. Lines, 22 on a page.

Begins on fol. 122*a* of the MS. described under No. 5477.

Incomplete.

Same work as the above,

No. **5580.** कामकला–सव्याख्या.

KĀMAKALĀ: WITH COMMENTARY.

Pages, 100. Lines, 19 on a page.

Begins on fol. 1*a* of the MS. described under No. 426.

Contains only 48 stanzas.

The commentary here is different from the one described under the previous number and is by Naṭanānanda.

Beginning:

वन्दे तन्मिथुनं दिव्यमाद्यमानन्दचिद्घनम् ।
अनुत्तरपरं ज्योतिरिति यद्भाव्यते बुधैः ॥

* * * *

पुण्यानन्दमुनीन्द्रात् कामकला नाम विश्रुता जाता ।
आख्यां कांचिदमुष्या नटनानन्दः करोति सव्याख्याम् ॥

इह हि शक्तिपातसमुन्मिषत्सकलवेदवेदान्ततात्पर्यनिर्णयविशारदाः . . . . पुण्यानन्दाः स्वयं परमात्मानं प्रकाशयन्तः परमेश्वरमात्मत्वेन समाविशन्तः परेषामपि भक्तिभाजां पुरुषाणामुज्जिगी(जीवयि)ष[त]या परमात्मैकत्वलक्षणं रक्षणमाशासते—

सकलभुवनोदयस्थितिलयमयलीलाविनोदनोद्युक्तः ।
अन्तर्लीनविमर्शः पातु महेशः प्रकाशमात्रतनुः ॥

अत्र पुण्यानन्दयोगिनः . . . . सकलविद्याधि[भू]देवताभूतमहात्रिपुरसुन्दरीमन्त्रचक्रपूजाक्रमव्याचिकीर्ष[त]या तदधिष्ठानभूतकामकामेश्वरीरूपमादावाचक्षते—सकलेत्यादि ।

End:

स आनन्दयोनिः, आनन्दो ब्रह्म, ब्रह्मैव सन् ब्रह्माप्येति, ब्रह्म वेद ब्रह्मैव भवति, ब्रह्मविदाप्नोति परमित्यादिश्रुतिसूत्रकामकलास्वरूपं परिपूर्णं प्रपञ्चितमिति शिवम् ॥

Colophon:

इति नटनानन्दविरचिते कामकलाव्याख्यानं सम्पूर्णम् ॥

No. **5581.** कामकलाव्याख्यानम्.

KĀMAKALĀVYĀKHYĀNAM.

Pages, 86. Lines, 19 on a page.

Begins on fol. 246*a* of the MS. described under No. 3907.

Incomplete.

Same work as the above.

No. **5582.** कामकलाव्याख्यानम्.

KĀMAKALĀVYĀKHYĀNAM.

Pages, 12. Lines, 5 on a page.

Begins on fol. 45*a* of the MS. described under No. 5572.

Incomplete.

Same commentary as the one described under No. 5577.

No. **5583.** कुण्डलिनीहोमप्रकरणम्.

KUṆḌALINĪHŌMAPRAKARAṆAM.

Pages, 6. Lines, 5 on a page.

Begins on fol. 18*b* of the MS. described under No. 5572.

Complete.

On the performance of a certain fire sacrifice in worship of the goddess Śakti.

Beginning:

अथ होमक्रमो लिख्यते—

अं—अः प्रकृत्यहङ्कारबुद्धिमनश्श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणि - पादपायूपस्थशब्दस्पर्शरूपरसगन्धाकाशवायुवह्निसलिलभूम्यात्मना आत्म - तत्त्वेन आणवमलं स्थूलदेहं संशोध्य ऐं कः अखण्डैकरसानन्दकरे पर- सुधात्मनि स्वच्छन्दस्फुरणमात्रकुळरूपिणि ।

End:

पुनः गुरुपादुकायां गुरुत्रयं संपूज्य
धर्माधर्महविर्दीप्ते ह्यात्माग्नौ मनसा स्रुचा ।
सुषुम्नावर्त्मना नीत्वा अक्षवृत्तिं जुहोम्यहम् ॥ स्वाहा ।
प्रकाशाकाशहस्ताभ्यामवलम्ब्योन्मनीस्रुचा ।
धर्माधर्मकलास्नेहपूर्णवह्नौ जुहोम्यहम् ॥ स्वाहा ।

Colophon:

इति कुण्डलिनीहोमप्रकारः ॥

No. 5584. कुण्डलिनीहोमप्रकरणम्.

KUṆḌALINĪHŌMAPRAKARAṆAM.

Pages, 5. Lines, 5 on a page.

Begins on fol. 129*a* of the MS. described under No. 673.

Complete.

Same work as the above.

No. 5585. कुलप्रदीपः.

KULAPRADĪPAḤ.

Substance, palm-leaf. Size, 13 × 1½ inches. Pages, 170. Lines, 6 on a page. Character, Grantha. Condition, much injured. Appearance, old

Begins on fol. 86*a*. The other works herein are Kauladarśa 1*a*, Jīvacakrapūjāvidhāna 21*a*, Pañcamīstavarāja 45*a*, Nāthaparā-

yaṇamantra 58*a*, Ghaṭikāpārāyaṇamantra 59*b*, Tattvapārāyaṇamantra 60*a*, Kālanityāpārāyaṇamantra 61*a*, Nityapārāyaṇamantra 62*a*, Dinōtthapārāyaṇamantra 63*a*, Nityābhagamālīnīmantra 84*a*, Dīkṣāvidhi 171*a*.

Complete.

Contains Prakāśas 1 to 8.

On the doctrines of the Kaula sect among the worshippers of Śakti: by Śivānandācārya.

Beginning:

गुरुं प्रणम्य प्रथमं ततोऽहं गणनायकं(णाधिपं) श्रीपरदेवतां च ।
वन्दे महोपासककौळिकानां निबन्धमेनं रचयामि रम्यम् ॥

* * * *

ब्रह्मैक्यताप्रापकहेतुभूताश्श्राव्यं समस्तागमसारभूतम् ।
कुलप्रदीपाख्यमिदं निबद्धं विलोक्य कौलास्सुखिता भवन्तु ॥

तत्रादौ कुलधर्मप्रशंसा श्रीकुलार्णवे—

कुलेश श्रोतुमिच्छामि सर्वभूतदयानिधे ।
कुलधर्मास्त्वया देव सूचिता न प्रकाशिताः ॥
तस्य धर्मस्य माहात्म्यं सर्वधर्मोत्तमस्य च ।
वद मे करुणेशान यदि ते कृपया मयि ॥

* * * *

Colophon:

इति शिवानन्दाचार्यविरचिते कुलप्रदीपे प्रथमः प्रकाशः ॥

End:

अङ्गुष्ठाभ्यां योजिताभ्यां योन्याकारं तु कारयेत् ॥
योनिमुद्रेति विख्याता परा त्रैलोक्यमातृका ।
इत्थमेवं हृदि क्षिप्त्वा त्रैलोक्यक्षोभिणी भवेत् ॥

सत्त्वचिद्घनब्रह्मानन्दशिष्येण विश्वानन्दनाथ(थेन)स्वहस्तलिखितम् ॥

No. **5586.** कुलाचारपद्धतिः.
KULĀCĀRAPADDHATIḤ.

Substance, palm-leaf. Size, $9\frac{1}{4} \times 7\frac{1}{2}$ inches. Pages, 190. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 90*a*. The other works herein are Kārtavīryārjunakalpa 1*a*, Divyamaṅgaladhyāna 58*a*, Mahāvidyā 65*b*, Śabaracintāmaṇi 91*a*, Bētālakalpa 121*a*, Āvēśahanūmadviṣaya 153*a*, Indrākṣīstōtra 155*b*, Bhairavatantra 158*a*.

Complete.

Similar to the above.

Beginning:

तदुक्तं कालीतन्त्रे—

अथाचारं प्रवक्ष्यामि यत्कृतेऽमृतमश्नुते ।
सर्वभूतहिते युक्तस्समयाचारपारगः ॥

* * * *

कुलस्त्रीवीरनिन्दां च तद्द्रव्यस्यापहारिणा(ता)म् ।
स्त्रीषु रोषं प्रहारं च वर्जयेन्मतिमान् सदा ॥
स्त्रीमयं च जगत्सर्वं स्वयं तावत्तथा भवेत् ।
पेयं चार्घ्यं तथा चोष्यं लेह्यं भक्ष्यं गृहं सुखम् ॥
सर्वं च युवतीरूपं भावयेच्छुद्धमानसः ।
कुलजां युवतीं वीक्ष्य नमस्कुर्यात्समाहितः ॥

End:

साधकानां च द्वेष्टारः सदैवाम्नायनिन्दकाः ।
डाकिनीनां मुखे यान्तु तृप्तास्तत्पिशितैस्तु ताः ॥
शत्रवो नाशमायान्तु मम निन्दाकराश्च ये ।
द्वेष्टारस्साधकानां च विनश्यन्तु शिवाज्ञया ॥

Colophon:

इति शान्तिस्तोत्रम् ॥

No. 5587. कुलार्णवः.

KULĀRṆAVAḤ.

Substance, paper. Size, 9½ × 7½ inches. Pages, 264. Lines, 14 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Garbhakulārṇava 137*a*, Catuṣṣaṣṭistava 190*a*.

Contains Ullāsas 1 to 17.

A Śāktēyāgama.

Beginning:

गुरुं गणपतिं दुर्गां वटुकं शिवमच्युतम् ।
ब्रह्माणं गिरिजां लक्ष्मीं वाणीं वन्दे विभूतये ॥

अनाद्यायाखिलाद्याय मायिने गतमायिने ।
अरूपाय सुरूपाय शिवाय गुरवे नमः ॥

पराप्रासादमन्त्रोद्यत्सच्चिदानन्दतेजसे * ।
अग्निसोम†स्वरूपाय साम्बिकाय नमो नमः ॥

श्रीदेव्युवाच—

भगवन् देवदेवेश पञ्चकृत्यपरायण ‡ ।
सर्वज्ञ भक्तसुलभ शरणागतवत्सल ॥

कुळेश परमेशान करुणामृतवारिधे ।
असारे घोरसंसारे सर्वदुःखमलीमसाः ॥

* * * *

---

* चेतसे, रूपिणे इति च पाठान्तरम्.

† ग्नीषोम, ग्निष्टोम इति च पाठान्तरम्.

‡ त्यविधायक इति पाठान्तरम्.

सदा दुःखातुरा देव न सुखं विद्यते क्वचित् ।
केनोपायेन वात्रैव मुच्यन्ते वद मे प्रभो ॥

ईश्वर उवाच—

* * * *

बहुनात्र किमुक्तेन रहस्यं शृणु पार्वति ।
कुलमार्गादृते मुक्तिर्नास्ति सत्यं न संशयः ॥
तस्मात्कुलार्थतत्त्वं तु विज्ञेयं श्रीगुरोर्मुखात् ।
सुखेन मुच्यते देवि घोरसंसारबन्धनात् ॥

End:

व्रतदानतपस्तीर्थयज्ञदेवार्चनादिषु ।
यत्फलं कोटिगुणितं लभते तन्न संशयः ॥
त्यक्त्वा संसारभारं तु सर्वदुःखमयं प्रिये ।
त्वत्सन्निधौ स निवसेन्नात्र कार्या विचारणा ॥

Colophon:

इति श्रीकुलार्णवे महारहस्ये सपादलक्षग्रन्थे पञ्चमखण्डे गुरुनामवासनादिकथनं नाम सप्तदशोल्लासः सम्पूर्ण(:) ॥

No. **5588.** कुलार्णवः.

KULĀRṆAVAḤ.

Substance, palm-leaf. Size, 17¼ × 1⅝ inches. Pages, 145. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Complete.

Same work as the above.

This manuscript is said to have been transcribed by one Paramarti Koṇḍayya from the manuscript belonging to one Cēbōlu Rāmasvāmi Śāstrin.

कीलकाब्दे पुष्यमासे पञ्चमे गुरुवासरे ।
कुलार्णवाख्यग्रन्थोऽयं लिखितं(तः)पूर्णतामियात् ॥

No. 5589. कुलार्णवः.

KULĀRṆAVAḤ.

Substance, palm-leaf. Size, 16 × 1⅜ inches. Pages, 134. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Same work as the above.

No. 5590. कुलार्णवः.

KULĀRṆAVAḤ.

Substance, palm-leaf. Size, 13⅝ × 1⅜ inches. Pages, 292. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 12*a*. The other work herein is Saundaryalaharīvyākhyā 1*a*.

Complete.

Same work as the above.

No. 5591. कुलार्णवः.

KULĀRṆAVAḤ.

Pages, 66. Lines, 25 on a page.

Begins on fol. 135*a* of the MS. described under No. 5477.

Six Ullāsas only.

Same work as the above.

No. 5592. कुलार्णवः.

KULĀRṆAVAḤ.

Pages, 107. Lines, 7 on a page.

Begins on fol. 40*a* of the MS. described under No. 4369.

Ullāsas 1 to 11 complete; breaks off in the 12th Ullāsa.

Same work as the above.

No. 5593. कुलार्णवः.

KULĀRṆAVAḤ.

Substance, paper. Size, 9½ × 7⅝ inches. Pages, 73. Lines, 17 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are—Garbhakulārṇava 42*a*, Lalitāstava 62*a*, Śrīcakralēkhanavidhi 75*a*, Śivānandalaharī 81*a*, Cidambaranaṭana 91*a*, Mahēśāṣṭaka 92*a*, Saundaryalaharī 92*b*, Sadāmnāya 105*a*, Pañcamistavarāja 117*a*, Kaulikādarśa 125*a*, Yōginīhṛdaya 131*a*, Siddhayāmala 154*a*, Ucchiṣṭagaṇapatiyantra 160*a*, Puraścaraṇaprakāra 162, Śvētārkakalpa 171*a*, Garbhakaulāgama 174.

Contains Ullāsas 6 to 10 complete.

Same work as the above.

No. 5594. कुलार्णवः.

KULĀRṆAVAḤ.

Substance, palm-leaf. Size, 18⅜ × 1⅝ inches. Pages, 116. Lines, 7 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Incomplete.

Same work as the above.

No. 5595. कुलार्णवः.

KULARṆAVAḤ.

Pages, 6. Lines, 13 on a page.

Begins on fol. 16*a* of the MS. described under No. 4757.

First Ullāsa complete and the 2nd Ullāsa incomplete.

Same work as the above.

No. 5596. कौलादर्शः.

KAULĀDARŚAḤ.

Pages, 39. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 5585.

Complete.

By Viśvānandanātha.

On the doctrines and distinguishing characteristics of the true Kaula sect among the worshippers of Śakti.

Beginning:

नत्वा श्रीगुरुपादुकां च प . ती वाणीं च विघ्नेश्वरं
श्रीकामेशमतः परां च त्रिपुरादेवीं शुकश्यामळाम् ।
वक्ष्ये कौळिकधूर्तदाम्भिकशठादीनां कुळज्ञानिना-
माच(ा)रस्य च लक्षणानि विलसत्सत्कौळिकानां क्रमात् ॥
कौळामृतोदितार्थान् सङ्गृह्य श्रीकुळार्णवार्थांश्च ।
कौळादर्शं कुरुते विश्वानन्दो हिताय कौळविदाम् ॥

कुळधूर्तानां लक्षणानि ।

द्रव्यस्त्रीमधुलोलुपैर्गुरुमुखादप्राप्तमन्त्रागमै-
र्विद्यापुस्तकमन्त्रचौर्यनिरतैः क्रोधाभिमानान्वितैः ।
विप्रैः कौळिकवेषधारिभिरहो पूर्णाभिषिक्ता वयं
ब्रह्मज्ञा इति तापसा इति खलैश्चित्रं जगद्वञ्चितम् ॥
केचिच्छ्रीकुळदेवतांवय(तामह)मिति त्वच्छ्रेयसे पूजये
देवार्थं धनमानयाशु ननु ते दास्ये मनुं श्रेयसे ।
सन्तानाय ददामि ते मनुवरं दीक्षां च कुर्वे परां
भोः चित्रं धनिनां हरन्ति विविधोपायैर्धनं दाम्भिकाः ॥

End:

श्रीपश्चमीमथ विसृज्य कुळामृतं श्रीपात्रे नियोज्य विनिवेश्य(द्य)च भोगशक्त्यै ।
सोमामृतं सुविधिना परिपीय देवी भूमौ सदा विजये(यते)कुळदेशिकेन्द्रः ॥

श्रीमद्विश्वान(न्द)नाथप्रणीतं कौळाचाराशेषधर्मप्रकाशम् ।
कौळादर्शं कौ(ळ)शास्त्रानुसारं कौळाचार्यास्सम्यगालोका(कय)न्ताम् ॥

Colophon:

इति विश्वानन्द(नाथ)विरचितं कौळादर्शतन्त्रं सम्पूर्णम् ॥

No. 5597. कौलिकादर्शः.

KAULIKĀDARŚAḤ.

Pages, 11. **Lines**, 18 on a page.

Begins on fol. 125*a* of the MS. described under No. 5593.

Complete.

Similar to the above.

By Viśvānandanātha.

Beginning:

ऋष्यादिं त्रिपुरामनोर्निजतनौ न्यासं विधाय क्रमात्
ध्यात्वा हृत्कमलस्थितां परकलां स्वान्ते मनःकल्पितैः ।
संपूज्य स्वगुरूपादेष्टविधिना सर्वोपचारैर्मनुं
जप्त्वा श्रीगणपं प्रणम्य च गुरुं श्रीचक्रमभ्यर्चयेत् ॥

इत्यन्तर्यागलक्षणम् ।

श्रीचक्रस्य च पश्चिमे नव सुधापूर्णान् घटान् स्थापयेत्
वामे पुष्पफलादिकान् तदितरे तोयप्रपूर्णान् घटान् ।
कस्तूरीशशिवासितान् स्वपुरतो गन्धाक्षतादींस्ततः
पाणिक्षालनपात्रमेकममलं पश्चात्ततस्स्थापयेत् ॥
सुस्नातां नवयौवनां स्मितमुखीं श्यामां मनोहारिणीं
नानारत्नविचित्रभूषणधरां शोणाम्बराडम्बराम् ।
श्रीकामेश्वरमन्त्रचिन्तनपरां कामेश्वरीरूपिणीं
श्रीदूतीमुपवेशयेन्निजतनोर्वामे विशुद्धासने ॥

End:

श्रीपञ्चमीमद(थ)विसृज्य कुलामृतं श्रीपात्रे नियोज्य विनिवेद्य च भोगशक्तेः ।
सोमामृतं सुविधिना परिपीय देवीं नत्वा सुखी क्षितितले विहरेत्कुलेन्द्रः ॥

Colophon:

इति श्रीविश्वानन्द(नाथ)विरचितायां कौलिकादर्शस्समाप्तः ॥

No. 5598. कौलिकादर्शः.

KAULIKĀDARŚAḤ.

Pages, 14. Lines, 16 on a page.

Begins on fol. 26*a* of the MS. described under No. 5560.
Complete.
Same work as the above.

No. 5599. गर्भकुलार्णवः.

GARBHAKULĀRṆAVAḤ.

Pages, 103. Lines, 14 on a page.

Begins on fol. 137*a* of the MS. described under No. 5587.
Contains the Paṭalas 1 to 24 complete.
An Āgama work on Śāktism.

Beginning:

श्रीकुचाम्भोजयुगळे कस्तूरीपङ्कपङ्किले ।
नखैर्लिखन्तं चित्राणि लीलासिंहमहं भजे ॥

* * * *

(पार्वत्युवाच)—

नमस्ते सर्वमन्त्रज्ञ नमः कैलासमन्दिर ॥
मुनीनामपि सिद्धानां केन [वा] सिद्धि(र्हि)जायते ।
तत्सर्वं वद मे शम्भो कृपा मय्यादरास्थितः (यि यदि स्थिता) ॥

ईश्वर उवाच—

आस्ते गुह्यतमं देवि कलौ पारं कुलेश्वरि ।
पूजा सौभाग्यनाम्नीयं त्रिषु लोकेषु दुर्लभा ॥
पुरा मुनिगणास्सिद्धा गन्धर्वामरकिन्नराः ।

* * * *

श्रुतिस्मृतिपुराणेषु तथा नोपनिषत्सु च ।
उक्तमेतद्विधानं तु गुह्याद्गुह्यतमं प्रिये ॥

End:

गुरुनिन्दापवादेन श्मशाने च चराचरः ।
अक्षय्यं रौरवं यान्ति(ति) ब्रह्मलोके महीयते ॥

Colophon:

इति श्रीगर्भकौलागमे अतिरहस्यसारे सौभाग्यार्चनविधिविधानं नाम चतुर्विंशः पटलः ॥

No. 5600. गर्भकुलार्णवः.

GARBHAKULĀRṆAVAḤ.

Substance, palm-leaf. Size, 15½ × 1¼ inches. Pages, 59. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 72*a*. The other works herein are Kālarātrikalpa 1*a*, Bhuvanēśvarīmantrakalpa 14*a*, Āsurīśarabhasālvōddhāra-prayōga 22*a*, Chinnamastakākalpa 26*a*, Trikūṭarahasya 38*a*, Kārtavīryapūjāvidhāna 66*a*, Haridrāgaṇapatikalpa 101*a*, Mantrapārāyaṇavidhi 10?*a*, Tripurasundarītantra 122*a*, Indramantrajapaprakāra 126*a*, Śāntistava 129*a*, Āsanavidhi 131*a*, Laghustōtra 133*a*, Carcāstōtra 135*b*, Mātṛkāpuṣpamālāstōtra 137*a*, Āmbāstava 143*b*, Sakalajananīstava 146*a*, Pratāpastuti 150*a*, Kāmākṣīstuti 153*a*.

Complete.

Same work as the above.

No. 5601. गर्भकुलार्णवः.

GARBHAKULĀRṆAVAḤ.

Pages, 50. Lines, 28 on a page.

Begins on fol. 102*b* of the MS. described under No. 5552.

Complete.

Same work as the above.

No. 5602. गर्भकुलार्णवः.

GARBHAKULĀRṆAVAḤ.

Pages, 46. Lines, 17 on a page.

Begins on fol. 42*a* of the MS. described under No. 5593.

Paṭalas 3 to 13.

Same work as the above.

No. 5603. गर्भकुलार्णवः.

GARBHAKULĀRṆAVAḤ.

Pages, 8. Lines, 17 on a page.

Begins on fol. 21*a* of the MS. described under No. 5574.

Second Adhyāya only.

Same work as the above.

No. 5604. गर्भकुलार्णवः.

GARBHAKULĀRṆAVAḤ.

Pages, 9. Lines, 20 on a page.

Begins on fol. 92*b* and 100*b* of the MS. described under No. 5562.

Contains 2 copies complete.

Same work as the above.

No. 5605. गर्भकुलार्णवः.

GARBHAKULĀRṆAVAḤ.

Pages, 8. Lines, 20 on a page.

Begins on fol. 21*a* of the MS. described under No. 5574.

Contains the second Adhyāya of Rahasyajīvatantra.

Same work as the above.

No. 5606. गर्भकौलागमः.

GARBHAKAULĀGAMAḤ.

Pages, 9. Lines, 20 on a page.

Begins on fol. 96*b* of the MS. described under No. 5562.

Incomplete.

Similar to the above.

Beginning:

पार्वत्युवाच—

नमस्ते नाथ भगवन् शिवाय गुरुरूपिणे ।
विद्यावतारसंसिद्ध्यै स्वीकृतानेकविग्रह ॥

* * * *

ध्यानं जपं स्मृतिं कर्म विना सर्वार्थसिद्धिदम् ।
उपायं वद मन्नाथ सर्वजीवदयापर ॥

End:

अस्ति गुह्यतमं किञ्चिच्चिन्तेयं त्यज्यतां त्वया ।
त्वदीयवैभवाश्चर्यनाम्नामष्टोत्तरं शतम् ॥

* * * *

Colophon:

इति श्रीगर्भकौलागमे आश्चर्यनामोष्टत्तरशतदिव्यनामामृतस्तोत्रं सम्पूर्णम् ॥

No. 5607. गर्भकौलागमः.

GARBHAKAUḶĀGAMAḤ.

Substance, paper. Size, 12 × 7⅞ inches. Pages, 8. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 115*b*. The other work herein is Yōginīhṛdaya (with commentary) 1*a*.

Complete.

Same work as the above.

No. 5608. गर्भकौलागमः.

GARBHAKAUḶĀGAMAḤ.

Substance, paper. Size, 9⅞ × 7⅝ inches. Pages, 9. Lines, 17 on a page. Character, Telugu. Condition, good. Appearance,

Begins on fol. 126*a*. The other work herein is Yōginīhṛdaya (with commentary) 1*a*.

Complete.

Same work as the above.

No. 5609. गर्भकौलागमः.

GARBHAKAULĀGAMAḤ.

Pages, 9. Lines, 17 on a page.

Begins on fol. 174*a* of the MS. described under No. 5593.

Same work as the above.

Incomplete.

No. 5610. गर्भकौलागमः.

GARBHAKAULĀGAMAḤ.

Substance, palm-leaf (Śrītāla). Size, 19⅞ × 2¼ inches. Page, 1. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 67*a*. The other work herein is Śrīvidyāvilāsa 1*a*.

Incomplete.

Same work as the above.

No. 5611. चक्रनिरूपणम्.

CAKRANIRŪPAṆAM.

Pages, 7. Lines, 5 on a page.

Begins on fol. 43*b* of the MS. described under No. 235.

Adhyāyas 1 to 6.

Describes the 5 Cakras, which are consecrated circular metallic diagrams worshipped as representing the goddess Śakti.

Beginning:

देवदेव जगन्नाथ सर्वविद्याविशारद ।
कौलिकानां हितार्थाय चक्रमेतद्वद प्रभो ॥

ईश्वर उवाच—

चक्रं पञ्चविधं प्रोक्तं श्रीतन्त्रे रुद्रयामले ।
विधिना पूजयेच्चक्रं सौख्यमोक्षप्रदायकम् ॥
राजचक्रं महाचक्रं देवचक्रमथापरम् ।
वीरचक्रं चतुर्थं स्यात्पशुचक्रं च पञ्चमम् ॥
चातुर्वर्ण्यकुमार्यत्र सुरूपा सुमनोहरा ।
तदभावे कुमारीं च यां काञ्चिद्विधिनार्चयेत् ॥
यवनी योगिनी चैव रजकी श्वपची तथा ।
कैवर्तकसमुत्पन्ना पञ्चशक्तिरुदाहृता ॥

End:

एवं यो भक्तिसंयुक्तो जीवन्मुक्तस्स एव हि ॥
तुलसीबिल्वपत्राणि धात्रीपत्राणि पार्वति ।
अर्चने यन्त्रराजस्य सर्वसिद्धिप्रदं प्रिये ॥

Colophon:

इति रुद्रयामले उमामहेश्वरसंवादे महाकुलसमाचारक्रमेण पञ्चचक्रतदाचारविधिनिरूपणं नाम षष्ठोऽध्यायः ॥

No. 5612. चक्रनिरूपणम्.

CAKRANIRŪPAṆAM.

Pages, 7. Lines, 14 on a page.

Begins on fol. 272*b* of the MS. described under No. 424.

Complete.

Same work as the above.

No. 5613. चक्रविद्या.

CAKRAVIDYĀ.

Pages, 13. Lines, 8 on page.

Begins on fol. 25*a* of the MS. described under No. 673.

Complete.

On the worship of the Cakras representing the goddess Śakti.

Beginning :

चिद्रूपाममलामम्बां त्रिपुराख्यां सदाशिवाम् ।
हृदि ध्यात्वा प्रवक्ष्यामि यत्तत्सिध्यतु मे वच(:) ॥

पार्वत्युवाच—

* * * *

ईश्वर उवाच—

* * * *

श्रीविद्या मन्त्रदीक्षा च चक्रं पूजाक्रमं तथा ।
सम्प्रदायेन लभते नाल्पस्य तपसः फलम् ॥
षोढा न्यासं च गिरिजे चक्रन्यासं तथैव च ।
येनैवाभ्यस्यते तस्य नाल्पस्य तपसः फलम् ॥

End:

अर्चयेदुक्तमार्गेण मण्डलं साधकोत्तमः ।
तत्तत्सिद्धिमवाप्नोति नात्र कार्या विचारणा ॥

इति परमरहस्यसारयन्त्रं सुरवरसिद्धमुनीन्द्रपूजनं च ।
नरवरवशवर्तिकारि यन्त्रं नमितनराघविहन्तृ यन्त्रराजम् ॥

Colophon:

इति स्थितिचक्रं समाप्तम् ॥

No. 5614. चण्डिकापूजा.

CAṆḌIKĀPŪJĀ.

Pages, 3. Lines, 17 on a page.

Begins on fol. 117*a* of the MS. described under No. 5574. Complete.

On the worship of the goddess Caṇḍikā, who is the same as Śakti.

Beginning:

ब्रह्मेन्द्रसुरसिद्धौघमौलिमाणिक्यकान्तिभिः ।
नीराजिताङ्घ्रिपद्मायाः किरीटं पूजयाम्यहम् ॥
मन्दारपारिजातादिदिव्यपुष्पसुवासितम् ।
हसद्व्योमकळं देव्याश्शिरस्संपूजयाम्यहम् ॥

End:

पुष्पाञ्जलिनमस्कारैर्जपधर्मनिवेदनैः ।
यस्सदा चण्डिकां ध्यायेत्स एवाखिलसिद्धिभाक् ॥

Colophon:

इति चण्डिकासर्वाङ्गपूजास्तोत्रं सम्पूर्णम् ॥

No. 5615. चण्डीपूजाविधानम्.

CAṆḌĪPŪJĀVIDHĀNAM.

Substance, palm-leaf (Śrītāla). Size, 10⅞ × 1⅜ inches. Pages, 23. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Dēvimāhātmya

12*b*, Dēvīsahasranāmāvalī in Nāgarī characters 14*a*, another copy in Telugu characters 29*a*.

Complete.

Similar to the above.

Beginning:

पूर्वोक्तैवङ्गुणविशेषणविशिष्टायां शुभतिथौ . . . . . सरस्वतीपूजां करिष्ये—इति सङ्कल्प्य त्रिरात्रिव्रताङ्गत्वेन चामुण्डी- लक्ष्मीसरस्वतीपूजां करिष्ये ।

हेमप्रख्यामिन्दुखण्डात्तमौलिं शङ्खाभीष्टाभीतिहस्तां त्रिणेत्राम् ।
हेमाब्जस्थां पीतवस्त्रां पिशङ्गां देवीं चण्डीं दिव्यरूपां नमामि ॥

श्रीचामुण्डयै नमः—ध्यानम ।

End:

एवं संपूजयेद्यस्तु दुर्गां लक्ष्मीं सरस्वतीम् ।
सर्वाभीष्टं स लभते इहपु(ामु)त्र सुखी भवेत् ॥

प्रार्थनम्—

पुष्पाक्षतादिफलमिश्रमनर्घमर्घ्यं दत्तं मया भुवनमातरि[श्ववि]दं गृहाण ।
संरक्षणं समभिवीक्ष्य जगत्प्रवीक्ष्य मन्दारहाररुचिरापघने नमस्ते ॥

इदमर्घ्यं समर्पयामि.

Colophon:

श्रीचामुण्डामहालक्ष्मीमहासरस्वतीपूजा संपूर्णा ॥

No. 5616. चतुश्शती.

CATUŚŚATĪ.

Substance, paper. Size, $12\frac{1}{8} \times 7\frac{1}{8}$ inches. Pages, 36. Lines, 27 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 94*a*. The other works herein are Tripurākalpa 1*a*, Artharatnāvalī (Catuśśatīvyākhyā) 112*a*, Ṛjuvimarśinī (Catuś- śatīvyākhyā) 156*a*, Tripurāsārasamuccaya 192*a*, Sampradāya- dīpikā (Tripurāsārasamuccayavyākhyā) 214*b*, Rudrayāmalōttara- ṣaṭka 243*a*, Kuladīpikā 251.

Paṭalas 1 to 6.

A work in 400 stanzas explaining the 16 different manifestations of the goddess Śakti. This work also goes by the name of Nityāṣōdaśikārṇava.

Beginning:

गणेशग्रहनक्षत्रयोगिनीराशिरूपिणीम् ।
देवीं मन्त्रमयीं नौमि मातृकापीठरूपिणीम् ॥
प्रणमामि महादेवीं मातृकापरमेश्वरीम् ।
कालहल्लोहलोल्लोलकलनाशमकारिणीम् ॥
यदक्षरैकमात्रेण संसिद्धेस्स्पर्धते नरः ।
रविताक्ष्येन्दुकन्दर्पशङ्करानलविष्णुभिः ॥
यदक्षरशशिज्योत्स्नामण्डितं भुवनत्रयम् ।
वन्दे सर्वेश्वरीं देवीं महाश्रीसिद्धमातृकाम् ॥
यदक्षरमहासूत्रप्रोतमेतज्जगत्त्रयम् ।
ब्रह्माण्डादिकटाहान्तं तां वन्दे सिद्धमातृकाम् ॥

* * * *

नित्याष्षोडश मे देव सूचिता न प्रकाशिताः ।
इदानीं श्रोतुमिच्छामि तासां नामानि शङ्कर ॥
एकैकचक्रपूजां च परिपूर्णं समन्ततः ।
अनेकदेवतानाममन्त्रमुद्रागणैस्सह ॥

ईश्वर उवाच—

शृणु देवि प्रवक्ष्यामि नित्याषोडशिकार्णवम् ।
न कदाचिन्मयाख्यातं सर्वतन्त्रेषु गोपितम् ॥
तत्रादौ प्रथमा नित्या महात्रिपुरसुन्दरी ।
ततः कामेश्वरी नित्या नित्या च भगमालिनी ॥
नित्याक्लिन्नापि हि तथा भेरुण्डा वह्निवासिनी ।
महाविद्येश्वरी दूती त्वरिता कुलसुन्दरी ॥

नित्या नीलपताका च विजया सर्वमङ्गळा ।
ज्वाला च मालिनी चित्रा नित्या एतास्तु षोडश ॥

End:

शक्तिबीजं समाख्यातं त्रिषु लोकेषु दुर्लभम् ।
गोप्याद्गोप्यमिदं ज्ञानं मुक्तिरेवात्र कारणम् ॥

Colophon:

इति श्रीवामकेश्वरतन्त्रे सर्वमन्त्रोत्तमे बहुरूपाष्टकप्रस्तारे श्रीमहात्रिपुरसुन्दरीमेरुप्रस्तारो नाम षष्ठः पटलः ॥

No. 5617. चतुश्शती.

CATŪŚŚATĪ.

Substance, palm-leaf (Śrītāla). Size, 16 × 2 inches. Pages, 18. Lines, 9 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 44*a*. The other works herein are Tripurākalpa 1*a*, Artharatnāvalī (a commentary on catuśśatī) 53*a*, Ṛjuvimarśinī (a commentary on Catuśśatī) 77*a*, Tripurāsārasamuccaya 96*a*, Saṁpradāyadīpikā (a commentary on Tripurāsārasamuccaya) 107*a*, Rudrayāmalōttaraṣaṭka 121*a*, Rudrayāmalōttaraṣaṭkavyākhyā 125*a*, Yōginīhṛdaya 137*a*, Yōginīhṛdayadīpikā 143*a*, Mātṛkācakravivēka 180*a*, Mātṛkācakravivēkavyākhyā 182*a*, Manōramā (a commentary on Tantrarāja) 211*a*, Śivasamayāṅkamātṛkā 273*a*.

Incomplete.

Same work as the above.

No. 5618. चतुश्शती.

CATUŚŚATĪ.

Pages, 40. Lines, 7 on a page.

Begins on fol. 55*a* of the MS. described under No. 5417.

Contains Paṭalas 1 to 5.

Same work as the above.

No. 5619. चतुश्शतीटिप्पणी—अर्थरत्नावली.

CATUŚŚATĪṬIPPAṆĪ: ARTHARATNĀVALĪ.

Pages, 85. Lines, 25 on a page.

Begins on fol. 112*a* of the MS. described under No. 5616. Complete up to the end of the 5th Paṭala.

A brief commentary on the Catuśśatī: by Vidyānandanātha.

Beginning:

निहत्य विघ्नसङ्घातमिष्टमाशु तनोति यः ।
तमजं शाम्भवीसूनुं वन्देऽहं गणनायकम् ॥

* * * *

सम्प्रदायद्वयज्ञेन विमलस्वात्मशम्भुना ।
क्रियते टिप्पणं सम्यग्वामकेश्वरशास्त्रगम् ॥

अर्थरत्नावलीत्येषा ख्याता तु भुवनत्रये ।
भुवनेश्वरि ते भक्त्या क्रियते कृतिरादरात् ॥

प्रारिप्सितस्य शास्त्रस्याविघ्नपरिसमाप्त्यर्थं विशिष्टेष्टलाभाय च परमकारुणिको भगवान् लोकानुग्रहं चिकीर्षुर्बहुरूपाष्टकं शास्त्रं सङ्क्षिप्य चतुश्शतसङ्ख्यापरिमितैर्ग्रन्थैस्तत्सारमुद्धर्तुकामस्तच्छास्त्रप्रतिपाद्यां वर्णावयवां महात्रिपुरसुन्दरीं महाभक्त्या महादेवः प्रणमति—गणेशग्रहनक्षत्रेत्यादिना सूत्रेण । गणेशश्च ग्रहश्च नक्षत्राणि च योगिन्यश्च राशयश्च गणेशग्रहनक्षत्रयोगिनीराशयः ।

End:

करवीरजपापुष्पाणि वश्याय । कर्पूरादि तत्सौभाग्यसिद्धये । पुरं गुग्गुलु एतदपि वश्याय । फलं महासवमांसादि । दधिमधुक्षीरमिश्रैर्लाजैः कलहादिविजयाय इति शुभम् ॥

एतद्दर्पणसुस्पष्टं चतुश्शत्यागमार्थवित् ।
योगीन्द्रो वामनः कुर्यात् परमं पदमश्नुते ॥

Colophon :

इति श्रीविद्यानन्दनाथविरचिते चतुश्शतीटिप्पणे अर्थरत्नावल्यां पञ्चमः पटलः ॥

No. 5620. चतुश्शतीटिप्पणी—अर्थरत्नावली.

CATUŚŚATĪṬIPPAṆĪ : ARTHARATNĀVALĪ.

Pages, 47. Lines, 11 on a page.

Begins on fol. 53*a* of the MS. described under No. 5617.

Complete

Same work as the above.

No. 5621. चतुश्शतीटिप्पणी–अर्थरत्नावली.

CATUŚŚATĪṬIPPAṆĪ : ARTHARATNĀVALĪ.

Pages, 107. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 5417

Incomplete.

Same work as the above.

No. 5622. चतुश्शतीव्याख्या—ऋजुविमर्शिनी.

CATUŚŚATĪVYĀKHYĀ : ṚJUVIMARŚINĪ.

Pages, 38. Lines, 11 on a page.

Begins on fol. 77*a* of the MS. described under No. 5617.

Complete.

A commentary on Catuśśatī : by Śivānanda.

Beginning :

गजाननाय महसे प्रत्यूहतिमिरच्छिदे ।
अपारकरुणापूरतरङ्गितदृशे नमः ॥

* * * *

स्वात्मानन्दमहेशानचरणान्तेनिवासिना ।
शिवानन्देन मुनिना रस्यते त्रैपुरो रसः ॥

असमञ्जसतां दृष्ट्वा वृत्तीनामिह तत्त्वतः ।
व्याकरोति मनाक् श्रीमन्नित्याषोडशिकार्णवम् ॥
सर्वानुग्राहकस्तन्त्रं सर्वोपायावभासकम् ।
सर्वाधिकारसंसिद्ध्यै बह्ववातारयच्छिवः ॥
श्रीवामकेश्वरं नाम शास्त्रतन्त्रं प्रकाशितम् ।
शिवेन संविदं देवीं लक्षीकृत्य निजात्मिकाम् ॥
मध्ये शास्त्रस्य तस्यास्ति नित्याषोडशिकार्णवः ।
सूत्रैश्चतुश्शतैर्युक्तः कश्चिद्भागो रसावहः ।
स च पञ्चपटल्यात्मा क्रमपञ्चकभासकः ।
पूजाप्रयोगो मुद्राश्च विद्याव्याप्तिर्जपस्तुतिः ॥
अवान्तरभिदास्सन्ति कतिचित्तत्र तत्र च ।
प्रधानशेषगण्यत्वान्न च गण्याः पृथक्पृथक् ॥
अधीत्य चाचार्यमुखाच्छास्त्रं विद्यापुरस्सरम् ।
गुरूणां न्यवसत् पार्श्वे शिवानन्दमहामुनिः ॥
कालेन महता सोऽयं गुरुभिः करुणोत्तमैः ।
स्थापितोऽनुग्रहविधौ साभिषेकं सहाभिधम् ॥
ततस्सम्पादयामास शिष्यानाचारभूषितान् ।
देशकालविशेषज्ञान् भक्तिरत्नमहोदधीन् ॥
पुनश्शिवानन्दमुनिः शिष्यैरभ्यर्थितो भृशम् ।
सम्यग्वृत्तिविधानाय गभीरागमभाषया ॥
लोपामुद्राक्रमायातं सम्प्रदायादयं पुनः ।
अकरोदागमस्यास्य व्याख्यामृजुविमर्शिनीम् ॥
ग्रन्थास्सहस्रात्त्रिशतं विंशतिश्चैव पञ्च च ।
मधुरोदारसन्दर्भा सेयम् ऋजुविमर्शिनी ॥

सौभाग्यविषया वाणी सौमत्योदयदायिनी ।
सौगत्याप्तिमहापद्या सौस्थित्यं लभतामसौ ॥

ततः पञ्चदशतिथ्यात्मकळानामधेयोपन्यासेन मुखेन परां व्यापिकां सर्वतिथिमयीमक्षयां षोडशीनित्यकळां परामृतस्यन्दिनीं महात्रिपुरसुन्दरीसंज्ञां व्याचष्टे परदेशिको महादेवः ।

* * * *

लौकिकवैदिकतान्त्रिकेतिहासपुराणदर्शनसारभूतामाणवशाक्तशाम्भवात्ममन्त्रकोटिजननीमकृत्रिमामहम्परामर्शमयीममृतां भगवतीं व्याचष्टे । अथ ग्रन्थो व्याख्यायते—

गणेशेत्यादि । रूपिणीमितिपदं गणेशादिभिः पञ्चभिः पदैस्सम्बध्यते । तद्रूपिणीमिति । पूर्वार्धेन प्रपञ्चात्मता कथ्यते । उत्तरार्धेन निजमस्यास्स्वरूपम् ।

End:

जीवन्नेव विमुक्तोऽसौ यस्येयं भासना सदा ।
यश्शिवं भावयेन्नित्यं न कालः कलयेदिति ॥

आम्नातनित्या कदाचित्सम्भावनां प्रत्ययविषयतां भजन्तीति शिवम् ॥

Colophon:

एवम् ऋजुविमर्शिन्या नित्याषोडशिकार्णवे ।
शिवानन्दपरामृष्टं पञ्चमं पटलं गतम् ॥

एवं प्रकल्पितं मातस्त्वद्भक्त्युद्रेकतो मया ।
समञ्जसं वेतरथा तत्ते सोढव्यमम्ब हे ॥

प्रसृता भारती ज्योत्स्ना शिवानन्देन्दुमण्डलात् ।
कुदेशिकमहाधर्मसन्तृप्तैस्सेव्यतां चिरम् ॥

इति परमरहस्यं प्राप्तसत्सम्प्रदायं स्फुटविवृतिविलासं प्रोन्मिषच्चक्रराजम् ।
निपुणमतिनिषेव्यम् . . . . ॥

No. **5623.** चतुश्शतीव्याख्या—ऋजुविमर्शिनी.

CATUŚŚATĪVYĀKHYĀ : ṚJUVIMARŚINĪ.

Pages, 66. Lines, 25 on a page.

Begins on fol. 156*b* of the MS. described under No. 5616.

Complete.

Same work as the above.

No. **5624.** चन्द्रज्ञानागमसङ्ग्रहः.

CANDRAJÑĀNĀGAMASAṄGRAHAḤ.

Pages, 106. Lines, 14 on a page.

Begins on fol. 1*a* of the MS. described under No. 4370.

Paṭalas 1 to 15 complete.

A work dealing with the details of Śakti worship.

The subjects treated of in these Paṭalas or chapters are given below :—

पटलसङ्ख्या.	विषयाः.
(१)	षडाम्नायलक्षणम्.
(२)	पीठलक्षणम्.
(३)	श्रीचक्रलक्षणम्.
(४)	श्रीचक्रान्तरालदेवताप्रतिपादनम्.
(५)	श्रीविद्योपासनाप्रशंसा.
(६)	श्रीविद्यासन्ध्यानुष्ठानम्.
(७)	श्रीविद्यान्यासः.
(८)	श्रीविद्याजपकल्पः.
(९)	पूजादेशकालनिरूपणम्.
(१०)	चक्राराधनफलम्.
(११, १२)	शक्तिपूजाफलम्.

पटलसङ्ख्या.	विषयाः.
(१३)	रहस्यशाक्तसमयदीक्षाविधिः.
(१४)	दीक्षाविधिः.
(१५)	मन्त्रार्थप्रतिपादनम्.

Beginning:

अथातः संप्रवक्ष्यामि त्रिपुराण्डस्य लक्षणम् ।
यदुक्तं पूर्वमस्तीति शाक्तमण्डं हिरण्मयम् ॥
अस्ति बालार्ककोट्याभत्रिपुराण्डहिरण्मयम् ।
रथाकारं महद्दिव्यं विमानान्ते तु संस्थितम् ॥
उद्धृतं योजनानान्तु लक्षकोटिभिरावृतम् ।
विंशत्सहस्रकोटीभिर्विमानाण्डं कुळेश्वरि ॥

End:

तस्मिन् प्रीते महादेवि श्रीविद्योपासके गुरौ ।
त्वत्प्रीत्या तस्य देवेशि सुलभास्सिद्धयोऽखिलाः ॥
तस्माद्यः प्रीणयेन्नित्यं येन केनाप्युपायतः ।
विद्यामन्त्ररहस्यज्ञसंयोगान्मुक्तिमाप्नुयात् ॥

Colophon:

इति चन्द्रज्ञानागमसङ्ग्रहे रहस्ये मन्त्रार्थप्रतिपादनं नाम पञ्चदशः पटलः ॥

No. **5625.** चन्द्रज्ञानागमसङ्ग्रहः.

CANDRAJÑĀNĀGAMASAṄGRAHAḤ.

Pages, 80. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 435.

Contains the Paṭalas 3 to 7 and 12 to 15 only.

Same work as the above.

No. 5626. जीवचक्रनिरूपणम्.

JĪVACAKRANIRŪPAṆAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 21*a* of the MS. described under No. 5585

Incomplete. On the Jīva-cakra.

Beginning:

श्रीं ह्रीं क्लीं अमृतरसनाय नमः—इति पीठमभ्यर्च्य, अथ चतुर्दिक्षु द्वारपूजां कुर्यात् । . . . . चर्यानाथां सायुधायोड्याणपीठाय नमः—हृदये । मित्रीशानन्दनाथां सायुधाय कामगिरिपीठाय नमः ।

End:

इति श्रीशिवैक्यमिथुनं कृत्वा, स्वयमक्षुब्धस्तस्या योनेः कुण्डगोळात् भगामृतं वामामृतेन प्रक्षाल्य, श्रीपात्रे दत्वा, निश्शङ्को भूत्वा, चक्रपूर्वभूतं देवतागणं सन्तर्प्य, पूर्वमेव शिवैक्यं पात्रं पिबेत् ।

निश्शङ्केनैव मनसा परानन्दपरां सुधाम् ।
लवोत्तीर्णेन भावेन स्वीकुर्यात्पूर्वसिद्धया ॥

शङ्कया जायते प्राणी शङ्कैका दुःखभोजिनी ।
शङ्कया निर्गतं यान्ति तस्माच्छङ्कां परित्यजेत् ॥

No. 5627. ज्ञानार्णवः.

JÑĀNĀRṆAVAḤ.

Pages, 236. Lines, 15 on a page.

Begins on fol. 1*a* of the MS. described under No. 587.

One of the Āgamas relating to the Sāktēya religion. Contains the following Paṭalas:—

Beginning :

श्रीदेव्युवाच—

गणेशनन्दिचण्डीश सुरेन्द्रपरिवारित ।
जगद्वन्द्य कळाधीश किं त्वया जप्यते सदा ॥
अक्षमालेति किन्नाम संशयो मे हृदि स्थितः ।
शब्दातीतं परं ब्रह्म त्वमेव परमेश्वर ॥
कथयानन्दनिष्यन्दसान्द्रमानस निश्चयात् ।

ईश्वर उवाच—

कथयामि वरारोहे यन्मया जप्यते सदा ।
अकारादिक्षकारान्तमातृकावर्णरूपिणी ॥

चतुर्दशस्वरोपेता बिन्दुत्रयविभूषिता ।
अनुस्वारेण देवेशि बिन्दुनैकेन मण्डिता ॥
विसर्गेण च बिन्दुभ्यां संलग्नाभ्यां विराजिता ।

End:

शिवो यदि मृषावादी न गुरुर्दैवतं यदि ।
तदा मे शाम्भवीमार्गे हानिर्भवतु नान्यथा ॥
शास्त्रदृष्टं गुरोर्वाक्यं तृतीयं त्वात्मनिश्चयम् ।
त्रिविधं यो विजानाति न(स)मुक्तो भवबन्धनात् ॥

Colophon:

इति श्रीज्ञानार्णवे नित्यातन्त्रे उमामहेश्वरसंवादे श्रीगुरुवन्दनस्तोत्रं नाम षड्विंशः पटलः ॥

No. 5628. ज्ञानार्णवः.

JÑĀNĀRṆAVAḤ.

Pages, 182. Lines, 18 on a page.

Begins on fol. 138*a* of the MS. described under No. 5561.

Paṭalas 1 to 26 complete.

Same work as the above.

No. 5629. ज्ञानार्णवः.

JÑĀNĀRṆAVAḤ.

Substance, paper. Size, 12⅝ × 7¾ inches. Pages, 193. Lines, 26 on a page. Character, Telugu. Condition, good. Appearance old.

Begins on fol. 118*a*. The other works herein are Rasaratnākara 1*a*, Rēṇukātantra 85*a*, Yakṣiṇikalpa 88*b*.

Contains the Paṭalas 1 to 26 complete.

Same work as the above.

No. 5630. ज्ञानार्णवः.
JÑĀNĀRṆAVAḤ.

Substance, palm-leaf. Size, 15¼ × 1½ inches. Pages, 43. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Śivamantrasnānaprakāra 23*a*, Śivasandhyāvidhiprakāra 23*b*.

Begins in the course of the 13th Paṭala and breaks off in the 17th Paṭala.

Same work as the above.

No. 5631. ज्ञानार्णवः.
JÑĀNĀRṆAVAḤ.

Pages, 10. Lines, 6 on a page.

Begins on fol. 60*a* of the MS. described under No. 2040.

Mēdhādīkṣāprakaraṇa only.

Same work as the above.

No. 5632. तन्त्रराजम्.
TANTRARĀJAM.

Substance, paper. Size, 10⅝ × 8⅜ inches. Pages, 400. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, new.

Paṭalas 1 to 36.

One of the Āgamas relating to Śāktēya religion.

This is called also Ṣōḍaśanityātantram.

Beginning :

अनाद्यन्तोऽपराधीनः स्वाधीनभुवनत्रयः ।
जयत्यविरतो व्याप्तविश्वः कालो विनायकः ॥
भगवन् सर्वतन्त्राणि भवतोक्तानि मे पुरा ।
नित्यानां * षोडशानां च नव तन्त्राणि कृत्स्नशः ॥

---

* त्रैपुराणाम्—इति पाठान्तरम्.

*तासामन्योन्यसापेक्ष्याज्जायते मतिविभ्रमः ।
तस्मात्तु निरपेक्षं मे तन्त्रं तासां वद प्रभो ॥

* * * *

आद्ये मन्त्रावतारादिर्द्वितीये नाथमण्डलम् ।
नित्योद्धारस्तृतीये स्याल्ललितार्चा ततो द्वये ॥
नैमित्तिकं तथा काम्यमर्चनं षष्ठके भवेत् ।
कामेश्वरी सप्तमके परतो भगमालिनी ॥

* * * *

चतुस्त्रिंशेऽस्य नर्माणि पञ्चत्रिंशेऽस्य वासना ।
षट्त्रिंशे स्वात्मकथनमध्यायास्तत्त्वविग्रहाः ॥

End:

यस्तन्त्रमेतत्सकलं नित्या विद्यास्तु षोडश ।
शक्त्या सङ्गृह्य विधिवद्भजते स मदंशकः ॥
शिवतत्त्वमयी व्याप्तिरिति सम्यक्समीरिता ।
अस्या निपालनाच्चित्ते तत्त्वं स्वस्वात्मसात्कृतम् ॥

Colophon:

इति षोडशनित्यातन्त्रे श्रीकादिमते षट्त्रिंशपटलः ॥

No. **5633.** तन्त्रराजम् (नित्याषोडशिकातन्त्रम्).

TANTRARĀJAM (NITYĀṢOḌAŚIKĀTANTRAM).

Pages, 202. Lines, 9 on a page.

Begins on fol. 37*a* of the MS. described under No. 1083.

Breaks off in the 33rd Paṭala.

Same work as the above.

---

* तेषाम्—इति पाठान्तरम्.

No. 5634. तन्त्रराजम्.

TANTRARĀJAM.

Pages, 32. Lines, 24 on a page.

Begins on fol. 162*b* of the MS. described under No. 5507.

Breaks off in the 3rd Paṭala.

Same work as the above.

No. 5635. तन्त्रराजव्याख्या—मनोरमा.

TANTRARĀJAVYĀKHYĀ: MANŌRAMĀ.

Substance, paper. Size, $12\frac{3}{8} \times 7\frac{7}{8}$ inches. Pages, 339. Lines, 24 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 134*a*. The other work herein is Mahāsvacchandasārasaṅgraha 1*a*.

Commentary on Paṭalas 1 to 22, but the index is for the whole work. The subject-matter of the various Paṭalas is given below :—

पटलसङ्ख्या.	विषयाः.
१.	तन्त्रावतारादिप्रकाशनम्.
२.	नवनाथवैभवपूजाविधानादिप्रकाशनम्.
३.	विद्यास्वरूपप्रकाशनम्.
४.	ललितानित्यानित्यसपर्याक्रमप्रकाशनम्.
५.	ललितानित्यार्चनक्रमादिप्रकाशनम्.
६.	षोडशनित्यानैमित्तिककाम्यार्चनप्रकाशनम्.
७.	कामेश्वरीनित्याभिधानप्रकाशनम्.
८.	भगमालिनीनित्याविद्याविधानप्रकाशनम्.
९.	नित्यक्लिन्नानित्याविद्याविधानप्रकाशनम्.
१०.	भेरुण्डानित्याविद्याविधानप्रकाशनम्.

पटलसङ्ख्या.	विषयाः.
११.	वह्निवासिनीनित्याविद्याविधानप्रकाशनम्.
१२.	महावज्रेश्वरीनित्याविद्याविधानप्रकाशनम्.
१३.	शिवदूतीनित्याविद्याविधानप्रकाशनम्.
१४.	त्वरितानित्याविद्याविधानप्रकाशनम्.
१५.	कुलसुन्दरीनित्याविद्याविधानप्रकाशनम्.
१६.	नित्यानित्याविद्याविधानप्रकाशनम्.
१७	नीलपताकानित्याविद्याविधानप्रकाशनम्.
१८.	विजयानित्याविद्याविधानप्रकाशनम्.
१९.	सर्वमङ्गलानित्याविद्याविधानप्रकाशनम्.
२०.	ज्वालामालिनीनित्याविद्याविधानप्रकाशनम्.
२१.	चित्रानित्याविद्याविधानप्रकाशनम्.
२२.	षोडशनित्याबलिदेवनारूपकुरुकुल्लाविद्याविधानप्रकाशनम्.

A commentary on Tantrarāja: by Subhagānandanātha.

Beginning:

अनाद्यन्तोऽपराधीनस्स्वाधीनभुवनत्रयः ।
जयत्यविरतो व्याप्तविश्वः कालो विनायकः ॥

आद्यश्लोकेनैतत्प्रबन्धवाक्यार्थगर्भविनायकस्तुतिः क्रियते । तत्र अनाद्यन्तः कालस्याद्यन्तरहितत्वात् अपराधीनः इतरप्रेरणाविधुरः स्वाधीनभुवनत्रयः स्वायत्तज्ञानज्ञातृज्ञेयात्मकभुवनत्रयः जयति विश्वोत्कृष्टो भवतीत्यर्थः । अविरतः कालस्य सन्तन्यमानत्वात् । व्याप्तविश्वः देशरूपाभ्यामनवच्छिन्नत्वात् । काल इति विशेषणस्य नाम । विनायकः विघ्नेश्वरो विगतनायक इति च । एतद्यु(दु)क्तं भवति—एवमुक्तः कालरूपो विनायकस्सर्वोत्कृष्टो भवतीति, तथाविधो विगतनायकः कालो विश्वोत्कृष्टो भवतीति च । तेन कालस्वरूपपरमार्थाया ललितानित्याया विश्वमयत्वं साधकानां तादात्म्यञ्च प्रबन्धवाक्यार्थत्वेनार्थेऽत्र सूचितमित्युप-

दिशन्ति पूज्यपादाः । अथ भगवन्नित्यादिभिः व्रजेच्च मामित्यन्तैः सप्तभिः श्लोकैस्तन्त्रावतारक्रममुपदिशति । तत्र सर्वतन्त्राणि नित्याषोडशिकार्णवोक्तचतुष्षष्टिमुखानि तन्त्राणि ।

End:

एवं प्रोक्तरूपतः ते इति देवीं निर्दिशति । येन ललिताविग्रहवत्त्वकारणेन । ततः कारणात् ॥

Colophon:

इति श्रीषोडशनित्यातन्त्रेषु श्रीकादिमताख्यस्य परिपूर्णस्य तन्त्रस्य प्रपञ्चसारसिंहराजप्रकाशाभिधानेन सुभगानन्दनाथेन विरचितायां मनोरमाख्यायां व्याख्यायां षोडशनित्याबालिदेवतारूपकुरुकुल्लाविद्याविधानप्रकाशनपरं द्वाविंशं पटलं परिमूर्णं परामृष्टम् ॥

द्वादशोक्तानि मन्त्राणि द्वाविंशे व्याक्रिया गताः ।
ग्रन्थास्स्युस्सार्धपादैकचत्वारिंशच्छतद्वयम् ॥

No. 5636. तन्त्रराजव्याख्या—मनोरमा.

TANTRARĀJAVYĀKHYĀ: MANŌRAMĀ.

Pages, 123. Lines, 14 on a page.

Begins on fol. 211*a* of the MSS. described under No. 5617.
Commentary on Paṭalas 1 to 22.
Same work as the above.

No. 5637. तन्त्रराजव्याख्या—मनोरमा.

TANTRARĀJAVYĀKHYĀ: MANŌRAMĀ.

Substance, paper. Size, $10\frac{1}{8} \times 7\frac{5}{8}$ inches. Pages, 381. Lines, 12 on a page. Character, Telugu. Condition, good. Appearance, new.

Breaks off in the 20th Paṭala.
Same work as the above.

No. 5638. तन्त्रराजव्याख्या.
TANTRARĀJAVYĀKHYĀ.

Substance, paper. Size, $9\frac{3}{8} \times 7\frac{1}{2}$ inches. Pages, 274. Lines, 17 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 60*a*. The other work herein is Varivasyārahasya (with commentary) 1*a*.

3 Nidhis out of 9 are complete.

A different commentary on the Tantrarāja: by Śivarāmaprakāśa.

Beginning:

तद्धामाधिजयत्यनन्तविभवं यत्तारकव्याहृति-
प्रासादार्कगजाङ्कवर्णविजया देव्यात्मवाक्य(।)त्मताम् ।
गायत्री ललितात्मतां च विलसद्बिन्दुत्रयीविग्रहं
भक्तीच्छावशतः प्रयाति सकलातीतं जगद्विग्रहम् ॥
तन्त्रराजरहस्यार्थास(र्थ सं)ग्रहेद(ण)प्रकाशतः ।
याधिगम्याकरोत्सूत्रं तां वन्दे बिन्दुसुन्दरीम् ॥
नानैरा(थैका)गमतन्मताह्निकमहाविस्तारशङ्कातमो-
व्याप्तं स्वान्तशिवोपसत्तिमिरमक्लेशाकुलानां सताम् ।
विद्योपास्तिसुखानुभूतिसुगमोपायाय सङ्ग्रथ्यते
तादृकादिमतार्थसन्ततिरिह श्रीमत्प्रकाशात्मना ॥
स्वतन्त्रतन्त्रिसम्प्रोक्तविद्योपास्तिमहानिधिः ।
प्रकाशमागतोऽनन्तपुण्याय सुभगोदयः ॥
प्रतिष्ठानिधिराद्योऽत्र नाथपूजानिधिः परः ।
विद्यानित्यक्रमनिधिः सङ्क्षेपार्चानिधिव्य(स्त्व)यम् ॥
महाचक्र * निधि श्चात्तविग्रहात्मा निधिस्ततः ।
नैमित्तिकनिधिः पूर्णाभिषेकाख्यः प्रकीर्णकः ॥

---

* गति इति पाठान्तरम्.

नवोपनिधयो ह्यत्र विद्योपास्तिमहानिधौ ।
विद्योद्धारस्तु नाथैकलभ्यत्वान्नेह कीर्त्यते ॥

गुरुशिष्यस्वरूपं च तत्सेवाचार एव च ।
राश्यादिशोधनं सर्वप्रतिष्ठाकाललक्षणम् ॥

यन्त्रप्रतिष्ठा वर्णानामोषध्यश्चक्रमेव च ।
मातृकाचक्रनिर्माणं प्राणविद्याविधिस्तथा ॥

सम्पुटादिस्वरूपं च मूर्तिस्थापनकर्म च ।
दक्षिणानिर्णयो दीक्षा विद्याप्राप्तिविधिस्तथा ॥

मन्त्रदोषपरीहारो मन्त्रार्थानां निरूपणम् ।
ततः प्रयोगौ क्रमतश्चक्रशिष्यप्रतिष्ठयोः ॥

विद्याप्राप्तिप्रयोगश्च निधावस्मिन्ननुक्रमात् ॥

इह खलु परमपुरुषार्थस्य अविद्यानिवृत्त्यधीनत्वात्तन्निवृत्तेश्च विद्योपास्त्यायत्तत्वात्तस्याश्च सुन्दरीहृदयादिनानातन्त्रोपदिष्टत्वेऽपि कादिमतस्वतन्त्रतन्त्रराजपूर्णतन्त्ररूपनामचतुष्टयवाच्यैतत्तन्त्रे—

भगवन् सर्वतन्त्राणि भवतोक्तानि मे पुरा ।
नित्यानां षोडशानां च नव तन्त्राणि कृत्स्नशः ॥

तेषामन्योन्यसापेक्ष्याज्जायते मतिविभ्रमः ।
तस्मात्तु निरपेक्षं मे तन्त्रं तासां वद प्रभो ॥

शृणु कादिमतं तन्त्रं पूर्णमन्यानपेक्षया ।

इति देवीदेवप्रश्नोत्तराभ्यामनन्यानपेक्षनिर्वहणानुष्ठानबोधके तत्तन्त्रोपदिष्टप्रकारविद्योपास्तिरेव परमपुरुषावाप्तिनिश्चितोपायत्वात्तादृशविद्योपास्तेः प्रतिष्ठाधिकारिकर्तृकत्वात्तत्प्रातिष्ठायाश्च गुरुमूलकत्वात्तद्विज्ञानाय तल्लक्षणं प्रथमं निरूप्यते ।

End:

कामपूर्णजकाराद्यश्रीपीठान्तर्निवासिनीम् ।
चतुराज्ञाकोशभूतां नौमि श्रीत्रिपुरामहम् ॥
इति द्वादशश्लोकैस्तु स्तुत्वा शान्तिं पठेदिति ।

Colophon:

इति श्रीविद्योपास्तिमहानिधिर्विद्याप्रकरणं नाम विद्यानिधिस्समाप्तः ॥

No. **5639.** तान्त्रिकसन्ध्याविधिः.

TĀNTRIKASANDHYĀVIDHIḤ.

Substance, palm-leaf. Size, 15½ × 1¼ inches. Pages, 3. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 73*a*. The other works herein are Vivāhagaurīmantra 1*a*, Rājagōpālamantra 2*a*, Jātavēdasamantra 4*a*, Dhūmavārāhīmantraprayōga 8*a*, Kirātavārāhīmantra 9*a*, Kirātavārāhīstōtra 10*a*, Rājarājēśvarībrahmavidyā 11*b*, Gāyatrīcakravidhāna 12*b*, Siddhagaṇapatimahāmantra 15*a*, Bhairavatantra 16*a*, Rājaśyāmalā 48*a*, Pañcavaktrahanumanmantra 51*a*, Mahāvidyāyantrarāja 55*a*, Vanadurgāmantra 56, Caṇḍikāmantra 57*a*, Mahāvidyā 58*a*.

Incomplete.

On the morning and evening prayers specially ordained for the worshippers of Śakti.

Beginning:

पूर्वोक्तैवङ्गुणाविशेषणविशिष्टायां शुभतिथौ वैदिकसन्ध्यावन्दनं कृत्वा तान्त्रिकसन्ध्यावन्दनमाचरेत् । ऐं क ५ आत्मतत्त्वाय स्वाहा । क्लीं ह ६ विद्यातत्त्वाय स्वाहा । सौः स ५ शिवतत्त्वाय स्वाहा । मूलेन प्राणानायम्य ।

End:

दीपकळानाथमयविष्णुदेवमयप्रभाकरदेवमयतेजोदेवमयमनोजदेवमय-कल्याणदेवमयरत्नदेवमयवासुदेवमयश्रीरामानन्दमय.

No. 5640. त्रिकूटरहस्यम्.

TRIKŪṬARAHASYAM.

Pages, 79. Lines, 22 on a page.

Begins on fol. 1*a* of the MS. described under No. 2961.

Paṭalas 1 to 32.

A portion of Rudrayāmāḷa. It deals with the Mantras to be uttered in connection with the worship of Śakti.

Beginning:

श्रीदेव्युवाच—

* * * *

इदानीं श्रोतुमिच्छामि रहस्यं त्वन्निवेदितम् ॥
मन्त्रराजं परं तत्त्वं वद शीघ्रं दयानिधे ।

श्रीभैरव उवाच—

शृणु देवि प्रवक्ष्यामि रहस्यं सर्वकामिकम् ।
श्रीविद्यायाः परं तत्त्वं तन्त्रमन्त्रैकसागरम् ॥

* * * *

तन्त्रेऽस्मिन् ते समासेन वक्ष्यामि शृणु सादरम् ॥
श्रीमन्त्रोद्धारपटलस्त्रिकूटे निर्णयोऽपरः ।
पुरश्चर्याविधिश्चैव कुलाचारविधिस्ततः ॥
नित्या(त्यं) कामेश्वरस्यापि मन्त्रोद्धारविनिर्णयः ।
नित्यपूजाविधिश्चैवमुपरागार्चनं तथा ॥
सूर्यस्यैव तु चन्द्रस्य भूकम्पस्य महेश्वरि ।
चैत्रे मासि नवाद्यार्चा तथा चैवाश्वमाशि(वासि)नि ॥
कन्यासङ्क्रान्तिपूजा वै स्तम्भनादिविधिस्ततः ।
पञ्चरत्नेश्वरीविद्या दीपदानविधिस्ततः ॥
शक्तिपूजाविधिश्चेति पटलाष्षोडश स्मृताः ।

End:

इदं रहस्यं परमं भक्त्या तव मयोदितम् ।
सर्वस्वं मे शिवे तन्त्रं गोपनीयं स्वयोनिवत् ॥

Colophon:

इति श्रीरुद्रयामळतन्त्रे त्रिकूटरहस्ये मुक्तिसाधनकं नाम कवचं द्वात्रिंशः पटलः ॥

No. **5641.** त्रिकूटरहस्यम्.
TRIKŪṬARAHASYAM.

Pages, 56. Lines, 6 on a page.

Begins on fol. 38*a* of the MS. described under No. 5600.
Paṭalas 1 to 32.
Same work as the above.

No. **5642.** त्रिपुरसुन्दरीतन्त्रम्.
TRIPURASUNDARĪTANTRAM.

Pages, 200. Lines, 21 on a page.

Begins on fol. 1*a* of the MS. described under No. 5552.
1 to 101 Kalpas complete.
On the worship of Śakti as Tripurasundarī.

Beginning:

सर्वेश्वरीं जगद्धात्रीं जगदम्बां परावराम् ।
नमाम्यहं महादेवीं महात्रिपुरसुन्दरीम् ॥

श्रीपार्वत्युवाच—

भगवन् परमेशान देवदेव जगत्पते ।
त्वया प्रजप्यते को वा मन्त्रोऽभीष्टफलप्रदः ॥
देवता का त्वया नित्यं स्तुता भवति कामदा ।
का शीघ्राभीष्टदा नृणां सर्वपापप्रणाशिनी ॥

महाज्ञानप्रदा नित्यं का वाविद्याविनाशिनी ।
एतन्मे ब्रूहि देवेश यदि तेऽस्ति कृपा मयि ॥

श्रीदक्षिणामूर्तिरुवाच—

एक एव जगत्स्वामी देवः परशिवः स्वयम् ।
निर्गुणो निष्कळो नित्यः शुद्धो बुद्धो महेश्वरः ॥
तस्य शक्तिरियं साक्षाच्छक्तिः श्रीशाम्भवी स्मृता ।
त्रिपुरा नाम विज्ञेया तदभिन्ना जगन्मयी ॥
सैव त्रिजगतां माता वेददेवी महेश्वरी ।
महादेवी महाशक्तिरियं सर्वार्थसिद्धिदा ॥

End :

ध्यानप्रयोगयुतं(संयुक्तं) कल्पत्रितयमादरात् ।
ध्यानं करोति शृणुते स वाञ्छाफलमश्नुते ॥
वाग्वादिन्या ध्यानयोगं श्रुतं मत्तस्सुरेश्वरि ।
लोकानुग्रहकार्यार्थं किमन्यच्छ्रोतुमिच्छसि ॥

Colophon:

इति श्रीत्रिपुरसुन्दरीतन्त्रे सरस्वतीस्तोत्रबृन्दकथनं नाम एकशततमः कल्पः ॥

No. **5643.** त्रिपुरसुन्दरीतन्त्रम्.
TRIPURASUNDARĪTANTRAM.

Substance, paper. Size, $9\frac{1}{4} \times 7\frac{3}{4}$ inches. Pages, 101. Lines, 24 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 71*a*. The other works herein are Kālikāgama 1*a*, Triśatīstōtra 24*a*, Vanadurgākalpa 32*a*, Vārāhyaṣṭōttaraśata 121*b*, Mātaṅgikavaca 122*b*, Saṁhāracakranyāsa 124*b*, Ṣaṣṭicakranyāsa 128*b*, Śrīvidyānyāsadhyāna 131*a*, Bagalāmahālakṣmīkalpa 158*a*.

Kalpas 1 to 50 complete.

Same work as the above.

No. 5644. त्रिपुरसुन्दरीतन्त्रम्.
TRIPURASUNDARĪTANTRAM.

Pages, 47. Lines, 9 on a page.

Begins on fol. 142*a* of the MS. described under No. 124.

Kalpas 1 to 52.

Same work as the above.

No. 5645. त्रिपुरसुन्दरीतन्त्रम्.
TRIPURASUNDARĪTANTRAM.

Pages, 180. Lines, 20 on a page.

Begins on fol. 1*a* of the MS. described under No. 585.

Contains the Kalpas 1 to 60 complete, 61st incomplete.

Same work as the above.

No. 5646. त्रिपुरसुन्दरीतन्त्रम्.
TRIPURASUNDARĪTANTRAM.

Pages, 36. Lines, 22 on a page.

Begins on fol. 1*a* of the MS. described under No. 2334.

Begins with the 15th stanza of the 7th Kalpa and breaks off in the course of 15th Kalpa: from the 16th Kalpa to end of the 18th Kalpa.

Same work as the above.

No. 5647. त्रिपुरसुन्दरीतन्त्रम्.
TRIPURASUNDARĪTANTRAM.

Substance, palm-leaf. Size, $16\frac{7}{8} \times 1\frac{1}{8}$ inches. Pages, 104. Lines, 9 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Sandhyāpūjākrama 52*a*, Mantrapārāyaṇakrama 56*a*, Saundaryalaharīvyākhyā 58*a*.

Complete.

Same work as the above.

No. 5648. त्रिपुराकल्पः.
TRIPURĀKALPAḤ.

Pages, 186. Lines, 23 on a page.

Begins on fol. 1*a* of the MS. described under No. 5616.

One of the Śāktēya Āgamas: by Ādināthānanda.

Contains the following Paṭalas :—

१. मन्त्रोद्धारः.
२ अनुष्ठानविधिः.
३. चक्रपूजानिरूपणम्.
४. न्यासविधिः.
५. चक्रन्यासविधिः.
६. ध्यानविधिः.
७. आत्मपूजाविधिः.
८. आत्मपूजाविधिः.
९. पूजामण्टपदीक्षा.
१०. चक्रपूजाक्रमः.
११. षोडशारपूजा.
१२. नैवेद्यविधिः.
१३. पूजाप्रयोगः.
१४. पूजाद्रव्यनिरूपणम्.
१५. मुद्रानिरूपणम्.
१६. जपयज्ञविधिः.

Beginning:

ककारपार्थिवारूढं मायाबिन्दुसमन्वितम् ।
श्रीबीजमुद्धरेत्पश्चात्सकारसाविसर्गकम् ॥
चतुर्दशस्वरोपेतं तृ . . . . ।
लतेषुमङ्गलिन्यासमात्मरक्षाङ्गयोस्तथा ॥
पेताम्बुजासनं चैव कारयेन्मन्त्रवित्तमः ।
बीजत्रयसमायुक्तैस्स्वस्वबीजैः क्रमेण तु ॥
आसनादि प्रविन्यस्येद्वक्ष्यमाणानि सुन्दरि ।
बीजत्रयं प्रवक्ष्यामि सर्वमन्त्रसमन्वितम् ॥
बिन्दुनादसमायुक्तं द्वादशस्वरमुद्धरेत् ।
वाग्भवं प्रथमं बीजं द्वितीयं शृणु सुन्दरि ॥

End:

पृथ्व्या जलेन शिखिना मरुता नभेन
इन्द्रेण चन्द्रदिनक(मिहि)रेण च मूर्तिभाजः ।

देवस्य मन्मथरिपोरपि शक्तिमत्ता-
हेतुस्त्वमेव जननी सुरलोकपूज्ये ॥

*   *   *   *

Colophon:

इत्यादिनाथानन्दभैरवकृतायां(तोऽयं) त्रिपुराकल्पे त्रिपुराकल्पस्समाप्तः ॥ षोडशः पटलः ॥

No. 5649. त्रिपुराकल्पः.

TRIPURĀKALPAḤ.

Pages, 85. Lines, 11 on a page.

Begins on fol. 1*a* of the MS. described under No. 5617.

Paṭalas 1 to 16.

Wants three leaves in the beginning of the 1st Paṭala.

Same work as the above.

No. 5650. त्रिपुराकल्पः.

TRIPURĀKALPAḤ.

Substance, paper. Size, 9⅝ × 7½ inches. Pages, 158. Lines, 19 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Bagalāmālāmantra 81*a*, Bagalāpaddhati 83*b*.

The first ten Paṭalas complete; 11th incomplete.

Same work as the above.

No. 5651. त्रिपुरासारसमुच्चयः.

TRIPURĀSĀRASAMUCCAYAḤ.

Pages, 44. Lines, 26 on a page.

Begins on fol. 192*a* of the MS. described under No. 5616.

Complete in 10 Paṭalas.

On the daily worship of Śakti as Parvati: by Bhaṭṭanāga.

Beginning:

ऐं ह्रीं श्रीं सौः श्रीमहेश्वरतेजानन्दनाथसंविदम्बापादश्रीपादुकां पूजयामि ।

प्रह्वप्राचीनबर्हिःप्रमुखसुरवरानेककोटीरकोटि-
स्पष्टश्लिष्टेन्द्रनीलोपलमणिमधुपश्रेणिजुष्टं कृषीष्ट ।
श्रीपादाम्भोजयुग्मं नखमुखविलसद्रश्मिकिञ्जल्कपुञ्जं
शिञ्जन्मञ्जीरहंसीमुखरितमनिशं मङ्गळं वो भवान्याः ॥

भक्त्या गुरोर्भवपयोनिधिसेतुहेतून् श्रीपादपद्मयुगळेन्दुकणान् प्रणम्य ।
लम्बोदरं च कथयामि गुरूपदिष्टमाराधनक्रममहं कुळनायिकायाः ॥

स्नात्वा यथाविधि विधौतकराननाङ्घ्रिराचम्य सम्यगमलाम्बरयज्ञसूत्रः ।
प्रागाननो धनददिग्वदनोऽथ वापि बद्धासनो गणपतिं च गुरुं च नत्वा ।
[सूक्ष्मे ।
संयोज्य जीवमद(थ)दुर्गममध्यनाडीमार्गेन(ण)खाब्जगशशिस्थशिवे सु-
हंसेन देहममरेन्द्रपुरोगतेन सार्धेन्दुना हसितसाचि दधीत बुद्ध्या ॥

End:

स्मरान् पत्रेष्वेतत्सुषिरविवरान्तः परिलिखेत्
जगत्यस्मिन्यन्त्वं प्रथितमिह पिण्डामृतमतिः ।
जनस्यैतद्यन्त्रं वरकनकपट्टेन पिहितं
जगत्सर्वं शश्वद्भवति वशवर्तीह वहतः ॥

Colophon:

इति श्रीभट्टनागविरचिते त्रिपुरासारसमुच्चये दशमः प्रटलः ॥
त्रिपुरासारसमुच्चयं मूलं सम्पूर्णम् ॥

No. **5652.** त्रिपुरासारसमुच्चयः·
TRIPURĀSĀRASAMUCCAYAḤ.

Pages, 22. Lines, 12 on a page.

Begins on fol. 96*a* of the MS. described under No. 5617.

Complete.

Same work as the above.

No. **5653.** त्रिपुरासारसमुच्चयव्याख्या—सम्प्रदायदीपिका.
TRIPURĀSĀRASAMUCCAYAVYĀKHYĀ : SAMPRADĀYADĪPIKĀ.

Pages, 57. Lines, 24 on a page.

Begins on fol. 214*b* of the MS. described under No. 5616.

Complete in 10 Paṭalas.

A commentary on the Tripurāsārasamuccaya of Bhaṭṭanāga.

Beginning :

ऐं ह्रीं श्रीं महेश्वरतेजानन्दनाथसंविदम्बापादश्रीपादुकां पूजयामि ।

जयत्येषा गणेशस्य पादपङ्कजयोर्नतिः ।
या विघ्ननिवहं दूरान्निरस्यति पदेपदे ॥

भट्टनागविरचितस्य त्रिपुरासारसमुच्चयस्य व्याख्या रच्यते—

तत्राचार्यः प्रारिप्सितग्रन्थस्याविघ्नपरिसमाप्त्यर्थं मन्त्राधिकारिणामभ्युदयनिश्श्रेयसार्थं च तदुपायभूतदेवतास्तुतिपुरस्सरमाशीर्लक्षणं मङ्गळमाशास्ति(सते)—प्रह्वप्राचीनेत्यादि । प्राचीनबर्हिरिन्द्रः । कोटीरं मकुटम् । मञ्जीरं नूपुरम् । कुळनायिका आधाराधिष्ठात्री । जीवं जीवात्मानम् । मध्यनाडी सुषुम्ना । खाब्जगशशिस्थशिवे इति । सूक्ष्मे द्वादशान्तस्थसहस्रारसरसिजमध्यवर्तिनि सोमात्मकपरमशिवगुरुशिवात्मनि ।

End :

शाड्वलपल्लवैर्दूर्वादळैराघारेण घृतेन । सिद्धार्थैस्सितसर्षपैः हरिरिपुकुसुमै रक्तकरवीरकुसुमैः । कासमर्दैः "पोरिम्पु" इति द्राविडाः । किङ्कातैः

कुरण्डैः च(छ)गलाङ्गजमांसलेशेन अजमांसेन । नग्नजिदस्थिकार्पासबीजम् । नीलाम्भोजैर्नलिनोत्पलैः । स(सौ)गन्धिकैः कल्हारैः । कङ्कोळिकुसुमैरशोकपुष्पैः । स्पष्टमन्यत् ॥

Colophon :

इति सम्प्रदायदीपिकायां दशमः पटलः ॥

No. **5654.** त्रिपुरासारसमुच्चयव्याख्या–संप्रदायदीपिका.

TRIPURĀSĀRASAMUCCAYAVYĀKHYĀ : SAṀPRADĀYADĪPIKĀ.

Pages, 27. Lines, 12 on a page.

Begins on fol. 107*b* of the MS. described under No. 5617.

Complete.

Same work as the above.

No. **5655.** त्रिपुरासिद्धान्तः.

TRIPURĀSIDDHĀNTAḤ.

Pages, 6. Lines, 8 on a page.

Begins on fol. 17*a* of the MS. described under No. 514.

Contains the first Adhyāya called Śāktasiddhānta.

On some of the accepted doctrines and conclusions in connection with the worship of Śakti as the goddess Tripurā.

This manuscript is said to have been transcribed by one Tryambaka.

Beginning :

वन्दे गुरुपदद्वन्द्वमवाङ्मनसगोचरम् ।
रक्तशुक्लप्रभामिश्रमतर्क्यं त्रैपुरं महः ॥

श्रीदेव्युवाच—

देवेश श्रोतुमिच्छामि रहस्यातिरहस्यकम् ।
यन्मन्त्रं देवतायाश्च कथयस्व महेश्वर ॥

श्रीसदाशिव उवाच—

साधु साधु महाप्राज्ञे सर्वमन्त्रेषु पार्वति ।
यन्मां पृच्छसि तत्त्वार्थमशेषं प्रवदाम्यहम् ॥
भुवि श्रेष्ठं महासौख्यं पुरुषार्थप्रदं शुभम् ।
त्रिपुरायाश्च यन्मन्त्रं नातः परतरं महत् ॥
त्रिपुराख्येति सुखदा देवता सा महामता ।
ककारादिगुहान्तं च विद्या पञ्चदशाक्षरी ॥

End:

ऊर्ध्वाम्नाये च संप्राप्ते यावद्दीक्षान्तषोडशी ।
कुळाचारस्स विज्ञेयः पिबेद्दक्षिणपाणिना ॥
श्रीगुरुज्येष्ठपूज्यानां पुरतः कुलनायिके ।
नोपविश्य पिबेद्द्रव्यमित्याज्ञा पारमेश्वरी ॥
शैवशाक्तादिमन्त्राणां षड्बीजं सर्वजीवनम् ।
विना षड्बीजमन्त्राणां शववच्च परित्यजेत् ॥

Colophon:

इति श्रीविद्यायां त्रैपुरसिद्धान्ते उमामहेश्वरसंवादे शाक्तसिद्धान्तो नाम प्रथमोऽध्यायः ॥

No. 5656. दीक्षाक्रमः.
DĪKṢĀKRAMAḤ.

Pages, 17. Lines, 6 on a page.

Begins on fol. 151*a* of the MS. described under No. 5452.

Complete.

On the ceremony of initiation intended to fit one for the worship of Śakti.

Beginning:

शृणु देवि प्रवक्ष्यामि दीक्षां सादिकसंज्ञिकाम् ।
गुह्याद्गुह्यतरं भक्त्या शुद्धेन मनसा सह ॥

स्नात्वा गुरुं शुचिर्भूत्वा सन्ध्याविधिमुपास्य च ।
सुपूर्णमण्टपं गत्वा द्वारपालान् समर्च्य च ॥
नव नाथांश्च संपूज्य प्राणायामं समाचरेत् ॥
मूलमन्त्रं च सङ्कल्प्य ध्यानश्लोकं जपेत्तथा ।

End:

हः ऐं ऐं सौः सौः क्लीं क्लीं क्लीं श्रीं श्रीं श्रीं तत्त्वमसि स्वाहा–षण्णवतितत्त्वात्मकचिदानन्दाय ते नमः ।

जाग्रत्स्वप्नसुषुप्तितुर्यपरमानन्दोद्भवं वाग्भवं
सत्त्वं राजसतामसं गुणपरं श्रीकामराजोद्भवम् ।
कर्मज्ञानजमिन्द्रियात्परतरं सा शक्तिबीजोद्भवं
वन्देऽहं त्रिपुरात् परं परतरं श्रीकामराजेश्वरीम् ॥

No. 5657. दीक्षाविधानम्.

DĪKṢĀVIDHĀNAM.

Pages, 31. Lines, 8 on a page.

Begins on fol. 50*a* of the MS. described under No. 2848.

Complete.

Similar to the above.

Beginning:

ईश्वर उवाच—

अथ दीक्षां प्रवक्ष्यामि देवि संक्षेपतः शृणु ।
वेदाभ्यासैकनिरतं देवीभक्तिसमन्वितम् ॥
एवं प्रकाशितं शिष्यं विग्रहे गुरुपुङ्गवम्(:) ।
एवं दीक्षां गुरुस्सम्यक् चतुस्स्तम्भविराजिते ॥
मण्डपे वेदिकामध्ये भूपुरत्रयवेष्टिते ।
उपक्रमं ततः कुर्यात् वेदिकायां त्रिरेखया ॥

End :

शिष्यमाहूय दीक्षार्थं यथावत्प्रीयतां गुरुः ।
बल्युद्वासनकाले तु उच्छिष्टं देवि दीयताम् ॥
श्रीपात्रं बिन्दुमुद्धृत्य स्वात्मपात्रेण पूरयेत् ।
पूर्णाभिषेकसिद्ध्यर्थं दीपेन सह दीयताम् ॥

Colophon :

इति श्रीपरमानन्दतन्त्रे सपादलक्षग्रन्थे मन्त्रार्णवे उमामहेश्वरसंवादे आम्नायदीक्षाविधानं सम्पूर्णम् ॥

No. 5658. देवीदीक्षाविधानम्.
DĒVĪDĪKṢĀVIDHĀNAM.

Pages, 20. Lines, 7 on a page.

Begins on fol. 47*b* of the MS. described under No. 3472.

Contains the first seven Ullāsas.

Similar to the above.

Beginning :

अथ दीक्षां प्रवक्ष्यामि शृणु श्रुतिपुरस्सरम ।
बहिर्मातृकया पूर्वमन्तर्मातृकया तथा ॥
अजपामन्त्रशुद्धात्मा भूशुद्धिः प्रोक्षणादयः ।
शिवेन परिपक्कस्स्यादथ वा दिव्यमार्गकः ॥
एवं प्रकारं तं शिष्यं प्रग्रहेद्देशिकोत्तमः ।

End :

समयं च विशेषं च दीपतीर्थान्तमेव च ।
एवं दीक्षाविधिं सम्यक् साधयेत्साधकोत्तमः ॥
सम्पूजकानां परिपालकानां यतीन्द्रयोगीन्द्रतपोधनानाम् ।
देशस्य राष्ट्रस्य कुलस्य राज्ञः करोतु शान्तिं भगवान् कुलेशः ॥

Colophon :

इत्यूर्ध्वाम्नायमिश्रे अनुत्तरपरमरहस्ये ईश्वरस्कन्दसंवादे पूर्णदीक्षाविधानं नाम सप्तमोल्लासः ॥

No. 5659. देवीपूजाविधानम्.

DĒVĪPŪJĀVIDHĀNAM.

Pages, 24. Lines, 5 on a page.

Begins on fol. 118*a* of the MS. described under No. 537. Complete.

On the conduct of the worship of Śakti as Dēvī.

Beginning:

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ सम्भावितद्रव्यैः श्रीमहात्रिपुरसुन्दरीप्रीत्यर्थं त्रिपुरसुन्दरीपूजां करिष्ये--इति सङ्कल्प्य, ओं.

निलयं यान्तु ते सर्वे ये मां हिंसन्ति हिंसकाः ।
मृत्युरोगभयक्लेशाः पतेयुश्शत्रुमस्तके ॥

*　　*　　*　　*

इति शापविमोचनेन त्रिवारमभिमन्त्र्य, तत्रानन्दभैरव्यानन्दभैरवौ ध्यात्वा, पूजयित्वा हसक्षमलवरयूं सहक्षमलवरयूमानन्दभैरव्यानन्दभैरवौ पूजयामि नमस्तर्पयामि ।

End:

इति शिरःपादान्तं व्यापकं कृत्वा कश्चित्कालं निष्कळं ध्यायेत् । एवं स्नानादौ जपादौ होमादौ च कुर्यात् ॥

No. 5660. देवीपूजाविधानम्.

DĒVĪPŪJĀVIDHĀNAM.

Substance, palm-leaf. Size, $7\frac{3}{4} \times 1\frac{1}{8}$ inches. Pages, 49. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 84*a*. The other works herein are Sandhyāmantra 1*a* and 64*a*, Śivanāmāni 17*a*, Śatrumāraṇamantra 19*a*, Pratyaṅgirāmantra 22*a*, Bālātripurasundarīmantra 23*b*, Dēvīnavaratnamālikā 24*a*, Navaratnamudrikā 26*a*, Śarabhakavaca 29*a*, Śarabha-

mālāmantra 41 and 46*a*, Śarabhamantra 45*b*, Śarabhasāluva-mantra 49*a*, Śarabhapūjāvidhāna 54*b*, Rāmaṣaḍakṣarīmantra 57*a*, Pratāpāñjanēyamantra 58*a*, Pratāpahanūmanmālāmantra 62*a*, Kāṭṭērimantra 68*a*, Dēvīstōtra 69*a*, Pātravivaraṇa (with Telugu commentary) 70*a*, Bālāparamēśvarīmantra 71*a*, Pātrapūjā 72*b*, Gurumantra 75*a*. Śivapūjāvidhi 77*a*, Pradōṣapañcākṣarī 81*a*, Rāmamānasapūjāvidhi 109*a*, Kēśavanāmāni 121*a*.

Incomplete.

Similar to the above.

Beginning:

अथ कलशस्थापनम्—

स्वदक्षे वामे वा चतुरश्रवृत्तत्रिकोणमण्डलं कृत्वा, बालाया इति सम्पूज्य, वस्तुधारिण्यागमने चर्मानुवाकं जपन् ।

End:

अमोघायै नमः, सूक्ष्मायै नमः, आनन्दायै नमः, शान्त्यै नमः इति शक्तिचतुष्टयं वामकरस्थपात्रे सम्पूज्य कुम्भस्याच्छादनपात्रोपरि स्थापयेदिति कलशस्थापनविधिः.

No. 5661. देवीपूजाविधानम्.

DĒVĪPŪJĀVIDHĀNAM.

Substance, palm-leaf. Size, 16¾ × 1⅛ inches. Pages, 17. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, not old.

Begins on fol. 60*a*. The other works herein are Lalitāsahasranāman 1*a*, Lalitāsahasranāmāvalī 25*a*, Lalitāṣṭōttaraśata 39*a*, Lalitāṣṭōttaraśatanāmāvalī 41*a*, Bhuvanēśvaryaṣṭōttaraśata 43, Kirātavārāhīstōtra 45*a*, Indrākṣīstōtra 48*a*, Indrākṣīstōtramūlamantra 50*a*, Saubhāgyavidyēśvarīmantra 56*a*, Kirātavārāhīmantra 58*a*, Bagalāmukhīmantra 59*a*, Śītalāstōtra 65*a*, Annapūrṇēśvarīmantra 67*a*, Sarasvatīpūjā 68*a*, Sarasvatīstava 71*a*, Rājyalakṣmīstōtra 74*a*, Lalitāsahasranāman 76*a*, Sūryanamaskāramantra 85*a*, Sūryasahasranāman 86*a*, Sūryasahasranāman (different) 99*a*, Ādi-

tyakavaca 107*a*, Ādityahṛdaya 107*b*, Sūryastava 117*a*, Ādityahṛdayanyāsa 118*a*, Ādityahṛdaya (different) 119*a*, Sūryanamaskāramantra 121*a*, Ādityamālā 122*a*, Ādityakavaca (different) 123*a*, Sūryanamaskārārghyapradānamantra 125*a*, Basavāṣṭōttaraśatanāmāvali 134*a*, Vināyakapūjāvidhi 136*a*, Vināyakavratakalpa 139*a*, Gaṇapatyaṣṭōttaraśata 145*a*, Vighnēśvarastōtra 147*a*, Vighnēśvarāṣṭōttaraśatanāmāvali 148*a*, Sūryāṣṭōttaraśatanāmavalī 149*a*, Śarabhasāluvakavaca 151*a*, Vīrabhadrakavaca 153*a*, Aghōravīraśarabhasāluvakavaca 155*a*, Śarabhakavaca 157*a*, Śarabhasāluvapakṣirājakavaca 158*a*, Śarabhamālāmantra 166*a*, Bhairavakavaca 169*a*, Bhairavāṣṭōttaraśata 171*a*, Pādukāstava 173*a*, Mahāśivavīrabhayaṅkarastava 174*a*, Bētālastōtra 175*a*, Bētālamantra 175*b*, Bētālakavaca (different) 178*a*, Pañcamukhavīrahanūmanmantra 180*a*, Hanumatstōtra 183*b*, Hanumatstōtra (different) 184*a*, Hanumatstōtra (different) 185*a*, Hanumatmantra 186*a*, Rāmāṣṭōttara 187*a*, Kṛṣṇāṣṭōttara 187*b*, Rāmastōtra 189*a* Rāmastōtra (different) 190*a*, Viṣṇupañjara 191*a*, Vēṅkaṭeśvarāṣṭōttaraśata 192*a*, Lakṣmīnṛsiṁhapūjāvidhāna 195*a*, Aśvatthanārāyaṇastōtra 198*a*, Garuḍadhyāna 201*a*, Garuḍastōtra 202*a*, Navagrahastōtra 203*a*, Śanistōtra 204*a*, Sanistōtra (with pūjā) 205*a*, Mahānadīstōtra 208*a*, Sāvitrīstōtra 209*a*, Rajasvalāstōtra 210*a*, Punaścaraṇakrama 211*a*, Kēdāravratakalpa 212*a*, Varalakṣmīvratakalpa 213*a*, Bhairavadigbandhana 214*a*, Svarṇākarṣaṇabhairavamantra 217*a*, Cidambaramēlanakavacamantra 220*a*, Hariharāṣṭōttaraśata (with Nāmāvali) 223*a*, Vaikhānasasaptadaśanāman 223*a*, Vighnēśvarāṣṭōttaraśata (different) 227*a*.

Complete.

Similar to the above.

Beginning:

पुष्पाक्षतान् गृहीत्वा द्वारोर्ध्वे गं गणपतये नमः, द्वारशाखयोः दुं दुर्गायै नमः, वं वटुकभैरवाय नमः . . . .
अथास्य वामे षट्कोणान्तरगतत्रिकोणान्तर्गतबिन्दुबाह्यवृत्तचतुरश्रमण्डलं विलिख्य तत्राधारशक्तिभ्यो नम इति पूजयेत् ।

End:

आवाहनं न जानामि न जानामि विसर्जनम् ।
पूजाविधिं न जानामि क्षमस्व परमेश्वरि ॥
तृप्यन्तु मातरः सर्वाः सरुद्राः सगणाधिपाः ।
योगिन्यः क्षेत्रपालाश्च मम देहे व्यवस्थिताः ॥
शिवाद्यवनिपर्यन्तं ब्रह्मादिस्तम्बसंयुतम् ।
कालज्ञादिशिवान्तश्च जगज्जिज्ञानतृप्यतु ? ॥

No. **5662.** देवीमाहात्म्यरहस्यविधिः.
DEVĪMĀHĀTMYARAHASYAVIDHIḤ.

Pages, 40. Lines, 6 on a page.

Begins on fol. 104*a* of the MS. described under No. 5452. Complete.

Regarding the performance of certain rites connected with the worship of the goddess Śakti.

Beginning:

या ब्रह्मविष्णुशिववन्दितपादपद्मा
क्षेमङ्करी स्मरणतश्च शिवाप्रसादात् ।
मार्गे गृहे जलहुताशनशत्रुमध्ये
सा चण्डिका विपदि रक्षतु सर्वदा माम् ॥
देवीमाहात्म्यसारस्य सरहस्यस्य यो विधिः ।
श्रीगुरुभ्यो यथाज्ञातस्तं सर्वं च यथामति ॥
मार्कण्डेयोक्तया रीत्या लोकानुग्रहकाङ्क्षया ।
प्रवक्ष्यामि यथाशास्त्रं साधकाभीष्टसिद्धये ॥

श्रीमान् साधको रजनीतुर्ययामे विबुध्यावश्यकं कृत्वा हस्तौ पादौ प्रक्षाल्याचम्य सुखे आसने समुपविश्य स्वशिरसि श्वेतसहस्रारविन्दे गुरुचरणारविन्दे ध्यात्वा,

नमोऽस्तु गुरवे तस्मादिष्टदेवस्वरूपिणे ।
यस्य वागमृतं हन्ति विषं संसारसंज्ञकम् ॥

इति प्रणम्य ।

End:

अर्गळं कीलकं चादौ पठित्वा कवचं पठेत् ।
चण्डिकाहृदयं जप्त्वा पठेत्सप्तशतीं ततः ॥
अर्गळं सारजातस्य दरिद्रस्य तथार्गळम् ।
भविष्यतीति निश्चित्य शिवेन रचितं पुरा ॥

ज्योतिस्स्थले त्र्यम्बकलिखितम् ॥

No. **5663.** देवीविषयोपन्यासः.

DĒVĪVIṢAYŌPANYĀSAḤ.

Pages, 8. Lines, 16 on a page.

Begins on fol. 112*a* of the MS. described under No. 421.

Incomplete.

A dissertation on various matters connected with the worship of Śakti.

Beginning:

सृष्टिस्थितिभ्यां संज्ञेयमृषिरित्यभिधीयते ।
पकारो(रः) पदसंज्ञश्च दकारश्चाभिलाषकः ॥
पदाभिलाषसंज्ञेयं मन्त्रसिद्धिरुदाहृता ।
बीजं कारणमर्थानां जगन्निर्माणरूपकम् ॥

इति सुन्दरीतापनीये सर्वकारणमित्यर्थः । नन्वनेकेषां मन्त्राणां वाग्भवबीजं कामराजबीजं तार्तीयबीजमित्यादि तेषां बीजसंज्ञत्वात् सर्वकारणत्वं सत्यम् ।

End:

तेजोमयेन सदनत्रयेण चरणत्रयेण तत्त्वत्रयेण भिदा त्रिविधा इति.

No. 5664. देवीसप्तपारायणक्रमः.

DĒVĪSAPTAPĀRĀYAṆAKRAMAḤ.

Substance, palm-leaf. Size, $15\frac{5}{8} \times 1\frac{3}{8}$ inches. Pages, 87. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Haṁsagamanakrama (Telugu language) 44.

Complete.

On the seven ways of contemplating the goddess Śakti.

Beginning:

त्रिविधं भजनं त्रिकालजं दिननित्याघटिकाक्षराण्यपि ।
अमुकं क्रममित्यजानतो ह्यतिदूरे खलु वादिसुन्दरि ॥

श्रीदेव्युवाच—

देवदेव महादेव भक्तानुग्रहकारक ।
सप्तपारायणस्तोत्रं वद मे करुणाकर ॥

ईश्वर उवाच—

शृणु देवि प्रवक्ष्यामि पारायणविधिं क्रमात् ।
जपेन सर्वकामांश्च परं मोक्षं च विन्दति ॥
बालान्यासं ततः कृत्वा मूलन्यासं समाचरेत् ।
अङ्गन्यासांस्तथा वक्ष्ये गणेशादींश्च षोडश ॥

End:

शक्तिविश्वेश्वरीं वन्दे देवीं त्रिपुरभैरवीम् ।

वर्गान्ते पठितव्यं स्यात् इति स्तुत्वा प्राणायामादिपूर्वकं कृतजपं देव्यै निवेद्य भ्रूमध्यात् ब्रह्मरन्ध्रे विसृजेत् ॥

Colophon:

इति नामपारायणविधिः ॥

No. 5665. द्वात्रिंशद्दीक्षाप्रयोगः.

DVĀTRIṀŚADDĪKṢĀPRAYŌGAḤ.

Substance, palm-leaf. (Śrītāla). Size, $14\frac{1}{8} \times 1\frac{7}{8}$ inches. Pages, 23. Lines, 11 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 4*b*. The other works herein are Paramānanda-tantra 1*a*, Bālāpaddhati 15*b*, Vanajāṅkōlaprayōga 18*a*.

Complete.

On the thirty-two different kinds of rites connected with the initiation into the religion of Śakti.

Beginning:

तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव ।
विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि ॥

* * * *

असाकं सहकुटुम्बानां क्षेमस्थैर्यवीर्यविजयायुरारोग्यैश्वर्याभिवृद्ध्यर्थं . . . . महात्रिपुरसुन्दरीप्रीत्यर्थं विशेषेणास्य शिष्यस्य द्वात्रिंशद्दीक्षासहितपूर्णाभिषेकाख्यं कर्म करिष्यमाणः तदादौ . . . . . पुण्याहवाचनं करिष्ये ।

End:

पश्चाच्छिष्यं समाहूय शुद्धविद्यां प्रकाशयेत् ॥

शुद्धविद्याम्बामन्त्रः . . . .

ध्यानम्—

महदमितविकासे मातृकादिव्यरूपे
सकलजनहृदिस्थे सर्वमन्त्रप्रकाशे ।
महदपि तव रूपं चिन्तयेद्यस्स मुक्तो
भगवति शुभविद्ये सुन्दरि त्वां नमामि ॥

मनुः—

ओं ऐं ईं औं शुद्धविद्याम्बाश्री + मि ।

No. 5666. नवरात्रकल्पः.
NAVARĀTRAKALPAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 81*a* of the MS. described under No. 235

Complete.

On the conduct of the worship of Śakti during the Dasara festival

Beginning:

श्रीपार्वत्युवाच—

त्रिपुरान्तक सर्वेश त्रिकालज्ञानसागर ।
नवरात्रपुरश्चर्याप्रयोगं वद शङ्कर ॥

ईश्वर उवाच—

शृणु देवि प्रवक्ष्यामि सुन्दरि प्राणवल्लभे ।
नवरात्रपुरश्चर्या महापातकनाशनं(नी) ॥

* * * *

शुक्लप्रतिपदारभ्य तन्नवम्यां समापयेत् ।
एकोत्तरस्य वृद्धिश्च तन्नवम्यां जपेत्सुधीः ॥

End:

शिवरूपो विष्णुरूपो देवीरूपो न संशयः ।
जीवन्मुक्तस्स पूतात्माकाशब्रह्ममयो भवेत् ॥

No. 5667. नवरात्रपूजाविधानन्.
NAVARĀTRAPŪJĀVIDHĀNAM.

Substance, palm-leaf. Size, 7⅓ × 1¼ inches. Pages, 59. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 20*a*. The other works herein are Caṇḍikāhṛdaya 1*a*, Saptaśatimantravidhāna 7*a*, Kātyāyanitantra 16*a*, Dēvimāhātmya 50*a*.

Complete.
Similar to the above.

Beginning:

नवरात्रनिर्णयः तत्र विश्वरूपनिबन्धे—

कलशस्थापनं कुर्यान्नन्दायामाश्विने सिते ।
पूजयेद्भक्तिभावेन चण्डिकां भक्तवत्सलाम् ॥

नन्दा प्रतिपत् । सा च परविद्धा ग्राह्या

* * * *

प्राणानायम्य . . शुभतिथौ ममाभीष्टसिद्ध्यर्थं महाकाली-महालक्ष्मीमहासरस्वतीप्रीत्यर्थमाश्वयुजमासे प्रतिपदमारभ्य तन्नवमीपर्यन्तं नवरूपसङ्ख्यया . . . . . नवरात्रप्रयुक्तसप्तशतीयागार्थमा-भ्युदयिकं कर्म करिष्यमाणः तदङ्गत्वेन स्वस्तिपुण्याहवाचनं करिष्य इति सङ्कल्प्य ।

End:

कस्तूरी कर्पूरं मालतीपुष्पं खर्जूरमुशीराः सर्वाणि द्रव्याणि मेळयित्वा होमः । तत आयुधपूजा ॥

Colophon:

इति नवरात्रपूजाविधिः ॥

No. **5668.** नित्योत्सवनिबन्धः.

NITYŌTSAVANIBANDHAḤ.

Substance, paper. Size, $9\frac{3}{8} \times 4\frac{1}{8}$ inches. Pages, 176. Lines, 9 on a page. Character, Dēvanāgarī. Condition, slightly injured. Appearance, old.

Contains only the 3rd Ullāsa entitled Yauvanōllāsa.

On the conduct of the various daily festivities connected with worship of the goddess Śakti: by Umānanda.

This manuscript is said to have been transcribed by one Śrīrunḍu Rāmagusāyi in the year 1898 of the era of Vikrama.

Beginning:

नत्वा श्रीभासुरानन्दनाथपादाम्बुजद्वयम् ।
युनक्त्युमानन्दनाथो यौवनोल्लासमद्भुतम् ॥
महात्रिपुरसुन्दर्या मतोऽत्र यजनक्रमः ।
कीर्त्यन्ते गणपत्यादिक्रमा यदुपजीविनः ॥
इह सप्त प्रकरणान्याह्निकेन सपर्यया ।
होममुद्रान्यासजपनैमित्तिकसमर्चनैः ॥

End:

तन्त्रान्तरोक्तेषु युगमन्वादिषु विशेषदिवसेष्वपि श्रीदेव्यर्चनमभ्युदयायैव । सूत्रकारेण काम्यहोमस्यैवोक्तत्वात्पूजानुक्तिरिति शिवम् ॥

इति यौवनोल्लासे नैमित्तिकप्रकरणम् ॥

यथामति मयाकारि सेयं श्रीक्रमपद्धतिः ।
भ्रमं प्रमादं स्खलितं क्षमयन्त्विह साधकै(का): ॥

Colophon:

इति श्रीभासुरानन्दनाथचरणारविन्दमिळिन्दायमानमानसेनोमानन्दनाथेन विरचिते कल्पानुसारिणि नित्योत्सवे निबन्धे यौवनोल्लासः तृतीयः संपूर्णः ॥

No. **5669.** न्यासजालम्.

NYĀSAJĀLAM.

Pages, 72. Lines, 9 on a page.

Begins on fol. 44*a* of the MS. described under No. 435.

Complete.

Regarding the ceremonial process of touching of the various parts of the body while reciting certain appropriate Mantras. The Mantras used herein relate to the worship of Śakti.

Beginning:

तत्र श्रीमान् साधकेन्द्रस्सन्ध्यावन्दनपूर्वकम् ।
ब्राह्मे मुहूर्ते उत्थाय शुद्धाचमनपूर्वकम् ॥
शुभासनं समास्थाय मनसा वा शुचिस्थितः ।
शिरस्थिते सहस्रारे ध्यायीत स्वगुरू ततः ॥

End:

अथ मूलेन ऋष्यादिकरषडङ्गन्यासं विधाय शिवोऽहमिति भावयन् वक्ष्यमाण[नं]क्षोभणादिनव मुद्राः पाशादिचतुर्मुद्राश्च बद्ध्वा सर्वावयवभावेन कामकळारूपमात्मानं ध्यात्वा, शक्त्युत्थापनमुद्रां बद्ध्वा, प्रातःस्मरणोक्तप्रकारेण कुण्डलिनीं समुत्थाप्य, तथैव षट्चक्रभेदक्रमेण ध्यायन्नन्तर्यागं विधाय, तत्तेजसा परिणतां हृदयकमलगतासिंहासने श्रीचक्रराजकामेश्वराङ्कस्थां सर्वाभरणसंयुक्तां त्रिखण्डमुद्रामुद्रितकरो ध्यायेत् ॥

Colophon:

इति न्यासजालं समाप्तम् ॥

No. 5670. परमानन्दतन्त्रम्.

PARAMĀNANDATANTRAM.

Substance, palm-leaf. Size, $14\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 10. Lines, 8 on a page. Character, Grantha. Condition, sligthly injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Śivastōtra 54*a*, Mudrālakṣaṇa 57*a*.

Udrēkas 5 and 16 complete.

One of the Āgamas relating to the Śāktēya religion.

Beginning:

ओम् करिष्यमाणस्य कर्मणः अविघ्नेन परिसमाप्त्यर्थं विघ्नेश्वरपूजां करिष्ये । पूजां कृत्वा तदेव लग्नं . . . श्रीमहात्रिपुरसुन्दरी-

प्रीत्यर्थं पूर्णाभिषेककर्माङ्गं हिरण्यरूपेणाभ्युदयं करिष्ये, तदङ्गं पुण्याहवाचनं च करिष्ये । अभ्युदयार्थं ब्राह्मणान्भोजयित्वा आशिषो वाचयित्वा—

त्रिरात्रं पञ्चरात्रं च त्रिरात्रं तु विशेषतः ।
यथाकल्पं यथादेशं तथा दीक्षां समाचरेत् ॥

तिस्रो मा दीक्षा तु स्या दिति श्रुतयः प्रमाणं सद्यो द्रक्ष्यन्तीति च ।

अथ दीक्षां प्रवक्ष्यामि देवि संक्षेपतः शृणु ।
वेदाभ्यासैकनिरतं देवीभक्तिसमन्वितम् ॥

एवंप्रकारं तं शिष्यं प्रग्रहेद्गुरुपुङ्गवः ।
कौलदीक्षां गुरुः सम्यक् चतुस्तम्भविराजिते ॥

मण्टपे वेदिकामध्ये भूपुरद्वयवेष्टितम् ।
उपक्रम्य ततः कुर्याद्वेदिकायां त्रिरेखया ॥

व्रीह्याद्याः(दि) पञ्चधान्यानि प्रग्रहेत्कुलनायिके ।
चतुर्दलं ततः कृत्वा मध्ये बिन्दुविराजितम् ॥

तन्मध्ये निक्षिपेत्कुम्भान् गन्धादिसमलङ्कृतान् ।

तद्यथा चतुःस्तम्भविराजितमण्टपवेदिकामध्ये सम्यग्गोमयेनावलिप्य रङ्गवल्ल्यादिभिरलङ्कृत्य मण्टपं पुष्पवितानाद्यैरलङ्कृत्य चतुर्दिक्षु दीपस्तम्भान् प्रतिष्ठाप्य गन्धादिद्रव्येण धूप्य तस्मिन् शुचिप्रदेशे रम्भापलाशानि परिस्तीर्य तदुपरि व्रीह्यादिपञ्चधान्यानि व्रीहितण्डुलमाषमुद्गतिलानुपर्युपरि स्थण्डिलं परिकल्प्य तदुपरि बिन्दुं विलिख्य ततः स्थण्डिलमभिमन्त्रयेत् । तद्यथा स्योना पृथिवि . . . . सप्रथाः इति भूमिं प्रार्थ्य—

श्रीपात्रबिन्दुमुद्धृत्य स्वात्मपात्रेण पूरयेत् ।
पूर्णाभिषेकसिद्ध्यर्थं दीपेन सह दीयताम् ॥

Colophon:

इति श्रीपरानन्दतन्त्रे सपादलक्षग्रन्थे मन्त्रखण्डे द्वितीयोपदेशे द्वात्रिंशद्दीक्षासप्ताम्नायदीक्षा नाम पञ्चमोद्रेकः ॥

अथ वक्ष्ये कुलेशानि पूर्णदीक्षाविधिं शृणु ।
पूर्णदीक्षाकरो लोके दुर्लभो गुरुपुङ्गवः ॥

अहमेव कुलेशानि गुरुरूपं समाश्रितः ।
षोडशद्वयदीक्षाभिर्युक्तः परमधार्मिकः ॥

त्यक्त्वा कर्मफलासक्तिं कुण्डलीध्यानमास्थितः ।
तं शिष्यं मानयेद्देवि मोक्षयिष्यामि जन्मतः ॥
वेदिकापञ्चकं कुर्यान्मध्यान्तं पर्वमादितः ।
चक्रस्य वामभागे तु दक्षिणेत्येकवेदिकाम् ॥

End:

पूर्णदीक्षाक्रमो देवि यस्य कस्यापि नोच्यते ।
द्वादशाब्दं गुरुः शिष्यं परीक्ष्य क्रम उच्यते ॥

पूर्णदीक्षाविधिः सम्यङ्मया ते संप्रकाशितः ।
समासेन वरारोहे किं भूयः श्रोतुमिच्छसि ॥

Colophon:

इति श्रीपरानन्दतन्त्रे सर्वागमोत्तमे सपादलक्षग्रन्थे मन्त्रखण्डे मोक्षद्वितियपादे द्वात्रिंशद्दीक्षासंपुटितसंक्षेपक्रमो नाम षोडशोद्रेकः ॥

No. 5671. परमानन्दतन्त्रम्.

PARAMĀNANDATANTRAM.

Pages, 21. Lines, 7 on a page.

Begins on fol. 66*a* of the MS. described under No. 2848.

18th Udrēka only.

Same work as the above.

Beginning:

अथ वक्ष्ये महादेवि पूर्णदीक्षाविधिं शृणु ।
पूर्णदीक्षाकरो लोके दुर्लभो गुरुपुङ्गवः ॥
अहमेव कुळेशानि गुरुरूपं समाश्रितः ।
षोडशद्वयदीक्षाभिः पूतः परमधार्मिकः ॥
नित्यकर्मफलासक्तिं कुण्डलीध्यानमास्थितः ।
तं शिष्यमनया देवि मोक्षयिष्यामि जन्मतः ॥

End:

चरणं पादुकामन्त्रं मूर्ध्नि यस्य विराजते ।
यस्य पूर्णाभिषेकोऽस्ति तस्य वन्दनमाचरेत् ॥
लौकिकाचरणं सर्वं त्यक्त्वा गुरुपदं स्मरेत् ।
शिवोऽस्मीति शिवोऽस्मीति भावयेद्विहरेत्सुखम् ॥

Colophon:

परमानन्दतन्त्रे सपादलक्षग्रन्थे प्रथमपादे मन्त्रखण्डे द्वितीयपादे चरणोपदेशो नाम अष्टादशोद्रेकः ॥

No. 5672. परमानन्दतन्त्रम्.

PARAMĀNANDATANTRAM.

Pages, 7. Lines, 11 on a page.

Begins on fol. 1*a* of the MS. described under No. 5665.

Incomplete.

Similar to the above.

Beginning:

अथ दीक्षां प्रवक्ष्यामि देवि संक्षेपतः शृणु ।
वेदाभ्यासैकनिरतं देवीभक्तिसमन्वितम् ॥
एवंप्रकारं तं शिष्यं प्रगृह्णेद्गुरुपुङ्गवः ।
कौलदीक्षागुरुस्सम्यक् चतुःस्तम्भविराजिते ॥

मण्टपे वेदिकामध्ये भूपुरत्रयवेष्टिते ।
उपक्रम्य ततः कुर्याद्वेदिकायां त्रिरेखया ॥
व्रीह्यादिपञ्चधान्ये(न्यं) च प्रग्रहेत्कुलनायिके ।
चतुर्दलं ततः कृत्वा मध्ये बिन्दुसमन्वितम् ॥
शिष्यमाहूय दीक्षार्थं यथावत्क्रियतां गुरुः ।
बल्युद्वासनकाले तु अभीष्टं देवि दीयताम् ॥
श्रीपात्रबिन्दुमुद्धृत्य स्वात्मपात्रेण पूरयेत् ।
पूर्णाभिषेकसिद्ध्यर्थं दीपेन सह दीयताम् ॥

Colophon:

इति परानन्दतन्त्रे सपादलक्षग्रन्थे मन्त्रखण्डे द्वितीयपादे द्वात्रिंशद्दीक्षाक्रमो नाम पञ्चमोपदेशः ॥

अथ वक्ष्ये कुलेशानि पूर्णदीक्षाविधिं शृणु ।
पूर्णदीक्षाकरो लोके दुर्लभो गुरुपुङ्गवः ॥
अहमेव कुलेशानि गुरुरूपं समाश्रितः ।
षोडशद्वयदीक्षाभिर्युक्तः परमधार्मिकः ॥
शिष्यस्य नाम कर्तव्यं नागानन्द इति प्रभुम् ।

End:

पूर्णदीक्षाक्रमं देवि यस्य कस्यापि नोच्यते ॥
द्वादशाब्दं गुरुः शिष्यं परीक्ष्य क्रममुच्चरेत् ।
पूर्णदीक्षाविधिस्सम्यङ्मया ते संप्रकाशितः ॥
समासेन वरारोहे किं भूयः श्रोतुमिच्छसि ।

Colophon:

इति श्रीपरमानन्दतन्त्रे सपादलक्षग्रन्थे मन्त्रखण्डे द्वितीयपादे षोडशोपदेशः ॥

No. 5673. परमानन्दतन्त्रम्.

PARAMĀNANDATANTRAM.

Substance, paper. Size, 9⅝ × 7⅜ inches. Pages, 18. Lines, 15 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 57*a*. The other works herein are—Āmnāyamantramālikā 1*a*, Gurukavaca 66*a*, Saṁvinmantra 70*b*, Gṛhākarṣaṇaśarabhasāluvamantra 74*a*, Khaḍgarāvaṇa 74*b*, Nīlakaṇṭhabaḍabānalamantra 75*a*, Vīrabhadrabaḍabānalamantra 77*a*, Bhairavabaḍabānalamantra 78*b*, Nṛsiṁhamantra 80*a*, Havanamantra 80*b*, Prāṇapratiṣṭhāmantra 80*b*, Hanumanmūlamantra 81*b*, Mātaṅgīpūjāprakaraṇa 82*a*, Ātharvaṇamantra 88*a*, Cāmuṇḍīmantra 89*a*, Mahāgaṇapatimantra 94*a*, Svarṇākarṣaṇabairavamantra 95*b*, Ānnapūrṇāmantra 100*b*, Bālāmantra 103*b*, Lakṣmīhṛdayastōtra 104*b*, Viṣṇupūjāvidhāna 115*a*, Lakṣmīnārāyaṇadhyāna 116*a*, Lakṣmīnārāyaṇahṛdaya 118*a*, Lakṣmīnārāyaṇakavaca 120*b*, Mātaṅgīkalpa 123*a*, Śūlinīkavaca 146*a*, Śūlinīhṛdaya 149*a*, Śūlinīmālāmantra 152*a*, Śūlinīdigbandhana 152*b*, Śūlinīpratikriyā 154*b*, Śūlinīviśvarūpa 158*a*, Śūlinīsumukhīkaraṇa 162*a*, Śūlinīyantra 165*a*, Śūlinīyantrōddhārakrama 167*a*, Śūlinīṣaṭprayōgamantra 169, Pratyaṅgirāmantra 169*b*, Saubhāgyavidyāmālāmantra 170*a*, Śyāmalāmātṛkānyāsa 175*a*, Śyāmalāṣṭōttaraśatanāma 177*a*, Śyāmalāsahasranāma 178*b*, Mātaṅgīpuṣpāñjali 189*b*, Śanaiścaramantra 190*b*.

Contains only the 15th Udrēka.

Same work as the above.

No. 5674. परशुरामसूत्रम्.

PARAŚURĀMASŪTRAM.

Pages, 38. Lines, 19 on a page.

Begins on fol. 177*a* of the MS. described under No. 587.

Complete.

On some of the principles of the Śaktēya religion.

Beginning:

अथातो दीक्षां व्याख्यास्यामः—

श्रीभगवान् परमशिवः श्रीपराभट्टारकः अत्याद्यष्टादशविद्याः सर्वाणि दर्शनानि लीलया तत्तदवस्थापन्नः प्रणीय संविमत्या भगवत्या भैरव्या स्वात्माभिन्नमय्या हृ(पृ)ष्टः पञ्चभिर्मुखैः पञ्चाम्नायान् परमार्थसारभूतान् प्रणिनाय । तत्रायं सिद्धान्तः—

षट्त्रिंशत्तत्त्वानि, विश्वं शरीरम् ।

End:

य इमां दशखण्डीं महोपनिषदं महात्रिपुरसुन्दरीसर्वस्वभूतामधीते । (स) सर्वे(षु) यज्ञेषु यष्टा भवति । यं यं क्रतुमधीते तेन तेनास्येष्टं भवतीति हि श्रूयत इत्युपनिषदिति शिवम् ॥

Colophon:

इति श्रीपरशुरामकल्पसूत्रं समाप्तम् ॥

No. 5675. परशुरामसूत्रम्.

PARAŚURĀMASŪTRAM.

Pages, 41. Lines, 21 on a page.

Begins on fol. 64*a* of the MS. described under No. 3832.

Complete.

Same work as the above.

No. 5676. परापूजाप्रयोगः.

PARĀPŪJĀPRAYŌGAḤ.

Pages, 13. Lines, 17 on a page.

Begins on fol. 73*a* of the MS. described under No. 5574.

Complete.

On how to conduct the worship of Śakti as the Supreme goddess.

Beginning:

श्रीआत्मानन्दनाथाय नमः । सङ्कल्पन्यासजपानन्तरं परापूजां कुर्यात् । आदौ पराया ऋष्यादिकं कृत्वा, सा वर्णसम्पुटी(टिते)ति ध्यात्वा, ताळत्रयसम्पुटीकरणशिखाबन्धनदिग्बन्धनं च कृत्वा, महीं मूलेति ध्यात्वा ।

End:

पादौ प्रक्षाळ्य, गन्धादिभिरलङ्कृत्य, शक्तिपात्रीं दद्यात् ।

अळिपात्रमिदं तुभ्यं दीयते पिशितान्वितम् ।
स्वीकृत्य सुभगे देवि श्रियं देहि रिपूञ्जहि ॥

इति दत्वा, पुनर्मन्त्रः—

वत्स तुभ्यं मया दत्तं पीतशेषं कुलामृतम् ।
तव शत्रून् हनिष्यामि सर्वाभीष्टं ददामि ते ॥

यथाशक्ति परां जप्त्वा, महापादुकां शम्भुचरणं च स्मृत्वा, ऐं ह्रीं श्रीं इतः पूर्वं देहबुद्धिप्राणप्रमातृधर्माधिकारजाग्रत्स्वप्न . . . . तत्सर्वं स्वात्माभिन्नब्रह्मार्पणमस्तु स्वाहा इत्यर्पणं कुर्यात् ॥

श्रीआत्मानन्दनाथाय नमः ।

No. 5677. पात्रपूजा.

PĀTRAPŪJĀ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 72*b* of the MS. described under No. 5660.

Incomplete.

On the rites to be conducted in relation to the vessels kept in connection with the worship of the goddess Śakti. The names of these vessels are given under the next number.

Beginning:

केशवाय नमः, नारायणाय नमः, ... ऐं क्लीं सौः समस्तप्रकटविकटगुप्तगुप्ततरसम्प्रदायकुळकौळिनी . . . गणचक्रश्रीपादुकां पूजयामि तर्पयामि नमः ।

End:

ऐं क्लीं सौः सर्वतत्त्वं सर्वशरीरं परिशोधयामि योहोदि(जुहोमि)-स्वाहा ॥

No. **5678.** पात्रविवरणम्–आन्ध्रटीकासहितम्.

PĀTRAVIVARAṆAM WITH TELUGU COMMENTARY.

Page, 1. Lines, 5 on a page.

Begins on fol. 70*a* of the MS. described under No. 5660.

Complete.

A description of the vessels to be used in the conduct of Śakti worship.

Beginning and **end:**

श्रीपात्रं शक्तिपात्रं च भोगपात्रं गुरुं बलिम् ।
अळिपात्रमिदं तुभ्यं यावत्तृष्णं गृहाण हे ॥

No. **5679.** बालात्रिपुरसुन्दरीपूजाक्रमः.

BĀLĀTRIPURASUNDARĪPŪJĀKRAMAḤ.

Pages, 18. Lines, 5 on a page.

Begins on fol. 13*a* of the MS. described under No. 5541.

Complete.

On details connected with the worship of the goddess Śakti conceived as a young girl.

Beginning:

ओं नमः प्रणवार्थाय शुद्धज्ञानैकमूर्तये ।
निर्मलाय प्रसन्नाय दक्षिणामूर्तये नमः ॥

शुद्धद्रव्यभरितयागगृहं गत्वा, द्वारदक्षिणपार्श्वयोः श्रीं ह्रीं क्लीं वां षास्तुपुरुषाय नमः । स्वर्णादिपुटेन श्रीचक्रराजं विलिख्य, मूलेन पुष्पाञ्जलिं दत्वा ।

End:

इति चक्रोद्वासनम् ।

अन्नमादाय ध्यानं कृत्वा—

वामे पायसपूर्णहेमकलशं पाणौ वहन्ती मुदा
चान्ये पाणितले सुवर्णरचितां दर्वीं च भूषोज्ज्वला[म्] ।
अम्बा शुद्धदुकूलवस्त्रवसना कारुण्यपूर्णेक्षणा
श्यामा काचन शङ्करप्रियतमा शातोदरी दृश्यते ॥

अन्नं गुरुसमर्पणं कृत्वा सर्वेभ्यो दत्वा ।

Colophon:

इति समाप्तः ॥

यन्त्रोद्धारणक्रमः—

बिन्दुत्रिकोणषट्कोणकोणमष्टदलं तथा ।
चतुरश्रं चतुर्द्वारं बालायन्त्रं प्रयच्छति ॥

अयं यन्त्रोद्धारणक्रमः ॥

No. **5680.** बालात्रिपुरसुन्दरीपूजाविधिः.

BĀLĀTRIPURASUNDARĪPŪJĀVIDHIḤ.

Substance, palm-leaf. Size, 8⅜ × 1⅜ inches. Pages, 26. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 10*a*. The other works herein are Sudarśanayantra 1*a*, Sudrśanamantra 5*a*, Aṣṭākṣarimantra 23*a*.

Complete.

Similar to the above.

Beginning:

श्रीबालात्रिपुरसुन्दर्यै नमः ।

विविक्तपुष्पमालालङ्कृतं सुधूपितं वराङ्गनाधिष्ठितं पूजासनद्रव्यपरिपूरितं सर्वलक्षणसम्पन्नं यागगृहं गत्वा ऐं ह्रीं श्रीं अप्रतिघातस्तम्बादेवीश्रीपादुकां पूजयामि तर्पयामि नमः ।

End:

सौः शिवतत्त्वं कारणदेहं परिशोधयामि । ऐं क्लीं सौः सर्वतत्त्वमहं कारणदेहं परिशोधयामि स्वाहा ॥

Colophon:

श्रीबालात्रिपुरसुन्दरीपूजा समाप्तं(प्ता) ॥

No. **5681.** बालापद्धतिः.
BĀLĀPADDHATIḤ.

Pages, 3. Lines, 14 on a page.

Begins on fol. 256*b* of the MS. described under No. 424.

Complete.

Similar to the above.

Beginning:

अद्वितीयापरिच्छिन्नसच्चिदानन्दमूर्तये ।
दक्षिणामूर्तिरूपाय गुंह्या(नित्य)मेव नमो नमः ॥
श्रीनाथादिगुरुत्रयं . . . मण्डलम् ॥
गुरुं गणपतिं दुर्गां वटुकं शिवमच्युतम् ।
ब्रह्माणं गिरिजां लक्ष्मीं वाणीं वन्दे विभूतये ॥

ऐं रक्तचरणाभ्यां नमः रक्तचरणाम्बाश्रीपादुकां पूजयामि । क्लीं शुक्लचरणाभ्यां नमः शुक्लचरणाम्बाश्रीपादुकां तर्पयामि नमः ।

End:

सौः सोममण्डलाय मायाकायशोधनार्थं शिवतत्त्वेन कारणदेहं परिशोधयामि जुहोमि स्वाहा । आर्द्रां ज्वलन्तीं स्वाहा ।

No. 5682. बालापद्धतिः.

BĀLĀPADDHATIḤ.

Pages, 5. Lines, 11 on a page.

Begins on fol. 15*b* of the MS. described under No. 5665.

Incomplete.

Similar to the above.

Beginning:

बालापद्धतिर्लिख्यते—

द्वारपूजां कुर्यात् गणेशश्री । दूतश्री । त्रे(क्षेत्र)पालश्री । दूतिकाश्री । द्वारश्रियै नमः ।

End:

शिरसि सहस्रदळपद्मकर्णिकायां बालां मनसा सर्वोपचारैः सम्पूज्य.

No. 5683. बालापद्धतिः.

BĀLĀPADDHATIḤ.

Substance, palm-leaf. Size, $7\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 17. Lines, 8 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Begins on fol. 22*a*. The other works herein are Vāgvādinīmantra 1*a*, Gaṇapatipūjāvidhi 4*a*, Bālāparamēśvarīmantra 16*a*, Amṛtasiddhēśvarīmantra 19*a*, Bālātripurasundarīmantra 21*a*, Śāntistava 30*a*, Sūryanārāyaṇapūjā 33*a*, Svarṇākarṣaṇabhairavamantra 46*a*, Mantradēvatāprakāśikā 51*a*, Praṇavamātṛkābhuvanēśvarīmantravidhāna 94*b*, Ajapāmantra 95*a*, Saṅkṣēpadēvīmāhātmya, Kumārīstōtra 96*a*, Caṇḍikāhṛdaya 98*b*, Ajapāmantra, Āvaraṇapūjā 101, Mātṛkamantrabhajana 103*a*, Pañcākṣarī-

vidyā 106*a*, Mahāgaṇapatividhāna 114*a*, Vāgīśvarīdhyāna 121*a*, Tribhuvanamōhinītripurāmantra 125*b*.

Complete.

Similar to the above.

See under No. 5630 for the beginning.

End:

शक्तीश्वर्यै नम इति कुलदीपग्रहणम् । शान्तिस्तवं पठन् श्रीपात्रमुद्धृत्य यथासुखं विहरेत् ॥

Colophon:

इति बालापद्धतिः ॥

No. 5684. बालापूजापद्धतिः.

BĀLĀPŪJĀPADDHATIḤ.

Pages, 10. Lines, 13 on a page.

Begins on fol. 195*a* of the MS. described under No. 424.

Complete.

Similar to the above.

Beginning:

आनन्दमानन्दकरं प्रसन्नं ज्ञानस्वरूपं निजभावयुक्तम् ।
योगीन्द्रमीड्यं भवरोगवैद्यं श्रीमद्गुरुं नित्यमहं नमामि ॥
श्रीनाथादिगुरुत्रयं गणपतिं पीठत्रयं भैरवं
सिद्धेभ्यो वटुकत्रयं पदयुगं दूतीक्रमं शाम्भवम् ।
वीरेशाष्टचतुष्कषष्टिनवकं वीरावलीपञ्चकं
श्रीमन्मालिनिमन्त्रराजसहितं वन्दे गुरोर्मण्डलम् ॥

पूजापद्धतिः—

तत्र ग्रहप्राङ्गणैकदेशे प्रत्यङ्मुखासन आजानु पादौ मणिबन्धौ पादौ पाणी प्रक्षाल्याचम्य, द्वारदेशे स्थित्वा सामान्यार्घ्यं कृत्वा द्वारपूजां कुर्यात् ।

End :

श्रीपात्रमुद्धृत्य देवीं(व्यै) समर्प्य गृह्णीयात् । कौलपात्रं दद्यात् । शान्तिस्तवं पठेत् । नीराजनादिकं दद्यात् । यस्य स्मृत्येति गुरुदेवतां समर्चयेत् ॥

No. **5685.** बालापूजाविधानम्.

BĀLĀPŪJĀVIDHĀNAM.

Pages, 5. Lines, 20 on a page.

Begins on fol. 127*b* of the MS. described under No. 2373.

Complete.

Forms part of the Tripurāsiddhānta

Similar to the above.

Beginning :

पूजाविधानं वक्ष्यामि बालायाः परमेश्वरि ।
यस्य श्रवणमात्रेण पूजासिद्धिर्भवेन्नृणाम् ॥
इन्द्रमग्निं यमं वन्दे नैर्‌ऋतिं वरुणं भजे ।
वायुं कुबेरमीशानं ब्रह्माणं केशवं भजे ॥

* * * *

एवं देवान्द्वारपालान्समाराध्य नरोत्तमः ।
भूतशुद्ध्यादिकं (साधु) कुर्यादेकाग्रमानसः ॥
ततो यन्त्रं लिखेद्धीमान् बिन्दुमादौ लिखेन्नरः ।
त्रिकोणं विलिखेत्पश्चात् षट्कोणं विलिखेत्ततः ॥

* * * *

संस्थाप्य दक्षिणे भागे पूजाद्रव्यमनुत्तमम् ।
कलशं स्थापयेद्भागे दक्षिणे मानवोत्तमः ॥

End :

लभेत्परमसौन्दर्यं सर्वैश्वर्यमवाप्नुयात् ।
परमायुरवाप्नोति कदापि न भयं भवेत् ॥

सर्वान् मनोरथान् शीघ्रं प्राप्नोत्येव सुदुर्लभाम्(न्) ।
तिष्ठति त्रिपुरालोके सो(मोद)ते नात्र संशयः ॥

Colophon:

इति श्रीमहात्रिपुरासिद्धान्ते बालापूजाविधानं नाम अष्टादशः कल्पः संपूर्णः ॥

No. 5686. बालापूजाविधानम्.

BĀLĀPŪJĀVIDHĀNAM.

Substance, palm-leaf. Size, $14\frac{7}{8} \times 1\frac{3}{8}$ inches. Pages, 6. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 15*a*. The other works herein are Śarabhasālvamantra 1*a*, Svapnavārāhīmantra 1*b*, Vaśyavārāhīstōtra 2*a*, Rajasvalāstōtra 2*b*, Ucchiṣṭagaṇapatimantra 4*a*, Bagalābrahmāstramantra 6*a*, Saubhāgyavidyēśvarīmantra 6*b*, Laghumātaṅgēśvaramantra 7*b*, Tiraskariṇīmantra 8*a*, Annapūrṇēśvarīmantra 8*b*, Bhuvanēśvaryaṣṭōttaraśatanāmastōtra 10*a*, Kirātavārāhīmantra 11*a*, Saurāṣṭākṣarīmantra 12*b*, Aghōravīraśarabhasālvamantra 14*a*, Trailōkyamōhinīkavaca 18*a*, Brahmāstrabagalāmukhīpītāmbarīsahasranāmastōtra 26*a*, Pītāmbarīsahasranāmastōtra 32*a*, Mahālakṣmīhṛdayastōtra 42*a*, Ambāṣṭaka 50*a*, Bhairavāṣṭaka 51*a*, Pañcamukhahanūmatkavacastōtra 53*a*, Vīrabhadramālāmantra 53*b*, Hanūmadaghōramantra 54*a*, Śuddhaśaktimālāmantra 56*a*, Yakṣiṇīprayōga 62*a*.

Complete.

Same work as the above.

No. 5687. भूतशुद्धिः.

BHŪTAŚUDDHIḤ.

Pages, 3. Lines, 10 on a page.

Begins on fol. 182*b* of the MS. described under No. 124.

Complete.

On self-purification preliminary to the commencement of the worship of Śakti.

Beginning:

भूतशुद्धिविधिं कुर्यात्प्राणायामक्रमेण हि ।
आत्मदेहौ पृथक्कृत्वा साक्षी भूत्वा चिदम्बरे ॥
चिच्चन्द्रमण्डले जीवं स्थापयेदथ मन्त्रतः ।
अस्त्रेण रक्षयेद्धीमान् नादशुद्धिं विधाय च ॥
आसने सम्यगासीनो वामेनापूर्य चोदरम् ।
कुम्भकेन त्रिरावृत्त्या दक्षिणेन च रेचयेत् ॥

End:

मूलविद्यात्रयावृत्त्या तुर्येण ब्रह्मरन्ध्रके ।
द्वादशान्तेन्दुविगळत्पीयूषेणात्मनस्तनुम् ॥
संप्लाव्य तन्मयो भूयादात्मरक्षा भवेदियम् ।
आत्मरक्षां विधायैवं मातृकान्यासमाचरेत् ॥

No. **5688.** भूतशुद्धिः.

BHŪTAŚUDDHIḤ.

Pages, 5. Lines, 24 on a page.

Begins on fol. 141*a* of the MS. described under No. 5643. Complete.

Same work as the above.

No. **5689.** भूशुद्धिः.

BHŪŚUDDHIḤ.

Pages, 4. Lines, 10 on a page.

Begins on fol. 181*a* of the MS. described under No. 124. Complete.

Regarding the purification of the ground preliminary to the performance of Pūjā.

Beginning:

देशकालविरोधेन विस्तरात्कर्तुमक्षमः ।
गणेशं क्षेत्रपं यष्ट्वा पुरुषं वास्तुसंज्ञकम् ॥
पूजयेद्द्वारपूजेयं श्रीविद्यार्चनकर्मणि ।

ऐं ह्रीं श्रीं गं गणपतये नमः द्वारदक्षिणे; ऐं ह्रीं श्रीं क्षं क्षेत्रपालाय नमः ।

End:

एतास्समयविद्याश्च जपेत्प्रत्यूहशान्तये । एवं रक्षां स्वात्मनि विधाय, गुरूपदेशरीत्या स्वपुरतो यन्त्रोद्धारं विभाव्य, भूतशोधनमाचरेत् ॥

No. **5690.** भूशुद्धिः.
BHŪŚUDDHIḤ.

Pages, 6. Lines, 24 on a page.

Begins on fol. 138*b* of the MS. described under No. 5643.
Complete.
Same work as the above.

No. **5691.** महास्वच्छन्दसारसङ्ग्रहः.
MAHĀSVACCHANDASĀRASAṄGRAHAḤ.

Pages, 26. Lines, 26 on a page.

Begins on fol. 1*a* of the MS. described under No. 5635.
Paṭalas 9 to 44 complete; 45th incomplete.
On details connected with the worship of the goddess Śakti.

Beginning:

श्रीनाथ भैरवीनाथ श्रीमत्स्वच्छन्दभैरव ।
आख्यातं भैरवीज्ञानं त्वया सर्वागमेष्वपि ॥
तत्सर्वं सङ्ग्रहेणैव श्रोतुमिच्छामि भैरव ।

शिवः —

तत्सर्वमखिलं वक्ष्ये यत्त्वया परिपृच्छितम् ।
मन्त्रोद्धारविधिं पूर्वं विद्याकरणमेव च ॥
मन्त्रविद्याविशेषाणि न्यासमन्त्राण्यनन्तरम् ।

End:

इति श्रीमहास्वच्छन्दसारसङ्ग्रहे आचार्याभिषेकविधानपटलश्चतुश्चत्वारिंश[तितम]ः ॥

अथान्त्येष्टिं प्रवक्ष्यामि समासाच्छृणु सुन्दरि ।
समयापुत्रकानां च साधकानां विशेषतः ॥

* * * *

ईशात्सदाशिवो योज्यो नासिके गुरुणां प्रिये ।
तस्मिन् पुरवराविद्या असङ्ख्याता गुणान्विताः ॥

No. 5692. महास्वच्छन्दसारसङ्ग्रहः.

MAHĀSVACCHANDASĀRASAṄGRAHAḤ.

Pages, 113. Lines, 11 on a page.

Begins on fol. 30*a* of the MS described under No. 5566.

Paṭalas 9 to 44 complete ; 45th incomplete.

Same work as the above.

No. 5693. मातृकाचक्रविवेकः.

MĀTṚKĀCAKRAVIVEKAḤ.

Pages, 6. Lines, 14 on a page.

Begins on fol. 180*a* of the MS. described under No. 5617.

Complete.

On the goddess Śakti as represented by the letters of the alphabets and as identified with the soul: by Svatantrānandanātha.

Contains the following Khaṇḍas :—

१. तात्पर्यविवेकः.
२. सुषुप्तिविवेकः.
३. स्वप्नविवेकः.
४. जाग्रद्विवेकः.
५. तुर्यविवेकः.
६. मातृकाचक्रसङ्ग्रहः.

Beginning:

जाग्रत्सुषुप्तिकृतदक्षिणवामभागां स्वप्नस्वभावपरिक्लृप्तजघन्यभागान्(म्) ।
तुर्यातितुर्यघटिताननहृत्प्रदेशां प्राणेश्वरीं परशिवस्य परामृशामः ॥
स्पर्शस्वरोल्लिखितजागरसुप्त्यवस्थामन्तस्थसूचित(सुषुप्त्यु)दितप्रबोधाम् ।
ऊष्मोक्तजागरदशोदितसुप्त्यवस्थां मन्त्रोत्करस्य जननीं मनसा विशामः ॥
सङ्कोचसंश्रयणवर्जनभावभङ्ग्या जाग्रत्सुषुप्तिदश योगमकौ प्रयत्नौ ।
दौ(द्वौ)स्पृष्टताविवृतते विदितौ सुधीभिः स्पर्शश्र(स्व)राक्षस(र)गतां परि-
[शीलयामः ॥

End:

अन्तस्तमेव चतुरश्रमुषर्बुधेन्द्वोरर्कात्मकं चिदचिदुद्भवमेतदङ्गम् ।
एवञ्च सत्यपि जडाजडसारमेतत्प्रागेव पूज्यमिति पूर्णपदे कृतं तत् ॥
इति परमरहस्यं मातृकार्थस्वरूपं स्फुटतरमुपदिष्टं चक्रराजाभिनीतम् ।
लगति यदयमर्थः शक्तिविद्धेऽन्तरङ्गे न तु पुनरपरत्र प्रत्यवायो न तन्मे ॥

Colophon:

इति मातृकाचक्रविवेके तुर्यविवेकः पञ्चमः खण्डः ॥
मातृकाचक्रविवेकमूलं संपूर्णम् ॥

No. **5694.** मातृकाचक्रविवेकः.

MĀTṚKĀCAKRAVIVĒKAḤ.

Substance, paper. Size, 12 × 7¾ inches. Pages, 25. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Mātṛkācakravivēkavyākhyā 13*b*, Triśatībhāṣya 89*b*, Śivasamayāṅkamātṛkā 128*a*.

Complete.

Same work as the above.

No. 5695. मातृकाचक्रविवेकव्याख्या.

MATṚKĀÇAKRAVIVĒKAVYĀKHYĀ.

Pages, 56. Lines, 14 on a page.

Begins on fol. 182*b* of the MS described under No. 5617.

Complete.

A commentary on the Mātṛkācakravivēka of Svatantrānandanātha : by Śivānanda.

Beginning :

नमस्तेजस्त्रयीसर्गविश्रान्तिस्थानशक्तये ।
तदुत्तीर्णोर्ध्वविश्रान्तिस्फूर्तये गुरुमूर्तये ॥

स्वतन्त्रो नाम सिद्धोऽभूदादिनाथस्य लोचनात् ।
मातृकार्थोपदेशेन लोकाननुजिघृक्षतः ॥

प्रभावाद्देवदेवस्य स सद्योमातृकार्थवित् ।
रहस्यमेतद्योगेषु योजयेति च शासितः ॥

स विसृष्टस्ततस्तेन कनकाचलकन्धरे ।
समाहितमनाश्चक्रे मातृकार्थप्रचिन्तनम् ॥

तस्य मूलमनोरर्थं तत्सूत्रैः संजिघृक्षतः ।
व्यामूढप्रतिभाशक्तेः प्रमेयार्जवनिश्चये ॥

पपात गगनादग्रे श्रीचक्रं शिवचोदितम् ।
तदालोक्य महाबिम्बं मातृकार्थप्रकाशकम् ॥

स जातप्रतिभः सद्यो विद्यामाद्यामनेकधा ।
व्याचष्ट सुगमैः सूत्रैः तानि सिद्धेषु चार्पयेत् ॥

ते च सिद्धास्तदादेशान्मूलमन्त्रार्थशासनम् ।
पात्रेषु न्यक्षिपन् गुप्तं पारम्पर्यप्रवृत्तये ॥

एवं परम्पराप्राप्तमहामन्त्रार्थशासने ।
श्लाघ्यते मातृकाचक्रविवेको नाम सङ्ग्रहः ॥

ग्रन्थोऽयमुपदेशैकबोधसिद्धजनप्रियः ।
वृत्त्या विविच्यते लब्ध्या शिवानन्दात्मना मया ॥

आदिसिद्धोपदेशोऽयमनिर्वाह्यः परोक्तिभिः ।
ततः संवादसन्नाहैर्नाद्दतो ग्रन्थविस्तरः ॥

इह खलु परमशिवभट्टारकस्य प्राणभूतया विद्याविद्योभयचमत्कारमय्या स्वरसवाहिन्या विमर्शशक्त्या समुन्मीलितासु बाह्याभ्यन्तरविविधमन्त्रसिद्धान्तविप्रतिपत्तिषु विलुठतो लोकस्यानुग्रहाय शिवप्रयुक्तस्वतन्त्रानन्दनामा महासिद्धः स्वरसिद्धतया निखिलवाङ्मयनिदानतया च महाप्रमाणस्य मातृकामहामन्त्रस्यार्थोपदेशेन निखिलसंशयनिरासनिराकुलं परमार्थस्वरूपं निरूपयितुकाम आदौ महामन्त्रार्थरूपिणीं भगवतो महादेवस्य महाशक्तिं ग्रन्थस्य पारम्पर्यप्रवृत्तिरूपाभीष्टसिद्धये परामृशति—जाग्रदित्यादि । सुप्तिनिवृत्तौ घटपटादीनां चिद्भेदेनानुसन्धानदशा जाग्रत् ।

End:

तदपेक्षया चतुरश्रषोडशदळाष्टदळानां जाग्रत्सुषुप्तिस्वप्नचक्रोपलक्षकाणां बहिस्सन्निवेशकल्पना अनुसरणीयाः। ये तु पुनरत्राव्युत्पन्नाः तदपेक्षया जाग्रचक्रस्य प्राधान्यात् बहिश्चतुरश्रादिचक्रस्य तत् त्रयसन्निवेशेन व्युत्पादितम् । तदीया कल्पना व्युत्पादनमात्रपरा सन्निवेशकल्पनाविवेकेन व्युत्पत्तिमता च साधकजनेन चतुर्दशारपर्यन्त एव श्रीचक्रे सुषुप्त्यादिचक्रत्रयस्य प्रत्येकं गन्तव्यमिति शिवम् ॥

Colophon:

इति मातृकाचक्रव्याख्यानं सम्पूर्णम् ॥

No. 5696. मातृकाचक्रविवेकव्याख्या.
MĀTṚKĀCAKRAVIVĒKAVYĀKHYĀ.

Pages, 140. Lines, 19 on a page.

Begins on fol. 13*b* of the MS. described under No. 5694.

Complete.

Same work as the above.

No. 5697. मातृकाचक्रविवेकः—सव्याख्यः.
MĀTṚKĀCAKRAVIVĒKAḤ WITH COMMENTARY.

Pages, 68. Lines, 22 on a page.

Begins on fol. 106*a* of the MS. described under No 3907.

Wants the first Khaṇḍa with its commentary.

Same work as the above.

No. 5698. योगिनीहृदयम्.
YŌGINĪHṚDAYAM.

Pages, 41. Lines, 18 on a page.

Begins on fol. 131*a* of the MS. described under No. 5593.

Complete.

On the worship of Śakti and other deities as represented in the Śrīcakra.

Beginning:

श्रीदेव्युवाच—

देवदेव महादेव परिपूर्णकृपामय ।
वामकेश्वरतन्त्रेऽस्मिन्नज्ञातार्थास्त्वनेकशः ॥
तांस्तानर्थानशेषेण वक्तुमर्हसि * शङ्कर ।

शङ्कर † उवाच—

शृणु देवि महागुह्यं योगिनीहृदयं परम् ।
त्वत्प्रीत्या कथयाम्यद्य गोपितव्यं विशेषतः ॥

---

* भैरव इति पाठान्तरम्. † श्रीभैरव उवाच.

कर्णात्कर्णोपदेशेन संप्राप्तमवनीतलम् ।
न देयं परशिष्येभ्यो नास्तिकेभ्यो न चेश्वरि ॥

* * * *

चक्रसङ्केतको मन्त्रपूजासङ्केतकस्तथा ।
त्रिविधस्त्रिपुरादेव्यास्सङ्केतः परमेश्वरि ॥
यावदेवं न जानाति सङ्केतत्रयमुत्तमम् ।
न तावत्त्रिपुराचक्रे परमाज्ञाधरो भवेत् ॥

* * * *

Colophon:

इति श्रीयोगिनीहृदये देवीभैरवसंवादे चक्रसङ्केतो नाम प्रथमोपदेशः॥

End:

सर्वेप्सितफलावाप्तिस्सर्वकामफलाः श्रियः ॥
यतोऽपि दृश्यते देवि कथं विद्यां न चिन्तयेत् ॥
शिवेनाम्ब रहस्यत्वादविस्पष्टतयोदितम् ।
त्वद्रूपरूपवचनात् विवृतं नो क्षमस्व तत् ॥

Colophon:

इति श्रीयोगिनीहृदये देवीभैरवसंवादे पूजासङ्केतो नाम तृतीयोपदेशः ॥
समाप्तश्चायं ग्रन्थः ॥

No. 5699. योगिनीहृदयम्.

YŌGINĪHṚDAYAM.

Substance, paper. Size, 12 × 7¾ inches. Pages, 30. Lines, 25 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Yōginīhṛdaya-dīpikā 17*b*.

Complete.

Same work as the above.

No. 5700. योगिनीहृदयम्.

YŌGINĪHṚDAYAM.

Pages, 22. Lines, 8 on a page.

Begins on fol. 20*a* of the MS. described under No. 514.

Contains only the first Saṅkēta.

Same work as the above.

No. 5701. योगिनीहृदयम्.

YŌGINĪHṚDAYAM.

Pages, 60. Lines, 16 on a page.

Begins on fol. 33*b* of the MS. described under No. 5560.

Complete.

Same work as the above.

No. 5702. योगिनीहृदयम्.

YŌGINĪHṚDAYAM.

Pages, 12. Lines, 12 on a page.

Begins on fol. 137*a* of the MS. described under No. 5617

Complete.

Same work as the above.

No. 5703. योगिनीहृदयम्—सव्याख्यानम्.

YŌGINĪHṚDAYAM WITH COMMENTARY.

Substance, paper. Size, $9\frac{3}{8} \times 7\frac{1}{8}$ inches. Pages, 262. Lines, 16 on a page. Character, Telugu. Condition, good. Appearance, new.

Saṅkētas 1 to 3 complete; but the 3rd is misplaced before the 2nd.

The text with the commentary called Yōginīhṛdayadīpikā. The author of the commentary is Puṇyānandanātha according to the colophon at the end of chapters 1 and 3, while the colophon

at the end of chapter 2, attributes the authorship of the commentary to Amṛtānandanātha, disciple of Puṇyānanda.

Beginning:

जगद्वन्द्यावेतौ गणपवटुकौ विश्वविनुतौ
जगद्रक्षाशीलौ जपनिरतसायुज्यफलदौ ।
रथाङ्गे सन्नद्धौ रविशशिकृशानूज्ज्वलदृशौ
मयि स्यातां रक्षापरवशधियौ मद्गुरुमयौ ॥
तन्नित्यं ज्योतिषां ज्योतिर्जयत्येकमनुत्तरम् ।
न यद्भासयते सूर्यो न शशाङ्को न पावकः ॥
विमर्शरूपिणी शक्तिरस्य विश्वगुरोः परा ।
परिस्फुरति नैकापि नानानामार्थरूपिणी ॥

* * * *

तद्वामकेश्वरे तन्त्रे सूचितार्थान् परावरान् ।
व्यक्तीकर्तुं प्रयतते योगिनीहृदयेऽधुना ॥
मानुषो(षं) हृदयं मर्त्यो वेत्ति नैकोऽपि तत्त्वतः ।
योगिनीहृदयं ज्ञातुं कस्समर्थश्शिवं विना ॥

* * * *

तदनेकार्थसन्दर्भान्नानासङ्केतसङ्कुलम् ।
विवृणोत्यमृतानन्दश्शिवयोरेव शासनात् ॥

इह खलु भगवान् प्रकाशमूर्तिः परमशिवः स्वात्मानं विमर्शांशेन विभज्य परापश्यन्त्यादिक्रमात् पृच्छति—श्रीदेव्युवाचेति । शिव एवाहं वैखरीपर्यन्तरे व्यावृत्त्या विमर्शांशेन पृष्टवानिति यावत् ।

Colophon:

इति श्रीमत्परमयोगीन्द्रपरमहंसपुण्यानन्दनाथयोगिप्र(वर)विरचितायां वामकेश्वरतन्त्रे योगिनीहृदयदीपिकायां चक्रसङ्केतः प्रथमस्संपूर्णः ॥

* * * *

Colophon:

इति श्रीमत्परमयोगीन्द्रपुण्यानन्दनाथयोगिप्र(वरवि)राचितायां योगिनीहृदयदीपिकायां पूजासङ्केतस्तृतीयः ॥

End:

यस्य प्रबोधेन यस्य षड्विधार्थस्य प्रबोधनेन वीरचक्रेश्वरो भवेत् ।
. . . . प्रलयप्रतिपादनपरा वीराः तेषां चक्रं समूहस्तस्येश्वरः परमशिवः तद्विधार्थपरिज्ञाने शिवो भवेदित्यर्थः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यपरमयोगीन्द्रपुण्यानन्दनाथशिष्यामृतानन्दनाथयोगिविरचितायां योगिनीहृदयदीपिकायां मन्त्रसङ्केतो द्वितीयः ॥

No. 5704. योगिनीहृदयम्—सव्याख्यानम्.

YŌGINĪHṚDAYAM WITH COMMENTARY.

Pages, 161. Lines, 23 on a page.

Begins on fol. 17*b* of the MS. described under No. 5699.

Complete.

Same work as the above.

No. 5705. योगिनीहृदयम्—सव्याख्यानम्.

YŌGINĪHṚDAYAM WITH COMMENTARY.

Substance, paper. Size, $9\frac{5}{8} \times 7\frac{1}{8}$ inches. Pages, 136. Lines, 15 on a page. Character, Telugu. Condition, good. Appearance, new.

The first Saṅkēta complete, the second is wanting and the third is incomplete.

Same work as the above.

No 5706. योगिनीहृदयम्—सव्याख्यानम्.
YŌGINĪHṚDAYAM WITH COMMENTARY.

Pages, 235. Lines, 18 on a page.

Begins on fol. 1*a* of the MS. described under No. 5608.

Complete in 3 Saṅkētas.

Same work as the above.

The commentary is by Amṛtānandanātha.

No. 5707. योगिनीहृदयम्—सव्याख्यानम्.
YŌGINĪHṚDAYAM WITH COMMENTARY.

Pages, 203. Lines, 2 on a page.

Begins on fol. 1*a* of the MS. described under No. 5607.

Saṅkētas 1 to 3 complete, but the third Saṅkēta is here called Unmēṣa. An index of this work is found to begin on fol. 110*a* and it extends over 9 pages.

The text forms part of Vāmakēśvaratantra, and the commentator is Amṛtānandanātha, disciple of Paṇyānanda.

Same work as the above.

No. 5708. योगिनीहृदयदीपिका.
YŌGINĪHṚDAYADĪPIKĀ.

Pages, 73. Lines, 13 on a page.

Begins on fol. 143*a* of the MS. described under No. 5617.

Saṅkētas 1 to 3 complete, the third Saṅkēta being called Unmēṣa.

Same commentary as in the above MS.

No. 5709. योगिनीहृदयदीपिका.
YŌGINĪHṚDAYADĪPIKĀ.

Substance, paper. Size, $7\frac{1}{2} \times 6$ inches. Pages, 398. Lines, 14 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

Same work as the above.

There is an index at the end consisting of 14 pages.

No. 5710. रुद्रयामलोत्तरषट्कम्.

RUDRAYĀMALŌTTARAṢAṬKAM.

Pages, 7. Lines, 2 on a page.

Begins on fol. 121*a* of the MS. described under No. 5617.

Complete.

The subjects treated in these six Paṭalas are :—

१. षट्चक्रध्यानम्.	४. त्रिपुराध्यानम्.
२. त्रिपुरामन्त्रनिर्णयः.	५. सिद्धयः.
३. कामतत्त्वसाधनम्.	६. विद्याकोशः.

Beginning :

कङ्केळिशोणं बिभ्राणमङ्के पङ्केरुहालयाम् ।
यं के वदन्ति दन्तीन्द्रं तं केवलमुपास्महे ॥

विद्युत्पुञ्जनिभां नमामि सततं प्राग्भारसूक्ष्मां गिरं
मूर्त्या भग्नमृणालतन्तुनिभया निर्भिद्य लिङ्गत्रयम् ।
प्राप्योर्ध्वं च निसर्गभागशुकुलं पीयूषधारारसं
पीत्वा विद्रुतविद्रुमद्रवमयीं शक्तिं परां कौळिकीम् ॥

व्योमाम्बुजे सहस्रारे सितकेसरसङ्कुले ।
तत्रासीनं महादेवमपृच्छत्कुलनायिका ॥

श्रीदेव्युवाच—

भगवन् देवदेवेश भवनाशन भैरव ।
श्रोतुमिच्छामि देवेश देव्या मन्त्रविनिर्णयम् ॥
लिङ्गत्रयसमायुक्तं महापद्मवनं तथा ।
कदम्बगोलकश्चान्यद्ब्रह्मरन्ध्रं विशेषतः ॥

मुद्रापञ्चकसंयुक्तं पीठत्रयसमन्वितम् ।
कुलाकुलविभागश्च सप्तमं कथयस्व मे ॥

* * * *

Colophon:

इति श्रीरुद्रयामले उत्तरषट्के प्रथमः पटलः ॥

End:

एषा हि मूलविद्या च नाम्ना त्रिपुरभैरवी ॥
प्रत्यक्षं जायते देवि त्रिधा सिद्धिं ददात्यसौ ।
ददते साधकेन्द्राणामितरा भुवि का तथा ॥
एतत्ते कथितं देवि भुक्तिमुक्तिफलप्रदम् ।
अयोग्यस्य न दातव्यमित्याज्ञा पारमेश्वरी ॥

Colophon:

इति रुद्रयामले उत्तरषट्के षष्ठः पटलः ॥

इति रुद्रयामले सपादलक्षग्रन्थे विद्यापीठावतारिते उत्तरभागे नित्यक्लिन्नाप्रकरणे षड्विद्याप्रकाशायामुत्तरषट्कं संपूर्णम् ॥

No. 5711. रुद्रयामलोत्तरषट्कम्.

RUDRAYĀMALŌTTARAṢAṬKAM.

Pages, 16. Lines, 25 on a page.

Begins on fol. 243*a* of the MS. described under **No.** 5616.

Complete.

Same work as the above.

No. 5712. रुद्रयामलोत्तरषट्कम्—कुलदीपिकासहितम्.

RUDRAYĀMALŌTTARAṢAṬKAM WITH KULADĪPIKĀ.

Pages, 51. Lines, 24 on a page.

Begins on fol. 251*b* of the MS. described under **No.** 5616.

Complete.

The same as the above work, but with a commentary.

Beginning:

वन्दे शक्तिं परां शम्भोर्वर्णसङ्क्षिप्तविग्रहाम् ।
प्राणाद्यारामसङ्क्रीडानिरन्तरधुरन्धराम् ॥
आगमान्तरसंवाददर्शितार्थविनिश्चयाम् ।
व्याख्यामुत्तरषट्कस्य करोमि कुळदीपिकाम् ॥

भगवतश्चैतन्यात्मनस्त्रिय(म्ब)म्बकभट्टारकस्य स्फुरणरूपिण्यास्सार्व-कालिकप्रपञ्चसर्गस्थितिसंहारसङ्क्रीडनपरायास्सोमसूर्यवह्न्यात्मकविश्वतैजस-प्राज्ञपुरत्रयसन्धुक्षण्या वर्णकदम्बकसङ्कलितदिव्यमूर्तेः परायाश्शक्तेः परमो-पास्तिसाधनभूतस्य श्रीमति दक्षिणस्रोतस्यश्रीरुद्रयामळे निखिलजग-द्रक्षणाय समुद्घोषितस्यापि श्रीमत्काश्मीरसिद्धसम्प्रदायदरिद्रैरभागधेयै-र्याथातथ्यापरिज्ञानात् स्वमनीषिकया परम्परया कुदेशिकैर्विप्लुतोपदेशस्य श्रीमद्ब्रह्मानन्दप्रकाशकभट्टारकपरमगुरुमुखागमसंवादप्रवादपुरस्सरं श्रीम-दुत्तरषट्कस्य कुळदीपिकाख्यं विवरणमारभ्यते । तस्य तावदयमाद्य-श्लोकः—

व्योमाम्बुजे सहस्रारे सितकेसरसङ्कुले ।
तत्रासीनं महादेवमपृच्छत्कुळनायिका ॥ इति ।

तत्र व्योमनाम आज्ञास्थानात् कोदण्डसंज्ञितादूर्ध्वं यच्छिरःकपा-लान्तराळं तत्र यदम्बुजं कुळस्वरूपं परमबिन्दुसंज्ञितं तद्व्योमाम्बुजम् । तत्र बिन्दोः किरणाः अराणि तेषां सहस्रम् अरसहस्रकम् । अरश-ब्देन दळान्यभिप्रैति ॥

End:

त्रिपुराप्रशस्तिप्रसङ्गेन पुरुषार्थोपयोगिनोऽन्यानपि प्रशस्ततरान् निर्दि-शति—

एतदेव स्फुटं देवि भुक्तिमुक्तिफलप्रदम् ।
अयोग्येभ्यो न दातव्यमित्याज्ञा पारमेश्वरी ॥ इति ।

यथोक्तं त्रिपुराविद्यारहस्यं तदयोग्येभ्यो न दातव्यमिति परमेश्वर-स्याज्ञेति ॥

Colophon:

कुदेशिकोपदेशान्धतमसः प्रतिघातिनी ।
प्रकाशितरहस्यार्था समाप्ता कुळदीपिका ॥
इत्युत्तरषट्कविवरणे षष्ठः पटलः ॥
नवसु धामसु धाम सुधामयं भवननामसु नाम सुनादितम् ।
न हि नमामिनमामितसिद्धये धृतमुदारमुदारमुमामयम् ॥
आविर्भावितवैभवं हतभवं भक्त्या भजन्तो भरात्
खण्डोत्तुङ्गितशेखरं खरतमस्सन्तापसन्नुत्तये ।
रूपं भारतिभारतिप्रकटितं सम्भावयन्तो वयं
जीवामो वयमायुरग्र्यममलं सार्धं प्रकुर्वीमहि ॥
इत्युत्तरषट्कव्याख्यानं सम्पूर्णम् ॥

No. **5713.** रुद्रयामलोत्तरषट्कव्याख्या—कुलदीपिका.
RUDRAYĀMALŌTTARAṢAṬKAVYĀKHYĀ: KULADĪPIKĀ.

Pages, 23. Lines, 12 on a page.

Begins on fol. 125*a* of the MS. described under **No. 5617.**
Complete.
The commentary is the same as in the previous MS.

No. **5714.** लघुचक्रपद्धतिः.
LAGHUCAKRAPADDHATIḤ.

Pages, 6. Lines, 14 on a page.

Begins on fol. 206*b* of the MS. described under No. 424.
Complete.
On the rules regarding the drawing of the Śrīcakra.

Beginning :

> ह्रासे देवीकृते तत्तमगलविगते तोषभागे झ सूत्रान्
> कृत्वा पूरीदळान्ते गवलवमुभयोर्वा तयोस्तोयभागान् ।
> धान्यांशान्मे विमार्जे प्लुधितुवरणाग्राणि सूत्रद्वयानि
> प्राक्प्राभं रोधिगानं विधिमथवगं दिव्यसूनुश्चिरं स्यात् ॥

अस्यार्थस्तु—

ह्र इति द्वयं कथयति । से इति सप्त । एवं कटपयादिक्रमेण द्विसप्तत्यङ्गुलानि भवन्ति ।

चक्रोल्लेखनप्रकारस्तु—

षट्त्रिंशदङ्गुलायामं सूक्ष्मसूत्रं सम्पाद्य वृत्तक्रमेण वलयं कृतं चेत् पूर्वोत्तरभागाभ्यां द्विसप्तत्यङ्गुलायामं भवति ।

End:

> रुद्राङ्गुलं यद्वसुपत्रसंज्ञिके नवाङ्गुलं षोडशपत्रसंज्ञिके ।
>
> * * * *
>
> शेषाङ्गुळीभिः क्रमतस्सुलेख्यं पुरत्रयं हे त्रिपुरे महेशि ।
> सूर्यासूर्यसुतं च केतुमुडु(भृ)द्भूमीसुतो वृत्तकं
> राहुं सौम्यबुधं च केतुरगमच्छुक्रस्तथा चेन्दुगः ।
> सूर्यो राहुरथाङ्गिरसुतश्चाङ्गारकं . . तां
> मन्दं प्राग्दिशि वृत्तकं च विहरेच्चक्रं शिवायाः पदम् ॥

No. **5715.** लघुमातङ्गीकल्पः.

LAGHUMĀTAṄGĪKALPAḤ.

Pages, 12. Lines, 14 on a page.

Begins on fol. 82*a* of the MS. described under No. 5673. Complete.

On the worship of the goddess Mātaṅgī, who is considered to be a manifestation of Śakti.

Beginning :

ओं लघुमातङ्गीपूजाकल्पं प्रकारान्तरेण(स) विस्त[ा]रं कथ्यते । विध्युक्तेन पूजामण्टपं प्रविश्य द्वारपूजादिकं कृत्वा आसने उपविश्य भूमिं प्रार्थयित्वा गुरुं ध्यात्वा गुरुपादोदकप्राशनं कृत्वा भूतोच्चाटनं कृत्वा ततः दशदिग्बन्धनं कृत्वा भूशुध्यादिमातृकादिकं कृत्वा ऋष्यादिन्यासोक्तेन मूलमन्त्रं यथाशक्ति जपित्वा स्वपुरतः श्यामलाचक्रं संस्थाप्य ऐं समस्तसिद्धयोगिनीचक्रश्रीपादुकाभ्यां नमः ।

End :

त्रिपश्चाष्टदलं लिख्य कलाश्रं वसुपत्रकम् ।
चतुश्रश्च (रश्रं)भवेद्देव्यां पूजायन्त्रं वरानने ॥

Colophon :

इति श्रीलघुमातङ्गीश्वरीपूजाप्रकरणं समाप्तम् ॥

No. **5716.** ललितार्चनपद्धतिः.
LALITĀRCANAPADDHATIḤ.

Substance, paper. Size, $9\frac{3}{8} \times 7\frac{5}{8}$ inches. Pages, 293. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Saparyākalpavallī 155*a*.

Complete.

On the worship of the goddess Lalitā as a manifestation of Pārvatī.

By Cidānandanātha, the disciple of Svayamprakāśānandanātha.

Beginning :

श्रीं ह्रीं तत्र श्रीमान् साधकेन्द्रो रात्रिशेषं समुत्थायावश्यकं कृत्वा हस्तौ पादौ च प्रक्षाल्य धौतवाससी परिधायाचम्य देवतायागमन्दिरं सं-

मार्जनानुलेपनवितानाद्यैरलङ्कृत्वा स्वासनस्थः पूजामूर्तेर्माल्यमपकृष्य प्रक्षाल्य पुरतः संस्थाप्य पूर्वदिनपूजावशिष्टपुष्पैस्समष्टिविद्यया त्रिरभ्यर्च्य कर्पूरशकलैर्दन्तधावनं कारयित्वा सुगन्धिजलैर्गण्डूषं मुखप्रक्षालनं सूक्ष्मवस्त्रेण करास्यप्रोञ्छनञ्च कल्पयित्वा स्वब्रह्मरन्ध्रस्थश्वेतसहस्रदलकमलकर्णिकायां शिवरूपिणं श्रीगुरुरूपिणं ध्यायेत् ॥

* * * *

Colophon :

इति श्रीमत्स्वयंप्रकाशानन्दनाथचरणारविन्दद्वन्द्वान्तेवासिना श्रीचिदानन्दनाथेन विरचितायां ललितार्चनपद्धत्यां गुरुध्यानादिन्यासान्तसंग्रहो नाम पूर्वपरिच्छेदः ॥

End :

विस्तरतः कर्तुं सामर्थ्यं देशकालं च लब्धं वापि अलभ्यभावेन कार्येति शिवशासनम् । तस्मात् सामर्थ्यञ्च देशकालाद्यलाभ एवायं सङ्कुचितः पूजावि(धिः) । एवं नित्यक्रमेण पूजयितुः सर्वसिद्धिर्भवेत् ; अमङ्गलमपि मङ्गलं स्यात् ॥

इति श्रीचक्रपूजाविधिः ॥

श्रीचिदानन्दनाथेन कृतायां देशिकाज्ञया ।
ललितार्चनपद्धत्यां परिच्छेदस्तथोत्तरः ॥

Colophon:

इति श्रीमत्स्वयंप्रकाशानन्दनाथचरणारविन्दद्वन्द्वान्तेवासिना श्रीचिदानन्दनाथेन विरचितायां ललितार्चनपद्धत्यामर्चनक्रमो नाम उत्तरपरिच्छेदः ॥

No. 5717. वरिवस्यारहस्यम्—सव्याख्यानम्.

VARIVASYĀRAHASYAM WITH COMMENTARY.

Pages, 115. Lines, 20 on a page.

Begins on fol. 1*b* of the MS. described under No. 5638.

First and second parts complete.

The name of the work means the secret of worship. It deals with the Śrīcakra and Śrīvidyā as appertaining to the worship of Śakti.

By Bhāsurānandanātha also called Bhāskararāya, son of Gambhīrarājabhāratī and pupil of Nṛsimhānandanātha.

Beginning:

विद्यानां च मनूनां मनुसङ्ख्यानां च विद्यानाम् ।
उपदेष्टा जयति तरां नरसिंहानन्दनाथगुरुः ॥
वरिवस्यारहस्याख्यो ग्रन्थो यत्स्वेन निर्मितः ।
तत्र दुर्घटशब्दानामर्थस्सङ्क्षिप्य कथ्यते ॥

तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् । आचार्यवान् पुरुषो वेद इत्यादिश्रुत्या गुरूपसदनस्य तत्त्वज्ञानजनकत्वात् . . . . . विघ्नविघाताय स्तुवन् सम्प्रदायं तदाज्ञयैव प्रवर्तयति—

* * * *

इममेवार्थं श्लोकद्वयेनाह—

नैसर्गिकी स्फुरत्ता विमर्शरूपास्य वर्तते शक्तिः ।
तद्योगादेव शिवो जगदुत्पादयति पाति संहरति ॥

इहोत्पादनादित्रयं तिरोधानानुग्रहयोरुपलक्षणम् ।

End:

मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्त इति वचनादन्ते मङ्गळमारचयति—

अकथासनं ह ळक्षान्तरं समासाद्य मामकं ज्ञानम् ।
मामकमेवानन्दं मह्यं ददतो जयन्ति गुरुचरणाः ॥

* * * *

गुरुचरणैकसहायो भास्कररायो जगन्मातु
वरिवस्यातिरहस्यं वीरनमस्यं प्र(णि)जगाद ॥

वीरैः अहमिरणं गच्छे इदमो वैरिणो नाशं कुर्वाणैः परापञ्चदशिकादौ प्रसिद्धेरिति सर्वमनवद्यम् ॥

Colophon:

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणसर्वतन्त्रस्वतन्त्रश्रीनृ- सिंहानन्दनाथचरणारविन्दमिळिन्देन श्रीमद्गम्भीरराजभारतीदीक्षितात्मजेन भास्कररायापरनाम्ना भासुरानन्दनाथेन प्रणीतं वरिवस्यारहस्यं सव्याख्यं समाप्तिमगमत् ॥

No. 5718. वरिवस्यारहस्यम्—सव्याख्यम्.

VARIVASYĀRAHASYAM WITH COMMENTARY.

Substance, paper. Size, 9¾ × 3¾ inches. Pages, 74. Lines, 13 on a page. Character, Telugu. Condition, good. Appearance, old.

The second part only, complete.

Same work as the above.

No. 5719. वामपूजाविधानम्.

VĀMAPŪJĀVIDHĀNAM.

Pages, 27. Lines, 7 on a page.

Begins on fol. 176*a* of the MS. described under No. 745.

Complete.

On the worship of Śakti in accordance with the Vāmācāra views.

Beginning:

ब्राह्मे मुहूर्ते उत्थाय गुरुचरणारविन्दे नमस्कृत्य नवीनमार्ताण्डमण्डलम- यूखाविराजमानां श्रीमत्त्रिपुरसुन्दरीं ध्यायन् बहिर्निर्गत्य दन्तधावनपूर्वकं स्नानं परिसमाप्य तन्त्रसन्ध्यामाचरेत् । मूलमन्त्रेण त्रिराचम्य ।

End:

ह्रां नित्यक्लिन्ने मदद्रवे स्वाहा—नि+मः । ओं क्रां ब्रे क्रों त्रीं ध्रो क्रौं क्रौं स्वाहा—भेरु+मः । ह्रीं वह्निवासिन्यै नमः—वर्मो+मः । ओं ह्रां फट् क्रों नित्यक्लिन्ने मदद्रवे स्वाहा ॥

No. 5720. वामाचारसिद्धान्तसङ्ग्रहः.

VĀMĀCĀRASIDDHĀNTASAṄGRAHAḤ.

Pages, 4. Lines, 19 on a page.

Begins on fol. 55*a* of the MS. described under No. 426. Complete.

A treatise in support of the Vāmācāra sect of Śakti worship: by Brahmānandanātha.

Beginning:

तस्य भासा सर्वमिदं विभातीति श्रुतिर्जगौ ।
सच्चिदानन्दरूपं तद्ब्रह्माद्वयमुपास्म्यहं(स्महे) ॥

इह खलु श्रीकाशीस्थेन भट्टोपनामकेन काशीनाथाख्यविदुषा वामाचारखण्डनग्रन्थः कृतः । ततस्तैः भाग्यनगरं प्रति प्रेषितः । तं दृष्ट्वा तत्रस्थास्सर्वे उपासकाः सन्दिहाना हसन्तः कञ्चिद्दयालुं पुरुषधौरेयमन्वेषमाणाः कस्मिंश्चित् समये गोदातीरस्थं ब्रह्मानन्दनाथनामानं विद्वांसं प्राप्य प्रार्थयामासुः । तथा तेन ब्रह्मानन्दनाथेन तेषां सन्देहनिवृत्त्यर्थं तदीयग्रन्थखण्डनपूर्वकं वामाचारसिद्धान्तसङ्ग्रहो नाम ग्रन्थो रच्यते । . . . . ननु.

श्रुतिस्मृती ममैवाज्ञे(य)स्ते उल्लङ्घ्य वर्तते ।
आज्ञाद्रोही मम द्वेषी न भक्तो न च मे प्रियः ॥

इति वचनात् श्रुतिसूत्रागमान् पूर्वचार्यांश्च उल्लङ्घ्य वामाचारप्रकटनमयुक्तमेवेति चेन्न; तेष्वेव श्रुत्यादिषु न कुर्यात्पशुसम्भाषणम् । आत्मरहस्यं वदेत्— * * * *
इत्यादिवाक्यैः गुरुसंप्रदायरहितानां मलिनधियां देवतान्तरोपासकानां पशूनामेव तन्निषेधः श्रूयते न त्रिपुरसुन्दर्युपासकानामित्यनवद्यम् ।

End:

तस्माद्वामाचारस्य त्रैवर्णिकाधिकारित्वं श्रुतिसूत्रेतिहासपुराणादेव(ग)मादिभिस्सर्वेष्वपि युगेषु सिद्धमित्यलमतिप्रसङ्गेन ॥

Colophon:

इति गोदावरीतीरस्थेन श्रीब्रह्मानन्दनाथेन विरचितो वामाचारसिद्धान्त-सङ्ग्रहः सम्पूर्णमगमत् ॥

No. **5721.** वामाचारसिद्धान्तः.

VĀMĀCĀRASIDDHĀNTAḤ.

Pages, 38 Lines, 20 on a page.

Begins on fol. 80*b* of the MS. described under No. 524.

Contains only the first Paṭala.

On the doctrines of the Vāmācāra sect of Śakti-worshippers: by Mahēśvarācārya.

Beginning:

श्रीविश्वेश्वरसंज्ञकं स्वजनकं वेदागमार्थानुगं
तत्पादस्मृतिसङ्ग्रहप्रकरणान्दृष्ट्वा पुराणांस्तथा ।
कुर्वेऽहं गुरुसेवको लघुतरं ग्रन्थोत्तमं निर्णयं
वेदाचारपुराणतन्त्रनियमार्थानां सुबोधं परम् ॥

परमकारुणिकेन महेश्वराचार्यवर्येण श्रीगुरुणोपादिष्टः कुळधर्मानभिज्ञः धर्मशास्त्रनिपुणः कश्चिच्छिष्यः सन्दिहानः . . . . भो भगवन् मम मोक्षमार्गोपदेशमन्त्रोऽत्रभवता दत्तः। तस्य पद्धतिमप्युपादिशेति विज्ञापितस्सन् श्रीगुरुः शिष्याय तां पद्धतिमर्पयाति । ब्राह्मे मुहूर्ते इत्यारभ्य सामान्यार्घ्यपर्यन्तं कल्पयित्वा अथ क्रमप्राप्तं कलशस्थापनं कुर्यादित्याह । तल्लक्षणमाह—

कलां कलां गृहीत्वा वै देवानां विश्वकर्मणा ।
निर्मितोऽयं सुरैरस्मात्कलशस्तेउच्य(न कथ्य) ते ॥

End:

इत्यनेन सुगोप्यत्वं सुसमी(पो)पायत्वं भुक्तिमुक्तिप्रदायकत्वञ्च सूचितं मत्वा शिष्योऽपि हर्षोल्लासितवचनेन गद्गदवागाचार्यं प्रदक्षिणपूर्वं प्रणिपत्य

वेदागमस्मृतिपुराणवाक्यैः भगवत्कृपाकटाक्षावलोकनैः कृतार्थोऽस्मि निस्सन्देहोऽहमिति कुळधर्मदृढतरो बभूवेति शिवम् ॥

* * * *

Colophon:

इति श्रीमहेश्वराचार्यविरचिते प्रथमद्रव्यसिद्धान्तो नाम प्रथमः पटलः ॥

No. 5722. शक्तिन्यासः.

ŚAKTINYĀSAḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 191*a* of the MS. described under No. 124.

Complete.

Regarding the ceremonial process of touching certain parts of the body, uttering at the time certain appropriate words forming the Dēvīmantra.

Beginning:

अथ शक्तिन्यासः—

तत्र प्रथमं जगच्छून्याकारं निरालम्बं ध्यात्वा हुं पृथिव्यै नम इति स्वासनाधः पृथिवीं संपूज्य, स्वासनं वामहस्तेन स्पृशन् भुवनेश्वरीबीजं सप्तवारं जपित्वा ओं ऐं ह्रीं श्रीं जयायै ।

End:

यथाशक्ति जपित्वा रक्तपुष्पैः स्वशिरसि ऐं ई सौः आत्मदेहाय नम इति गन्धाक्षतैः [इति]सप्तधा संपूज्य धूपदीपौ नैवेद्यं तस्मिन् त्रैपुरे देहे ऐं ई सौः इति वनिताक्षोभकरीं महाकामकळां ध्यायेत् ॥

Colophon:

इति शक्तिन्यासविधिस्समाप्तः ॥

No. 5723. शाक्तसन्ध्याविधिः.

ŚĀKTASANDHYĀVIDHIḤ.

Pages, 4. Lines, 14 on a page.

Begins on fol. 57*a* of the MS. described under No. 424.

Complete.

On the morning and evening prayers to be adopted by the worshippers of the goddess Śakti

Beginning:

ऐं आत्मतत्त्वं स्वधा । क्लीं विद्यातत्त्वं स्वधा । सौः शिवतत्त्वं स्वधा । इत्याचम्य, बालया प्राणानायम्य, न्यासं कृत्वा, वामकरे जलं निक्षिप्य, अं वं रं यं हं इति पञ्चभूबीजैर्जलं विशोध्य बिन्दुमुद्रायां त्रिपुरावागीश्वरीश्रीपादुकां पूजयामीति मार्जनत्रयं कृत्वा ।

End:

एवं ध्यात्वा ऐं क्लीं सौः त्रिपुरसुन्दरीं विद्महे कामेश्वरी धीमहि । तन्नोऽनङ्गः प्रचोदयात् । यथाशक्ति जपं कुर्यात्.

Colophon:

इति सन्ध्याविधिः ॥

No. 5724. शिवसमयाङ्कमातृका.

ŚIVASAMAYĀṄKAMĀTṚKĀ

Pages, 251. Lines, 25 on a page.

Begins on fol. 1*b* of the MS. described under No. 5563.

Complete.

An exhaustive treatise containing details regarding several important topics connected with the worship of Śakti.

Beginning:

प्रकाशानन्दात्मा जयति निजतत्त्वं परशिवा
निजेच्छाविर्भूतव्यवहितबहिर्भावविभवा ।

इयं चेच्छाशक्तिस्समरसपरानन्दलहरी
दयालुर्दिव्याज्ञा शिवसमयसाम्राज्यघटनी ॥

* * * *

शिवोदितक्रमसमयप्रपञ्चिकां मिताक्षरां शिवसमयाङ्कमातृकाम् ।

* * * *

तत्त्वैस्संशोध्य चाचम्य त्वाचान्तो मार्जयेत्पुनः ।
मार्तण्डमण्डले देवीं चिन्तयेच्चिन्तितार्थदाम् ॥

* * * *

एवं सञ्चिन्त्य देवेशीं वाग्भवां श्रीमहापदम् ।
त्र्यादिं पुरं समुच्चार्य सुन्दरीति पदं वदेत् ॥

End:

षष्टिर्वर्णा भवन्त्येव मोहाद्वर्गा दिने दिने ।
एवं जपन् कृतजपः षड्दिनादित्यसौ भवेत् ॥

निश्शेषागमजलराशिमन्थनेन श्रीशिङ्गक्षितिपतिना विनिर्मितायाम् ।
विज्ञानामृतरसधाम षोडशोऽयमुल्लासश्शिवसमयाङ्कमातृकायाम् ॥

* * * *

शब्दाद्या विषयास्स्पृशन्तु नितरां नाथाज्ञया मामितो
यद्वा सन्निहिता भवन्तु सततं तेऽमी भवेयुर्यदि ।
भृङ्गालिध्वनिरिक्षुवल्लिविकसत्पद्मादिगन्धत्विषः
स्पर्शश्चैत्रकचन्द्रपादशिशिरो रूपं जपापाटलम् ॥

No. 5725. शिवसमयाङ्कमातृका.

ŚIVASAMAYĀṄKAMĀTṚKĀ.

Pages, 85. **Lines,** 14 on a page.

Begins on fol. 273*a* of the MS. described under **No.** 5617.

Ullāsas 1 to 16 complete.

Same work as the above.

No. 5726. शिवसमयाङ्कमातृका.
ŚIVASAMAYĀṄKAMĀTṚKĀ.

Pages, 255. Lines, 20 on a page.

Begins on fol. 128*a* of the MS. described under No. 5694.

Complete.

Same work as the above.

No. 5727. शिवार्चनशिरोमणिः.
ŚIVĀRCANAŚIRŌMAṆIḤ.

Substance, palm-leaf. Size, $10\frac{1}{8} \times 1\frac{5}{8}$ inches. Pages, 346. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Incomplete.

Contains Ullāsas 16 to 21. The sixteenth Udrēka from the Parānandatantra is quoted herein and referred to in the colophon in a wrong place.

On the conduct of the worship of Śakti as given in various Āgama treatises.

There are two colophons at the end, of which one attributes the authorship of the work to Śrīnārāyaṇānandanātha, a disciple of Samvidānandanātha, and the other attributes it to Brahmānandanātha, a disciple of Śrīlōkānandanātha.

Beginning:

अथ संक्षेपतो बालादीक्षा लिख्यते । वक्ष्यमाणप्रकारेण मण्टपान्तं प्रविश्य, अनुज्ञामादाय, गुरुवरणादि अभ्युदयं कृत्वा, ततः मण्टपं वीक्षणादिचतुस्संस्कारैस्संस्कृत्य, मण्टपमलङ्कृत्य, धूपयित्वा, वास्त्वीशदीपनाथपूजां कृत्वा, भूतोत्सारणं विधाय, भूमिं प्रार्थ्य,

* * * *

Colophon:

इति श्रीलोकानन्दनाथशिष्येण ब्रह्मानन्दनाथेन विरचिते शिवार्चनशिरोमणौ षोडशोल्लासः ॥

End:

इति स्वगुरुं प्रणम्य, ततः शिष्यः श्रीगुरोरनुज्ञां लब्ध्वा, फलादिषड्रसोपेतं ब्राह्मणान् भोजयेत् ॥

इति संक्षेपतो दीक्षाविधिस्समाप्तः ॥

पूर्णदीक्षाक्रमो देवि यस्य कस्यापि नोच्यते ।
द्वादशाब्दं गुरुश्शिष्यं परीक्ष्य क्रम मु(उ)च्यते ॥
पूर्णदीक्षाविधिस्सम्यक् मया ते संप्रकाशितः ।
समासेन वरारोहे किं भूयश्श्रोतुमिच्छसि ॥

Colophon:

इति परानन्दतन्त्रे सर्वागमोत्तमे सपादलक्षग्रन्थे मन्त्रखण्डे मोक्षद्वितीयपादे द्वात्रिंशद्दीक्षासंपुटितसङ्क्षेपक्रमो नाम षोडशोद्रेकः ॥

Colophon:

इति श्रीपूर्णविद्येश्वरीसंविदानन्दनाथशिष्येण श्रीनारायणानन्दनाथेन विरचिते शिवार्चनशिरोमणौ एकविंशोल्लासः ॥

Colophon:

इति श्रीलोकानन्दनाथशिष्यब्रह्मानन्दनाथविरचिते शिवार्चनशिरोमणौ(एक)विंशोल्लासः ॥

No. 5728. शिष्यलक्षणम्.
ŚIṢYALAKṢAṆAM.

Pages, 6. Lines, 9 on a page.

Begins on fol. 41*a* of the MS. described under No. 435
Complete.
On the requisite characteristics of a good Śākta disciple.

Beginning:

श्रीदेव्युवाच—

भगवन् श्रोतुमिच्छामि शिष्यस्य शुभलक्षणम् ।
उपदेशक्रमं तस्य दीक्षाभेदं च मे वच(द) ॥

ईश्वर उवाच—

शृणु देवि प्रवक्ष्यामि यन्मां त्वं परिपृच्छसि ।
तस्य श्रवणमात्रेण जायते दिव्यभावना ॥

वेदाभ्यासैकनिरतं गुरुभक्तिसमन्वितम् ।
सर्वलक्षणसंपन्नं शमादिगुणसंयुतम् ॥
दृढव्रतं सदाचारं साधुसज्जनसंमतम् ।

* * * *

इत्यादिलक्षणोपेतं गुरुः शिष्यं परिग्रहेत् ।
कौलदीक्षागुरुस्सम्यक् चतुस्स्तम्भैर्विराजितम् ॥
मण्टपं कारयेत्सम्यग्वितानाद्यैरलङ्कृतम् ।

End :

शिष्यमाहूय दीक्षार्थं यथावत्क्रियतां गुरुः ।
बल्युद्वासनकाले तु उच्छिष्टं देवि दीयताम् ॥
श्रीपात्रबिन्दुमुद्धृत्य स्वात्मपात्रेण पूरयेत् ।
पूर्णाभिषेकसिद्ध्यर्थं दीपेन सह दीयताम् ॥

तत्रादौ सङ्कल्पं कृत्वा, ब्राह्मणैस्सह पुण्याहं वाचयित्वा, गुरुवरणं कुर्यात् । अमुकगोत्रोत्पन्नोऽहममुकशाखाध्यायिना अभिषेकपूर्वकं श्रीविद्योपदेशार्थं गुरुत्वेन त्वामहं क(वृ)णे। वृतोऽस्मि करिष्यामीति गुरुर्वदेत् । तथा यथोचितं कर्म कुरुष्वेति गुरुं प्रति शिष्यो वदेत् । करवाणीति गुरुर्वदेत् । गुरुः दीक्षादिकं सर्वं कुर्यात् ।

No. **5729.** श्रीचक्रपूजा.

ŚRĪCAKRAPŪJĀ.

Pages, 35. Lines, 7 on a page.

Begins on fol. 14*a* of the MS. described under No. 5445.

Complete.

On the worship of the Śrīcakra.

Beginning :

श्रीचक्रपूजाप्रकारः—

सरस्वत्यै नमः । गुरूपदिष्टप्रकारेण ऋष्यादिकरपञ्चाङ्गन्यासं कृत्वा

देवीं ध्यात्वा पूजामारभेत् । स्वदक्षिणभागे त्रिकोणवृत्तचतुरश्रमण्डलं विलिख्य, गन्धादिभिरभ्यर्च्य, तदुपरि कलशस्याधारं प्रतिष्ठाप्य, ऐं अग्निमण्डलाय धर्मप्रदकलशात्मने श्रीमहात्रिपुरसुन्दर्या अर्घ्यपात्राधाराय नमः ।

End:

ततो वर्णन्यासः—

मूर्ध्नि गुह्ये च हृदये नेत्रत्रितय एव च ।
श्रोत्रयोर्युगले चैव मुखे च भुजयोस्तथा ॥
पृष्ठजान्वोश्च नाभौ च न्यसेत्पञ्चदशाक्षरीम् ।
एवं न्यासं कृत्वा भूर्भुवस्सुवरोमिति दिग्बन्धः ॥

ध्यानम्—

सकुङ्कुमविलेपनामलिकचुम्बिकस्तूरिकां
समन्दहसितेक्षणां सशरचापपाशाङ्कुशाम् ।
अशेषजनमोहिनीमरुणमाल्यभूषाम्बरां
जपाकुसुमभासुरां जपविधौ स्मराम्यम्बिकाम् ॥
ततो मूलमन्त्रं जपेत् ॥

No. 5730. श्रीचक्रपूजाविधानम्.

ŚRĪCAKRAPŪJĀVIDHĀNAM.

Pages, 27. Lines, 24 on a page.

Begins on fol. 81*a* of the MS. described under No. 2447.

Complete.

Similar to the above.

Beginning:

प्राणानायम्य, सङ्कल्प्य, यथाशक्ति सम्भवद्भिरुपचारैस्सम्भवद्भिर्नियमैश्च गुरुदेवताप्रीतिं काममान इष्टदेवतायजनं करिष्य इति सङ्कल्प्य, ततो हेतुकलशस्थापनविधिः ।

वस्तुधानीचा(न्याश्वा)गमने चर्मान्वाकं पठेद्बुधः। चर्मावभिन्दन्ति महीयामेवैषु दधति इति पठित्वा योगिनीहस्ते स्थितं कलशं गृहीत्वा, वामदेवाय फं नम इति सप्तवारमभिमन्त्र्य।

End:

स्वयं पूर्णपात्रं स्वीकृत्य, सर्वाणि पात्राणि प्रक्षाल्य, सङ्गृह्य गोपयित्वा यथासुखं विहरेत ॥

Colophon:

श्रीचक्रपूजाविधिस्समाप्तः ॥

No. **5731.** श्रीचक्रलेखनप्रकारः.

ŚRĪCAKRALĒKHANAPRAKĀRAḤ.

Pages, 23. Lines, 7 on a page.

Begins on fol. 70*a* of the MS. described under No. 3472

Complete.

On the construction of the Śrīcakra for conducting therewith the worship of Śakti.

Beginning:

अथ श्रीविद्याचक्रलेखनप्रकार उच्यते—

बिन्दुत्रिकोणवसुकोणदशारयुग्मं मन्वश्रिनागदळसंयुतषोडशारम्।
वृत्तत्रिभूपुरयुतं परितश्चतुर्द्वाः श्रीचक्रमेतदुदितं परदेवतायाः॥

. . क्तरीत्या विशदीक्रियते—

षण्णवत्यङ्गुळायामं सूत्रं प्राक्पश्चिमायतम्।
चतुर्भिरङ्गुळैश्शिष्टैस्संवृतानि च(तं च स)भूपुरम्॥
अन्तर्नवाङ्गुळं ज्ञेयं मध्ये सूत्रश्च षोडश।
एकादशाङ्गुळं ज्ञेयमष्टपत्रं समालिखेत्॥

End:

ऐं, क्लीं, सौः, अं, आं, सौः।
इति चक्रनायकबीजानि तत्तदावरणपुरतो लिखेत्॥

Colophon:

इति श्रीचक्रलेखनीयक्रमस्संपूर्णः ॥

No. 5732. श्रीचक्रविवरणम्.

ŚRĪCAKRAVIVARAṆAM.

Pages, 18. Lines, 7 on a page.

Begins on fol. 17*a* of the MS. described under No. 745.

Complete.

Gives a description of the Śrīcakra, otherwise known as Śrīvidyācakra.

Beginning:

अथ श्रीविद्याचक्रराज उच्यते—

बिन्दुत्रिकोणवसुकोणदशारयुग्ममन्वश्रिनागदलसंयुतषोडशारम् ।

वृत्तत्रयं च धरणीसदनत्रयं च श्रीचक्रमेतदुदितं परदेवतायाः ॥

तत्र दशारयुग्मं दशकोणद्वयं मन्वश्रं चतुर्दशकोणम् ।

End:

अस्या अन्याक्षराणि नामानि च सन्ति । तपयोः तवर्गपवर्गयोः द्वितीयं द्वितीयाक्षरादिनामानि त्यजेत् । न सन्तीत्यर्थः । अन्ते यादिक्षान्ते नवमं ळकारादिमं नास्ति ॥

No. 5733. श्रीचक्राधिष्ठानदेवताश्लोकाः.

ŚRĪCAKRĀDHIṢṬHĀNADĒVATĀŚLŌKĀḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 29*a* of the MS. described under No. 3472.

Wants beginning and end.

Stanzas giving the name of the various deities presiding over the various parts of the Śrīcakra, with the appropriate parts assigned to each of them in order.

Beginning:

तस्योपरि मणिफलके तारुण्योत्तुङ्गपीकुचकुम्भाम्।
सङ्क्षोभिणीप्रधानां शान्तिं विद्रावयन्तु वशमुद्राः॥

End:

सदनन्योपरितनां सर्वानन्दमयनामके बिन्दौ।
पञ्चब्रह्माकारं . . . . . . णम्॥

No. **5734** श्रीदेवीपूजाविधानम्.
ŚRĪDĒVĪPŪJĀVIDHĀNAM.

Pages, 274. Lines, 7 on a page.

Begins on fol. 26*a* of the MS. described under No. 745.

Complete.

On the worship of the goddess Śakti.

Beginning:

अथ प्रातस्समुत्थाय गुरून् नत्वा स्वनामभिः।
ब्रह्मरन्ध्रे सहस्रारे कर्पूरदलगो गुरुः॥
नताभयकरो नित्यं ब्रह्मरूपी सदाशिवः।

श्रीविद्यामन्त्रसाधकोऽत्र ब्राह्मे मुहूर्ते शयनादुत्थाय गृहाद्बहिर्निर्गत्य कृतदन्तधावनः शौचाचमनादिकं निर्वर्त्य शुद्धे शुक्ले वाससी परिधाय . . . .

ओं परप्रकाशानन्दनाथाय नमः, ओं परमशिवोत्तमानन्दनाथाय नमः, ओं पराशक्तिपराम्बिकायै नमः।

End:

येन देहेऽपि विन्यस्य शक्तितुल्यो नरो भवेत्।
कुपितः कुरुते यागी त्रैलोक्यस्यापि पातनम्॥
शक्तिन्यासकृतो वीरो नमस्कारेण शङ्कर।
निधनं कुरुते साक्षात्पाषाणप्रतिमादिषु॥

इति महाशक्तिन्यासः ।

अग्रबिन्दुपरिकल्पिताननामन्यबिन्दुरुचिरां तनुद्वयाम् ।
नादबिन्दुरसनाकळास्पदां नौमि ते परशिवे परां कळाम् ॥
मिहिरबिन्दुमुखीं दधदुल्लसच्छशिहुताशनबिन्दुयुगश्रियम् ।
महपरार्धकळारशनास्पदां भजत तत्त्वमिमां परमां कळाम् ॥

इति ध्यानं पञ्चोपचाराः ॥

No. 5735. श्रीविद्यापूजाविधानम्.

ŚRĪVIDYĀPŪJĀVIDHĀNAM.

Pages, 4. Lines, 10 on a page.

Begins on fol. 242*a* of the MS. described under No. 124.

Complete.

Similar to the one described under No. 5729.

Beginning:

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ अस्माकं सहकुटुम्बानां . मम . . र्थमिष्टदेवतामुद्दिश्य इष्टदेवताप्रीत्यर्थं यावच्छक्यध्यानावाहनादिषोडशोपचारपूजां करिष्ये । कलशपूजां कुर्यात् । पीठपूजां करिष्ये । आधारशक्त्यै नमः कूर्माय नमः ।

* * * *

इति ध्यात्वा प्राणप्रतिष्ठां कुर्यात् ।

महापद्मवनान्तस्थे कारणानन्दविग्रहे ।
सर्वभूतहिते मातरेह्येहि परमेश्वरि ॥

आवाहिता भव ।

End:

देहस्थाखिलदेवता गजमुखाः क्षेत्राधिपा भैरवा
योगिन्यो वटुकाश्च यक्षपितरो बेतालकाश्चेटकाः ।

अन्ये दिक्चरखेचरा निशिचरा भूताः पिशाचोरगाः
तृप्तास्स्युः कुलपुत्रकस्य पिबतः पानं सदीपं चरुम् ॥

एवं शान्तिः ॥

Colophon :

इति पूजाविधानं सम्पूर्णम् ॥

No. **5736** श्रीविद्याम्नायोपनिषद्.

ŚRĪVIDYĀMNĀYŌPANIṢAD.

Pages, 8. Lines, 8 on a page.

Begins on fol. 44*a* of the MS. described under No. 514.

Complete.

Regarding Śrīvidyā : in the style of an Upaniṣad.

Beginning :

अथ श्रीविद्यामनोराम्नाय उपदिश्यते—

ब्रह्मचारिणे शान्ताय गुरुभक्ताय यथा विद्यामनुः ! कस्मिन्नुद्भवः ! तत्स्वरूपं ब्रूहीति होवाच । इह श्रृणु सौम्य ब्रह्मवाचकस्तु प्रणवो वर्तते । स पुरा प्रपञ्चाधिष्ठानाविद्यासहितत्रिमात्रोपाहितः । का मात्रा ?

* * * *

नान्येव परा पश्यन्ती मध्यमा श्रुतिगोचरा ।
मध्यमाद्योतितार्था हि पश्यन्ती ध्वनिः परा चेत्येवमर्थः(!) ॥

End :

कलशः कुम्भ इत्येकार्थवाचक इव मन्त्रो गुरुरित्येकार्थवाचकन्त्विह मन्त्रादि तथा नेति बुद्ध्या पुरुषार्थवान्न भवेत् ॥

इति तृतीयः खण्डः ॥

Colophon :

इत्युत्तरतापिनीखण्डसम्पूर्णः ॥
इत्याम्नायोपनिषत्समाप्ता ॥

No. 5737. श्रीविद्यारत्नसूत्रम्.

ŚRĪVIDYĀRATNASŪTRAM.

Substance, palm-leaf. Size, 15⅝ × 1⅛ inches. Pages, 6. Lines, 6 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Begins on fol. 9*a*. The other works herein are Namaskāradaśaka 1*a*, Daśaślōkī 1*b*, Rahasyayāgalakṣaṇa 3*a*, Saubhāgyaratnākara 7*a*, Jyautiṣaviṣaya 15*a*, Indrākṣīstrōtra 19*a*, Dhūmravārāhīmantra 23*a*, Śarabhasāluvamantra 27*a*, Hanūmanmālāmantra 29*a*, Agnikavaca 30*b*, Sudarśanamālāmantra 31*b*, Vandhyākalpa 36*a*, Pratyaṅgirāmantrapārāyaṇa 46*a*.

Complete.

A work giving the mystic meaning of each of the letters of the Śrīvidyā-mantra, the deities represented by those letters and also the explanation of certain aphorisms declaring the main principles of the Śākta religion: by Gauḍapādācārya, disciple of Śukayōgīndra.

Beginning:

अथ शाक्तमन्त्रागमजिज्ञासा। आत्मैवाखण्डाकारः। चैतन्यस्वरूपा शक्तिः। सैव विद्या। तत्त्वत्रयेणाभिधा।

End:

अथ ह्रस्वाक्षरषट्कदीर्घपञ्चसमुच्चतथै(यै)व सङ्ख्यापरा शाम्भवी। अनुत्तरसङ्केतप्रधानविद्या सप्तदशवर्णविशिष्टा। अथैतासां परिवाराणामनुपरिवारा असङ्ख्याताः॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुकयोगीन्द्रशिष्यश्रीमद्गौडपादाचार्येण विरचितानि सूत्राणि समाप्तानि॥

गौडपादार्यसूत्राणि पलङ्कचन्वयसम्भवः।
(वि)लिलेखाच्चनो नाम रौद्यब्दे भानुवासरे॥

No. 5738. श्रीविद्यारत्नसूत्रम्.

ŚRĪVIDYĀRATNASŪTRAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 159*a* of the MS. described under No. 673.

Complete.

Same work as the above.

No. 5739. श्रीविद्यारत्नसूत्रम्.

ŚRĪVIDYĀRATNASŪTRAM.

Pages, 5. Lines, 6 on a page.

Begins on fol. 90*a* of the MS. described under No. 537.

Complete.

Same work as the above.

No. 5740. श्रीविद्यारत्नसूत्रम्.

ŚRĪVIDYĀRATNASŪTRAM.

Pages, 6. Lines, 5 on a page.

Begins on fol. 60*a* of the MS. described under No. 29.

Incomplete.

Same work as the above.

No 5741. श्रीविद्यारत्नसूत्रदीपिका.

ŚRĪVIDYĀRATNASŪTRADĪPIKĀ.

Pages, 27. Lines, 23 on a page.

Begins on fol. 142*a* of the MS. described under No. 3907.

Complete.

A commentary on the Śrīvidyāratnasūtra of Gauḍapādâcārya : by Vidyāraṇyamuni.

Beginning :

श्री[देवि]विद्या(रत्न)सूत्राणां वाक्यार्थप्रतिपादने ।
भगवत्याः प्रसादेन क्रियते दीपिका मया ॥

सा भगवती जगत्सृष्ट्वेदं तस्मिन् देवादीनुत्पाद्य तेषामनुग्रहाय स्व-भक्तानां पुरुषार्थाय भण्डासुरसंहरणायापि च ब्रह्मणः प्रकाशा चिद्देवी-रूपेणाभिव्यक्ता सती . . . .
तदीयशास्त्रप्रकटनार्थं तदुपासकानां ज्ञात्वानुष्ठानतया पुरुषार्थाय भगवता गौडपादेन तद्रहस्यं सर्वमन्त्ररत्नसूत्रैः त्रि(क्र)तमादि(मथ)शाक्तमन्त्रा-(गम)जिज्ञासेति । स सूत्रार्थो वर्ण्यते प्रसादेन तस्याः । अल्पाक्षरम-सन्दिग्धं सारवद्विश्वतोमुखमिति सूत्रलक्षणम् ।

End:

अनुत्तरसङ्केतप्रधानविद्या सप्तदशवर्णविशिष्टा ।
अथैतासां परिवाराणामनुपरिवारा असङ्ख्याताः ॥

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीविद्यारण्यविरचितरत्नसूत्रदीपिका समाप्ता ॥

No. **5742.** श्रीविद्यारत्नसूत्रदीपिका.

ŚRĪVIDYĀRATNASŪTRADĪPIKĀ.

Pages, 37. Lines, 16 on a page.

Begins on fol. 116*a* of the MS. described under No. 424.

Complete.

Same work as the above.

In the colophon at the end of this manuscript, this work is attributed to Śrīśaṅkarāraṇyamuni, a disciple of Śrī-Vidyāraṇya muni.

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्विद्यारण्यमुनिवर्यशिष्यश्री-शङ्करारण्यमुनिकृता श्रीविद्यारत्नदीपिका समाप्ता ॥

No. 5743. श्रीविद्याविलासः.
ŚRĪVIDYĀVILĀSAḤ.

Substance, paper. Size, 13 × 8⅛ inches. Pages, 398. Lines, 21 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

A work on Śrī-Vidyā : by Gaganānanda, a disciple of Śaṅkarācārya.

The subjects treated of herein are :—

१. उपासकदिनचर्या.
२. सुन्दरीपूजा.
३. प्राणायामः.
४. श्रीचक्रपूजा.
५. आवरणपूजा.
६. पारायणक्रमः.
७. पुरश्चर्याविधिः.

Beginning:

शिञ्जन्नूपुरपादं धृतपाशाङ्कुश[कु]सु[म]बाणकोदण्डम् ।
करुणामसृणापाङ्गं कैवल्यायास्तु किंचन महो नः ॥

* * * *

अथ यथाविधि गुरोराज्ञां विद्यां च लब्ध्वा अभिषेकं पूर्णाभिषेकं च देवीमुपासीत । तत्र श्रीमान् साधकेन्द्रः रजनीतुरीययामे विबुध्य, आवश्यकं कृत्वा, हस्तौ पादौ प्रक्षाळ्याचम्य, शुचिश्शुद्धासने आस्थाय, स्वशिरसि सहस्रदळकमलकर्णिकायां श्रीगुरुं शान्तं सुप्रसन्नं त्रिनेत्रं ज्ञानमुद्रापुस्तकाभयकरं वामाङ्कगतया देव्या रक्तवर्णया रक्तवस्त्राभरणभूषितया वामकरधृतलीलाकमलया दक्षिणकरेण आलिङ्गितं शिवरूपिणं गुरुं ध्यात्वा तत्पादुकाविद्यया त्रिस्सम्पूज्य, मनसा पूजयेत् ।

End:

लक्षणासङ्ग्रहे—

अधोमुखे वामहस्ते ऊर्ध्वास्यं दक्षहस्तकम् ।
कृत्वाङ्गुलीभिस्संयोज्य संयोज्यवधि(?) वर्जयेत् ॥

एवं संहारमुद्रा स्यात् विसर्जनविधौ प्रिये ।
इति मुद्राविवरणम् ।
इत्थं विद्याविलासोऽयं श्रीशिवात् प्रथितो भुवि ।
भवताच्छिवयोः प्रीत्यै स्वशिवस्यैव भाषितम् ॥
गगनानन्दनाथेन शिवयोः प्रियसूनुना ।
रचिते श्रीविलासेऽयमुल्लासस्सप्तमोऽभवत् ॥

Colophon:

इति श्रीभगवत्पूज्यपादशिष्यगगनानन्दनाथयोगिना विरचिते श्रीविद्याविलासे सप्तमोल्लासः ॥

शालीवाहशके हिमातृकगते त्वब्देषु पुण्ये वरे
मासि प्रोष्ठपदे प्रभाकरयुते पक्षे वळक्षे हरौ ।
पञ्चम्यां रविवासरे यतिवरैश्श्रीवासुदेवेन्द्रकैः
श्रीविद्याविलसद्विलासमुदितं शास्त्रं पराम्बार्पितम् ॥

* * * *

द्वाविंशतौ परीवृत्तौ शालिवाहे नवेऽन्तिमे ।
मासि शुक्लैकादशेऽह्नि वदे श्रीरामदीक्षितैः ॥
स्वशिष्यैस्स्वसुतैरेषा लिखिता श्रीपरार्पितम् ।
श्रीविद्या(या)विलासोऽयं गगनानन्दसत्त्वतः ॥
इति श्रीविद्याविलासस्सम्पूर्णः ॥

No. **5744.** श्रीविद्याविलासः.

ŚRĪVIDYĀVILĀSAḤ.

Pages, 132. Lines, 11 on a page.

Begins on fol. 1*a* of the MS. described under No. 5610.

Ullāsas 1 to 6 complete, 7th incomplete.

Same work as the above.

No. 5745. श्रीविद्याविलासः.
SRĪVIDYĀVILĀSAḤ.

Pages, 209. Lines, 7 on a page.

Begins on fol. 169*a* of the MS. described under No. 5477.

Ullāsas 1 to 4 complete, 5th incomplete.

Same work as the above.

No. 5746. षोढान्यासः.
ṢOḌHĀNYĀSAḤ.

Pages, 2. Lines, 10 on a page.

Begins on fol. 190*a* of the MS. described under No. 124.

Complete.

On details connected with the worship of Śakti, using the Ṣōḍaśākṣarī-mantra for the purpose.

Beginning:

गुरुं गणपतिं दुर्गां वटुकं शिवमच्युतम् ।
ब्रह्माणं गिरिजां लक्ष्मीं वाणीं वन्दे विभूतये ॥

अथ मन्त्रषोढान्यसेत्सुधीः(सविधिः)—

मन्त्रषोढां ततः कुर्यात् त्रैलोक्यवशकारिणीम् ।
श्रीबालात्रिपुरायोनिः प्रासादः प्रणवस्तथा ॥
काळीवध्वङ्कुशैः कामकलाकूर्चास्त्रकैः क्रमात् ।
षोडशीमन्त्रवर्णैश्च पृथगष्टादशाक्षरी ॥

* * * *

अस्याश्च न्यसनात्सर्वे वज्रदेहा भवन्ति हि ।
सर्वैश्वर्ययुतास्ते हि जीवन्मुक्तो न संशयः ॥

अथ मन्त्रधारा यथा—श्रीं ऐं क्लीं ऐं हौं ओं क्रीं स्त्रीं क्रों ई हुं फट् ।

* * * *

प्रयोगो यथा—

तत्र गुरुवन्दनपूर्वकं प्राणायामऋष्यादिकं षडङ्गं विधाय परदेवतात्मानमात्मानं मत्वा न्यसेत् । श्रीं क्रीं २६ आं नमः शिरसि इत्यादिक्षान्तमेको न्यासः ।

End:

पूर्वषट्कस्था प्रासादबीजमुत्तरषट्कस्था कूर्चबीजं तथैवं न्यसेत् । यथा हं हुं १६ आदिक्षान्तं पञ्चमः ५ पूर्वषट्कस्था प्रणवमुत्तरषट्कस्थामस्त्रं संयोज्य तथैव न्यसेत् । यथा ओं फट् १६ आदिक्षान्तं षष्ठः ॥

Colophon:

इति वामकेश्वरतन्त्रे मन्त्रषोढान्यासः सम्पूर्णः ॥

No. 5747. संविन्माहात्म्यम्.

SAṀVINMĀHĀTMYAM.

Pages, 7. Lines, 7 on a page.

Begins on fol. 16*a* of the MS. described under No. 3472.

Complete.

This forms the 15th Kalpa of Tripurāsiddhānta.

On the mysterious influence of hemp or Cannabis Indica as an aid to mental realisations.

Beginning:

* * * *

यस्य विज्ञानमात्रेण ब्रह्मज्ञानं प्रजायते ।
इतः पूर्वं मया नोक्तं यस्य कस्यापि पार्वति ॥
कथयामि तव स्नेहात् शृणुष्वैकाग्रमानसा ।
कलञ्जं संविदित्याहुः ब्रह्मज्ञानप्रदानतः ॥
न संवित्सदृशो धर्मो न संवित्सदृशन्तपः ।
न संवित्सदृशं शास्त्रं न संवित्सदृशं मनः ॥

* * * *

कलञ्जभक्षणं देवि ये कुर्वन्ति नरोत्तमाः ।
त एव जगदीशाना जीवन्मुक्ता न संशयः ॥
न कौलिकसमो मर्त्यो न विद्यासदृशो मनुः ।
न कौलादधिकं ज्ञानं न मुक्तेरधिकं फलम् ॥
न शिवासदृशी देवी न संवित्सदृशौषधम् ।

End:

एतत्कलञ्जमाहात्म्यं किञ्चित्ते कथितं शिवे ।
समासेन पुनः किन्त्वं श्रोतुमिच्छसि मे वद ॥

Colophon:

इति श्रीत्रिपुरासिद्धान्ते संविन्माहात्म्ये पञ्चदशः कल्पः ॥

No. **5748.** संहारसृष्टिश्रीचक्रन्यासः.

SAṀHĀRASṚṢṬIŚRĪCAKRANYĀSAḤ.

Pages, 16. Lines, 10 on a page.

Begins on fol. 173*a* of the MS. described under No. 124.

Complete.

On the ceremonial touching of the several parts of the body uttering certain appropriate words of Śrīvidyā-mantras while doing so.

Beginning:

अथ वामकेश्वरतन्त्ररुद्रयामळमतानुसारेण संहारसृष्टिस्थितिरूपेण श्रीचक्रन्यासो विलिख्यते—

श्रीविद्याऋष्यादिकरषडङ्गन्यासान् विधाय,

अरुणां करुणातरङ्गिताक्षीं धृतपाशाङ्कुशपुष्पबाणचापाम् ।
अणिमादिभिरावृतां मयूखैरहमित्येव विभावये भवानीम् ॥

इति ध्यात्वा,

शरीरं चिन्तयेदादौ निजश्रीचक्ररूपकम् ।
त्वगाद्याकारनिर्मुक्तं ज्वलत्कालाग्निसन्निभम् ॥

इत्युक्तविधिना स्वपादादिब्रह्मरन्ध्रान्तं तेजोराशिं विभाव्य ।

End:

> भ्रष्टेभ्यस्साधकेभ्योऽपि बान्धवेभ्यो न दर्शयेत् ।
> दत्ते च सिद्धिहानिस्स्यादित्याज्ञा शाङ्करी कृता ॥
> मन्त्रः पराङ्मुखो याति वृद्धा भवति सुन्दरी ।
> अशुभं च भवेत्तस्यास्तस्माद्यत्नेन गोपयेत् ॥

Colophon:

इति त्रिविधचक्रन्यासः ॥

No. 5749. संहारसृष्टिश्रीचक्रन्यासः.

SAṀHĀRASṚṢṬIŚRĪCAKRANYĀSAḤ.

Pages, 28. Lines, 24 on a page.

Begins on fol. 124*b* of the MS. described under No. 5643.

Complete.

Same work as the above.

No. 5750. सपर्याकल्पवल्ली.

SAPARYĀKALPAVALLĪ.

Pages, 121. Lines, 20 on a page.

Begins on fol. 155*a* of the MS. described under No. 5716.

Complete in five Stabakas.

A treatise dealing with the conduct of the worship of Śakti: by Śrīnivāsa.

Beginning:

> ध्यायेद्देवमुमासुतं निजपदद्वन्द्वैकभक्तेष्टदं
> सिन्दूरारुणकुम्भयुग्मविलसच्चन्द्रार्धयुक्छेखरम् ।
> गण्डद्वन्द्वगलद्द्रवन्मदमिलन्मौलीन्दुभृङ्गान् शनै :
> कर्णाभ्यां विनिवारयन्तमनिशं प्रत्यूहविच्छित्तये ॥

ग्रन्थकर्तृनामनिगमनञ्च ।

श्रीदेशिकेन्द्रं शिरसा प्रणम्य श्रीश्रीनिवासो द्रविडोद्भवोऽहम् ।
श्रीमत्सपर्याक्रमकल्पवल्ल्याः श्रीचण्डिकाया यजनं प्रवक्ष्ये ॥
सर्वागमन्यासरहस्यभूतं सर्वेप्सितार्थप्रदमाशु लोके ।
स्कन्दाय यड्डाम(र)तन्त्रसारे प्रोक्तं पुराणेषु च कौशिकेन ॥
तद्ब्राह्मणोक्तं गुरुतस्त्वधीत्य ज्ञात्वा रहस्यं गुरुभाषितस्य ।
मेधामुनिर्यत्सुरथाय राज्ञे सन्दिष्टवान् तत्त्वविदात्मनिष्ठः ॥

* * * *

Colophon:

इति सपर्याकल्पवल्ल्यां प्रथमस्तबकः ॥

End:

इति संहितोक्तेः स्रुक्स्रुवाभावे अश्वत्थस्य वा पलाशस्य वा मध्यपत्रं पिप्प(ल)दलद्वयं वा होमे ग्राह्यम् । संस्कारोऽपि स्रुक्स्रुवयोरिव पत्रयोरपि कार्यम् ॥

Colophon:

इति सपर्याकल्पवल्ल्यां पञ्चमस्तबकः ॥

प्रचण्डमुखमण्डलप्रणयचण्डकोदण्डतो
विमुक्तशरमण्डलीहतसुरद्विषन्मण्डलं(ला) ।
जगत्यखिलमन्द(वन्दि)ता समभिपूरिताखण्डला
विनम्रसुरमण्डला भवतु भूतये चण्डिका ॥
श्रीश्रीनिवासेन विनिर्मितायां श्रीमत्सपर्याक्रमकल्पवल्ल्याम् ।
गतः किलायं स्तबकस्तु पञ्चमस्सगूढपाद्यु(दु)त्कटसौरभाढ्यः ॥
चैत्रे मास्यसिते पक्षे नवम्यां स्थिरवासरे ।
शुक्लाब्दे पूर्वफल्गुन्यां लिखिता चण्डिकास्तुतिः ॥
अमृतेशानकविना पञ्चस्तबकसंमिता ॥

No. 5751. सप्तपारायणविषयः.

SAPTAPĀRĀYAṆAVIṢAYAḤ.

Pages, 31. Lines, 7 on a page.

Begins on fol. 30*a* of the MS. described under No. 3472.

Wants beginning and end.

Relating to the seven things which deserve to be repeated and contemplated upon.

These seven things are, (1) the nine Gurus, (2) the manifestations of Śakti, (3) the Tattvas, (4) the goddess Śakti, (5) the Dēvīmantras, (6) the names of Śakti, (7) and the auxiliary Mantras.

Beginning:

इति इत्थमज्ञात्वा यो जपति तस्य सिद्धिर्न भवत्येव सिन्धुसैकतवर्षवत् । तथा अभियुक्तवचनम्—

कालस्वरूपमज्ञात्वा सिद्धये यो जपेन्मनुम् ।
कोटिकोटिजपेनापि तस्य सिद्धिर्न जायते ॥ इति ।

तस्मात् कालस्वरूपं ज्ञात्वैव जपः कर्तव्यः ।

तदज्ञाने दोषाभिधानात् । कानि तानि पारायणानि? नाथघटिकातत्त्वनित्यामन्त्रनामपारायणानि अङ्गपारायणेन मिळित्वा सप्त पारायणानीति केचिद्वदन्ति । तत्र प्रातः काले मूलाधारे वह्निमण्डले वाग्बीजरूपां नित्यां विद्युत्पटलभासुरां वक्ष्यमाणरूपां ध्यात्वा नाथपारायणं घटिकापारायणश्च कुर्यात् ।

End:

मन्त्रमादौ वदेत्सर्वं साध्यसंज्ञमनन्तरम् ।
विपरीतं पुनश्चान्ते मन्त्रं तत्संपुटं स्मृतम् ॥
शान्तिपुष्टिकरं ज्ञेयं त्रैलोक्यैश्वर्यदायकम् ।
अर्धमर्धं तदा द्वन्द्वे मन्त्रं कुर्याद्विचक्षणः ॥

No. 5752. सिद्धसिद्धान्तपद्धतिः.

SIDDHASIDDHĀNTAPADDHATIḤ.

Pages, 80. Lines, 13 on a page.

Begins on fol. 97*a* of the MS. described under No. 5473.

Upadēśas 1 to 6 complete.

A work intended to show that goddess Śakti is fit to be worshipped independently, and has independent powers of creation and destruction: by Gōrakṣanātha.

Beginning:

आदिनाथं नमस्कृत्य शक्तियुक्तं जगद्गुरुम् ।
वक्ष्ये गोरक्षनाथोऽहं सिद्धसिद्धान्तपद्धतिम् ॥
नास्ति सत्त्वविचारेऽस्मिन् उत्पत्तिश्चाण्डपिण्डयोः ।
तथापि लोकवृत्त्यर्थं वक्ष्ये सत्संप्रदायतः ॥

सा पिण्डोत्पत्तितः सिद्धामि(द्धे)ति। सत्र(सा प्र)सिद्धा[ः] पिण्डोत्पत्तिः। पिण्डविचारः, पिण्डसंवित्तिः, पिण्डाधारः, पिण्डपदसमरसभावः, नित्यपिण्डावधूतः ।

End:

कृपयै . . सत्संप्रदायप्रवृत्तये ।
संप्रदायप्रवृत्तिर्हि सर्वेषां सम्मता सते(ताम्) ॥

Colophon:

अथ गोरक्षनाथकृतौ सिद्धसिद्धान्तपद्धतौ षष्ठोपदेशः ॥

No. 5753. सुन्दरीपूजारत्नम्.

SUNDARĪPŪJĀRATNAM.

Substance, paper. Size, $8\frac{5}{8} \times 3\frac{3}{4}$ inches. Pages, 124. Lines, 7 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Complete.

On the conduct of the worship of Śakti as based on several Āgamas: by Buddhirāja, son of Vrajarājadīkṣita.

Beginning:

पूर्णानन्दपदारविन्दमकरन्दास्वादने लोलुपो
नित्यां श्रीत्रिपुरां परां परमयीं ध्यायन् हि तस्याः परम् ।
वक्ष्ये पूजनपद्धतेर्निजगुरोराज्ञां च लब्ध्वा सुधीः
वाक्यानीह विलोक्य तन्त्रमधुना श्रीबुद्धिराजः कृती ॥

* * * *

ललिताविलासे—

रात्रिशेषे समुत्थाय कृत्वावश्यादितस्त(कं त)तः ।
मानसैश्च शुचिर्भूत्वा गुरुं ध्यायेच्छिरोपरि ॥ ब्रह्मरन्ध्र इति शेषः ।

मन्त्रमहोदधौ च—

ब्राह्मे मुहूर्ते चोत्थायेत्यादि । तन्त्रान्तरे—

सहस्रपत्रे कमले चिन्तयेद्द्विभुजं गुरुम् ।
वराभयकरं शान्तं स्मरेत्तन्नामपूर्वकम् ॥

End:

तां देव्यन्तां च स्वहृदि निधाय ह्युपतारकैः ।
पञ्चभिः पूज्य विधिवत्पठेच्छान्तिस्तवं तदा ॥

जयन्तु देव्यो हरपादपङ्कजमित्येतदाद्यं खलु शान्तिदायकम् ।
पाठं विधायाथ यथासुखं सदा विहर्तुमिच्छेत्खलु साधकोत्तमः ॥
तन्त्राणि नानाविधसम्मतानि विचार्य श्रीमत्त्रिपुरार्चनस्य ।
विधिर्विधिज्ञेन गुरुप्रसादाद्ग्रन्थस्ससारोऽर्थिकृते कृतो हि ॥
श्रीबुद्धिराजेन परार्थबुद्ध्या सद्भिन्दुबृन्दैः परिशोधनीयः ।

त्रिवेदवसुभूम्यङ्कशके पिङ्गळवत्सरे ।
माधवे सितपक्षैकादशीचन्द्रसुवासरे ॥

सुन्दर्यर्चासुसरणिमूलवाक्यानि तन्त्रतः ।
विलोक्य रचितो ग्रन्थः पूजारत्नाभिधः परः ॥

Colophon :

सम्पूर्णतामियात्सोऽयं बुद्धिराजेन योजितः ।
श्रीसामराजशर्मा तत्पुत्रः कामराजाख्यः ॥
व्रजराजदीक्षितोऽभूत् तस्माज्जातो हि बुद्धिराजाख्यः ।
तेन कृतेयं सरणिर्विराममीयाद्विधेः परम्रा(मा) ॥

No. 5754. सुभगोदयदर्पणम्.
SUBHAGŌDAYADARPAṆAM.

Pages, 48. Lines, 6 on a page.

Begins on fol. 12*a* of the MS. described under No. 5452.

Complete.

On the conduct of the worship of Śakti: by Śrīnivāsa-Yōgīśvara.

Beginning :

ऐं, क्लीं, सौः.

अजस्रमदनिष्यन्दलहरीललितात्मकैः ।
कबलीकृतविघ्नाय पुराणकरिणे नमः ॥
तां मूलेऽङ्कुरितां सूक्ष्मां नाभौ पल्लवितां पराम् ।
हृदि कोरकितां वाणीं वक्त्रे कुसुमितां न(नु)मः ॥

प्रातरुत्थाय स्वशिरसि विमलसहस्रदळकमलकर्णिकान्तस्त्रिकोणं सञ्चिन्त्य तदुपरि अनुलोमविलोमात्मकं मातृकाक्षरोच्चारणेन श्रीगुरुमुत्पाद्य ।

End :

अनन्तकोट्यः कुलयोगिनीनामन्तर्बहिः कौलिकचक्रसंस्थाः ।
निपीयमानेन कुलामृतेन प्रीताः प्रसन्ना वरदा भवन्तु ॥

Colophon :

इति श्रीश्रीनिवासराजयोगीश्वरविरचितं सुभगोदयदर्पणं संपूर्णम् ॥

No. 5755. सुरेन्द्रसंहिता.
SURĒNDRASAṀHITĀ.

Substance, paper. Size, 9¾ × 7¼ inches. Pages, 57. Lines, 17 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 99*a*. The other works herein are Sudarśanasaṁhitā 1*a*, Pratāpahanumatkalpa 70*b*, Mahālakṣmīratnakōśa 128*a*.

Paṭalas 1 to 14.

Forms part of the Pañcāstrāgama, which relates to Śakti-ism.

Beginning:

श्रीकण्ठ करुणासान्द्र जगज्जीवनकारण ।
श्रीपदार्चित विश्वेश नमस्ते पार्वतीपते ॥
षट्कुलागमविद्याश्च गर्भकौळागमादिकम् ।
सौभाग्यार्चाविधिश्चैव उक्तवानसि शङ्कर ॥
श्यामळामणिभेदांश्च तदर्चाविधिमेव हि ।
नोक्तवान् मम सर्वेश कृपापीयूषसागर ॥

ईश्वर उवाच—

* * * *

वाग्भवं भुवनेशीश्च श्रीबीजं तदनन्तरम् ।
पुनर्वाग्भवमालिख्य कामराजमतः परम् ॥
तार्तीयश्च ततस्तारं नमो भगवतीपदम् ।
मतङ्गेश्वरिमुच्चार्य सर्वशब्दं ततोच्चरेत् ॥

End:

अयुतश्च जपेद्देवि मारणं भवति ध्रुवम् ।
जपेन्मन्त्रं कुळेशानि लाभालाघवगौरवात् ॥
जपेच्च गिरिजादेवीप्रयोगश्चोपमानवान्(?) ।
मयादुर्लभयोगश्च(?) कलौ तु कुलसुन्दरि ॥

Colophon:

इति श्रीसुरेन्द्रसंहितायां पञ्चास्त्रागमे चतुर्दशः पटलः ॥

No. 5756. सौभाग्यरत्नाकरः.

SAUBHĀGYARATNĀKARAḤ.

Substance, paper. Size, $11\frac{3}{4} \times 9\frac{1}{2}$ inches. Pages, 498. Lines, 23 on a page. Character, Telugu. Condition, good. Appearance, new.

This is complete in 36 Taraṅgas.

There is an index beginning on fol. 255*a* and extending over 14 pages.

Deals with a number of subjects connected with the worship of Śakti, such as the conduct of the daily worship of Śakti, the occasional worship of Śakti, and the worship to be conducted for the fulfilment of desired objects, etc.

By Vidyānandanātha, a disciple of Saccidānanda.

Beginning :

प्रारम्भे भरणे भङ्गे यन्मदस्यन्दबिन्दवः ।
कारणानि प्रपञ्चानां तं वन्दे वारणाननम् ॥
स्वच्छन्दानन्दनाथाङ्घ्रिसरोरुहयुगं भजे ।
यत्कटाक्षक्षणाक्षेपाच्छिवोऽहं पञ्चकृत्यकृत् ॥

* * * *

आलोक्य सर्वशास्त्राणि यामळादीन्यशेषतः ।
ज्ञात्वा गुरुमुखात्तेषां रहस्यानि च तत्त्वतः ॥
सच्चिदानन्दनाथाङ्घ्रिसरोजद्वयषट्पदः ।
श्रीविद्यानन्दनाथोऽहं वीतरागो विरक्तधीः ॥
विहरन्मेदिनीमेतां विद्वद्भिर्विमलात्मभिः ।
प्रयोगे प्रार्थितः प्रीत्यै तेषां लोकहिताय च ॥

* * * *

श्रीनाथपादुकापोतं चतुर्वर्गफलामृतम् ।
प्रकाशयामि सौभाग्यरत्नाकरमतिस्फुटम् ॥
श्रीविद्यायास्सभेदाया नित्यनैमित्तिकार्चनम् ।
काम्यार्चनञ्च दीक्षाङ्गमूतं प्राच्याङ्गसाधनम् ॥

दीक्षाभेदः पुरश्चर्या तत्कर्मनियमादिकम् ।
काम्यहोमविधिश्चैव सौम्यक्रूरविभेदतः ॥
समस्तव्यस्तविद्याया जपात्काम्यफलोदयः ।
सदाचारादिकश्चैव लिख्यते रत्नवारिधौ ॥

तत्र श्रीमान् साधको रजनीतुर्ययामे विबुध्यावश्यकं कृत्वा हस्तौ पादौ च प्रक्षाल्य ।

* * * *

Colophon:

इति सच्चिदानन्दचरणद्वन्द्वान्तेवासिना श्रीविद्यानन्दनाथेन विरचिते सौभाग्यरत्नाकरे प्रथमस्तरङ्गः । प्रथमाध्यायः संपूर्णः ॥

End:

तथापि कुर्यात्सिद्ध्यर्थमात्मनः सर्वथास्तिकः ।
अथवा मनसा कुर्यादेकान्ते स्वयमास्थितः ॥
मानसं परमोत्कृष्टं योगिनामिति नः स्थितिः ।
तस्मात्सर्वप्रयत्नेन मानसक्रममाचरेत् ॥

इति निगदितशेषं त्रैपुरब्रह्मविद्यायजनजपहुतानां शास्त्रदृष्टं विधानम् ।
गुरुचरणसरोजाराधनाल्लभ्यमेतत् पशु(षु)परमगोप्यं भाषितं सिद्धसङ्घैः ॥

श्रीविद्यातत्त्ववेत्ता जगति करुणयोपात्तकायः शिवो यः
श्रीमान् सौसुन्दराख्यक्षितिसुरतिलकस्सच्चिदानन्दनाथः ।
तच्छिष्यः श्रीनिवासो द्रविडविषयजस्तत्प्रसादात्ततत्त्वः
श्रीविद्यानन्दनाथः परशिववचसां भाववेत्ता विधेयः ॥
सौभाग्यरत्नाकरनामधेयः सौभाग्यविद्यादिसुमन्त्ररत्नैः ।
अलङ्कृतं ग्रन्थवरं तरङ्गैः सुशोभितं शैवसुतत्त्वसङ्ख्यैः ॥
अध्यापयन्नात्मविदात्मशिष्यानभ्यर्थितोऽन्यैरपि तानदृष्टान् ।
क्षेत्रेऽविमुक्ते शिवराजधान्यामास्ते निजाराध्यनिदेशवर्ती ॥

श्रीविद्यानन्दनाथेन शिवयोः प्रियसूनुना ।
कृते सौभाग्यरत्नाब्धौ षट्त्रिंशोऽगात्तरङ्गकः ॥

Colophon:

इति सच्चिदानन्दचरणद्वन्द्वान्तेवासिना श्रीविद्यानन्दनाथेन विरचिते सौभाग्यरत्नाकरे षट्त्रिंशस्तरङ्गः समाप्तः ॥

No. 5757. सौभाग्यरत्नाकरः.

SAUBHĀGYARATNĀKARAḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 7*a* of the MS. described under No. 5737

Incomplete and imperfect.

Same work as the above.

No. 5758. स्वच्छन्दपद्धतिः.

SVACCHANDAPADDHATIḤ.

Substance, paper. Size, 10 × 4⅝ inches. Pages, 86. Lines, 8 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Spandas 1 to 13 complete.

On the worship of the goddess Śakti with the aid of the Śrī-Vidyāmantra: by Madhusūdanatīrtha

Beginning:

कलगेषमठस्थायी नीलकण्ठाश्रमो यतिः ।
वाराणसीशिरोरत्नं फणिभाषितपारगः ॥
चिदानन्दश्चिदाभासो मन्त्रतन्त्रैकजन्मभूः ।
वंशालयपुरस्थायी तच्छिष्यो माधवात्मजः ॥
कविराजपदं तस्मै गजैश्च तुरगैस्सह ।
अपि(र्पि)तं शिवराजेन राजदुर्गनिवासिना ॥

तेन बाल्यप्रवेशाय श्रीविद्याराधनक्रमे ।
पद्धतिस्सिद्धसरणेस्संक्षेपेण विरच्यते ॥

तत्रादौ श्रीमान् साधकेन्द्रः प्रातस्सन्ध्यापूर्वकदण्डद्वयात्मके रात्रौ तुरीययामे ब्राह्मे मुहूर्ते वा शय्यायास्समुत्थाय. . . . . .

End:

विद्याद्वितीयखण्डेन निर्माल्यपुष्पं शिरसि धृत्वा, परदेवताभ्यो नैवेद्यादिकं दत्वा, स्वयमपि सुहृद्भिरन्यैस्साकं भुक्त्वा, स्वात्मानं विश्वातीतं विभावयन् यथासुखं विहरेदिति शिवम् । गुरुपादुकापञ्चकस्तोत्रं पठेत् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीमधुसूदनतीर्थविरचितायां स्वच्छन्दपद्धत्यां त्रयोदशस्स्पन्दः ॥

RELIGION—MISCELLANEOUS.

No. 5759. अपांप्रतिष्ठा.

APĀṀPRATIṢṬHĀ.

Pages, 11. Lines, 3 on a page.

Begins on fol. 1a of the MS. described under No. 3232.

Complete.

On the consecration of newly dug wells, tanks, lakes, etc.

Beginning:

अथातोऽपां प्रतिष्ठायाः कल्पं वक्ष्यामि शौनकः ।
नवे तटाके खाने वा वापीकूपसरित्सु च ॥
कार्या(कुर्युः) द्विजातयो होमं शुद्ध्ये तत्फलाप्तये ।
अधा(य)ने चोत्तरे वापि पूर्वपक्षे शुभेऽहनि ॥

End:

इदं धन्यं यशस्यं च शान्तिपुष्टिकरं तथा ।
आयुष्यं पुण्यधर्मं च महापातकनाशनम् ॥

Colophon:

इति शौनकीये अपांप्रतिष्ठाविधिस्समाप्त ॥

No. 5760. आसनविधिः.

ĀSANAVIDHIḤ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 131a of the MS. described under No. 5600.

Complete.

Regarding the characteristics of the seat intended to be occupied during religious meditation and the conduct of worship.

Beginning:

आदौ तु चर्मसंस्कारं देशिकोक्तेन मार्गतः ।
केवलेनैव मन्त्रेण कुर्यात्सद्गुरुसन्निधौ ॥

प्रथमं चर्मसंस्कारं द्वितीयं जपसाधनम् ।
यः करोति कुळेशानि तस्य सिध्यति नान्यथा ॥

शृणु देवि प्रवक्ष्यामि आसनस्य तु लक्षणम् ।
अखण्डं यत्नतो ग्राह्यं द्विखण्डं तु कदाचन ॥

खण्डं तु यः करोत्येव तस्य पापं न गण्यते ।
मृगासनं खड्गचर्म तथा भिन्नासनं तथा ॥

एतानि त्रीणि चर्माणि वर्जयेद्गृ(ज्यानि गृ)हमेधिनः(ना) ।
अखण्डं तु गृहस्थस्य ह्यशुभं हन्यते सदा ॥

End:

धनकीर्तिः पृष्ठदेशे पार्श्वयोः पि(फ)लवान्भवेत् ।
पुच्छदेशे च दारिद्र्यं श्रमः पादचतुष्टयम् ॥

एवं ज्ञात्वा सदा विद्वान् जपकर्मादिकं चरेत् ।
अक्षय्यफलमाप्नोति व्यासस्य वचनं यथा ॥

Colophon:

इत्यासनविधिस्समाप्तः ॥

No. 5761. औपासनकालनिर्णयः.

AUPĀSANAKĀLANIRṆAYAḤ.

Substance, palm-leaf. Size, 15½ × 1⅜ inches. Pages, 2. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 25*a*. The other works herein are Sapiṇḍāvivāhaniṣēdhavicāra 1*a*, Śrāddhaniyamavacanāni 22*b*, Vēdalakṣaṇa 26*a*.

Determines the proper time for the performance of the religious ceremony of Aupāsana, which is a daily fire-sacrifice conducted with the sacred domestic fire.

Beginning:

यदा सन्धीयते वह्निः प्रायश्चित्तपुरस्सरम् ।
तदा सायं विजानीयात् प्रातर्मध्यापराह्णके ॥

इत्याश्वलायनविषयम् ।

विवाहप्रथमारम्भे सायमादि यथाक्रमम् ।
अन्यत्र पुनराधाने हूयते प्रातराहुतिः ॥

End:

पञ्चयज्ञांस्तु यो मोहान्न करोति गृहाश्रमी ।
तस्य नायं च न परो लोको भवति दुर्मत(ते)ः ॥

No. 5762. गोमुखलक्षणम्.

GŌMUKHALAKṢAṆAM.

Page, 1. Lines, 6 on a page.

Begins on fol. 89*a* of the MS. described under No. 217.

Complete.

Regarding the covering cloth for hiding the rosary when one is religiously engaged in repeating Mantras a number of times.

Beginning:

ललितागमे गोमुखलक्षणम्—

गोमुखं पञ्चधा प्रोक्तं सर्वमन्त्रश्च साध्यते ।
रक्तं वश्यकरं चैव हरिदाकर्षणं तथा ॥
स्तम्भोच्चाटकरं श्वेतं नीलं शत्रुविनाशनम् ।
कपिलं शान्तिदं प्रोक्तं चित्रवर्णं च मोहनम् ॥
वश्ये नवाङ्गुळं ज्ञेयमाकर्षे पञ्चविंशतिः ।
द्वात्रिंशस्तम्भनोच्चाटे रिपुजित्पक्षसंज्ञिकम् ॥

End:

वैश्यानां त्रीणि वर्णानि शूद्राणां च द्विवर्णकम् ।
अन्येषामेकवर्णं स्यादेवं गोमुखलक्षणम् ॥

ग्रन्थान्तरे—

रक्तं पीतं च नीलं च सर्वेषां प्रोच्यते बुधैः ।
स्वस्वधर्मप्रकारेण कुर्यादुभयमाप्नुयात् ॥

Colophon:

इति गोमुखलक्षणं सम्पूर्णम् ॥

No. 5763. तटाकप्रतिष्ठाकल्पः.

TAṬĀKAPRATIṢṬHĀKALPAḤ.

Substance, palm-leaf. Size, $12\frac{1}{4} \times 1$ inches. Pages, 16. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 7*b*. The other work herein is Vanapratiṣṭhākrama 1*a*.

Complete.

On details connected with the consecration of newly built tanks.

Beginning:

युधिष्ठिर उवाच—

तटाकोत्सर्जनविधिः विधिं(कथं) विधिमतां वर ।
कथयस्व महाभाग मम देवकिनन्दन ॥
वापीकूपतटाकानां के मन्त्राः परिकीर्तिताः ।
किंप्रकारं तु कर्तव्यं कुण्डमण्टपलक्षणम् ॥
दानं किमत्र कर्तव्यं बलयः काः प्रकीर्तिताः ।
कस्मिन् काले कथं कुर्यादेतत्सर्वं वद प्रभो ॥

श्रीकृष्ण उवाच—

साधु साधु महाबाहो यन्मां त्वं परिपृच्छसि ।
तटाकस्य विधिं वक्ष्ये शुद्ध्यर्थं तु युधिष्ठिर ॥
वापीकूपतटाकानामुत्सर्गं कथयामि ते ।
निष्पन्ने तु तटाके च सर्वभेदविवर्जिते ॥
एतस्मिन् सलिले पूर्णे आदित्ये चोत्तरायणे ।

* * * *

तटाकपार्श्वे पूर्वे च ईशान्ये वा तथैव च ।
सर्वलक्षणसंयुक्तं मण्टपं कारयेच्छुभम् ॥
शुद्धस्थले तु पूजार्थं वेदिकां परिकल्पयेत् ।

End:

दिव्यं विमानमारुह्य चरिष्यन्ते प्रभाव(तः) ॥
. . . . . विष्णुलोके महीयते ।
वापीकूपतटाकानां प्रतिष्ठा कथिता मया ॥

Colophon:

इति श्रीभविष्योत्तरपद्मकपुराणे तटाकप्रतिष्ठाकल्पः समाप्तः ॥

No. 5764. तटाकप्रतिष्ठा.

TAṬĀKAPRATIṢṬHĀ.

Substance, paper. Size, $13\frac{1}{8} \times 8\frac{1}{4}$ inches. Pages, 3. Lines, 19 on a page. Character, Telugu. Condition good. Appearance, new.

Begins on fol. 12[illegible]*a*. The other works herein are Vṛddhavāsiṣṭha 1*a*, Hanūmatkavaca 82*b*, Bhāratasāvitrī 83*b*, Sūryakavaca 26*b*, Mantrasthāna 87*a*, Amṛtamṛtyuñjaya 87*b*, Dharaṇīstōtra 89*b*, Prātassmaraṇaślōka 90*a*, Mucukundastuti 90*b*, Gōpikāgītā 91*b*, Śanaiścarastōtra 92*b*, Rukmiṇīśavijaya 95*a*, Maṅgalāṣṭaka 106*b*, Jātakanirṇaya 108*a*, Pañcapakṣiśakuna 114*a*, Sālagrāma-

lakṣaṇa 117*a*, Śrāddhaprayōga 119*a*, Nāgapratiṣṭhā 121*a*, Viṣṇupañcakavratakalpa 122*a*.

Complete.

On the consecration of newly dug tanks, wells, etc.

Beginning:

अथातस्सम्प्रवक्ष्यामि प्रतिष्ठां तु यथाविधि ।
नवे तटाके खाते वै वापीकूपसरस्सु च ॥
कुर्युर्द्विजातयो होमं शुद्धये तत्फलाप्तये ।
अयने चोत्तरे पुण्ये पूर्वपक्षे शुभेऽहनि ॥
कल्याणकाले होतव्यमात्मनो हितमिच्छता ।
मण्डूकमत्स्यकूर्माणामन्येषां जलचारिणाम् ॥
हैरण्यानि च रूपाणि राजतानि च कारयेत् ।

End:

महापातककोटिघ्नं सर्वकामफलप्रदम् ।
वापीकूपतटाकानां प्रतिष्ठाकर्म कीर्तितम् ॥

Colophon:

इति शौनकप्रोक्तवापीकूपतटाकप्रतिष्ठाविधिः ॥

No. 5765. तटाकप्रतिष्ठा.
TAṬĀKAPRATIṢṬHĀ.

Substance, palm-leaf. Size, $1\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 15. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 76*a*. The other works herein are Anantavrata 1*a*, Ciḷukudvādaśīvrata 11*a*, Varalakṣmīvrata 15*a*, Vināyakavrata 19*a*, Abhōjyārkavrata 23*a*, Sūryacandravrata 27*a*, Āmuktābharaṇasaptamīvrata 34*a*, Gōmayavrata 39*a*, Umāmahēśvarapūjāvidhāna 47*a*, Kēdārēśvaravrata 53*a*, Bindudvādaśīvrata 65*a*, Ēkādaśīguruvāravrata 72*a*.

Complete.

Same work as the above.

No. 5766. तटाकप्रतिष्ठा.

TAṬĀKAPRATIṢṬHĀ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 52*a* of the MS. described under No. 5236.

Complete.

Similar to the above.

Beginning:

दाल्भ्य उवाच—

पृच्छामि त्वा परं ब्रह्मन् नराणां पापकर्मणाम् ।
स्नानसन्ध्याविहीनानां वर्णाश्रमविरोधिनाम् ॥
सन्तानरहितानां च रोगार्तानां दरिद्रिणाम् ।
प्रायश्चित्तविहीनानां निष्कृतिर्मम कथ्यताम् ॥

पुलस्त्यः—

शृणु दाल्भ्य प्रवक्ष्यामि प्रायश्चित्तं तु पापिनाम् ।
वापीकूपतटाकंवा(काना)मुद्धर्तु(र्ता)सुखमश्नुते ॥

End:

गोदानं च ततः कृत्वा दशदानं तथैव च ।
ब्राह्मणान् भोजयेत्पश्चात्स्वयं भुञ्जीत बान्धवा(वै)ः ॥

Colophon:

इति बोधायनोक्ततटाकप्रतिष्ठाविधिः समाप्तः ॥

No. 5767. तटाकप्रतिष्ठाविधिः.

TAṬĀKAPRATIṢṬHĀVIDHIḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 5?*a* of the MS. described under No. 5236.

Incomplete.

Same work as the above.

No. 5768. तन्त्राद्यधिकारिनिर्णयः.

TANTRĀDYADHIKĀRINIRṆAYAḤ.

Substance, palm-leaf. Size, 16 × 1⅜ inches. Pages, 50. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

An unfavourable criticism by Bhaṭṭōjidīkṣita of the authoritativeness of the various Āgamas: intended to show that they are not to be adopted by those who follow the religion of the Vēdas.

Beginning:

विश्वेशं सच्चिदानन्दं वन्देऽहं योऽखिलं जगत् ।
चरीकर्ति बरीभर्ति सञ्जरीहर्ति लीलया ॥

शुद्धवैदिकमार्गेण शिवमाराधयन् सदा ।
द्विजेन्द्रोऽसौ विजयते श्रीमान्मुक्ताङ्गदस्सुधीः ॥

तस्य धर्मैकनिष्ठस्य कुतन्त्रध्वान्तभास्वतः ।
प्रीतये पाञ्चरात्रादेरधिकारो निरूप्यते ॥

स्यादेतत्पाञ्चरात्रादीनां प्रामाण्ये सत्यधिकारिविशेषचिन्ता युज्यते । तदेव दुर्लभम् । तथाहि कौर्मे एकादशाध्याये—

"कापालं पाञ्चरात्रं च यामलं वाममार्हतम् ।
एवंविधानि चान्यानि मोहनार्थानि तानि तु ॥

ये कुशास्त्राभियोगेन मोहयन्तीह मानवान् ।
मया सृष्टानि शास्त्राणि मोहायैषां भवान्तरे ॥"

इति पाञ्चरात्रादीनां मोहकत्वमुक्तम् ।

End:

उभयधापि वैदिकान् प्रति पाञ्चरात्रादयोरा(दीनामन)नुष्ठापकत्वेऽपि-

(त्वमपि) निर्विवादमेव । तस्मात्पतितादय एव शङ्खचक्र[ण]ाद्यङ्कनादाव-धिकारिण इति सिद्धम् ॥

Colophon:

बालगोपालसदृशविद्वदाभासकल्पितैः ।
पतितानां च मूढानामज्ञानविनिवृत्तये ॥
विशुद्धाद्वैतसिद्धान्तप्रतिष्ठापनतत्परः ।
भट्टोजियज्वा कृतवानिमं ग्रन्थं बुधाग्रणीः ॥

इति श्रीमदद्वैतसिद्धान्तप्रतिष्ठापकश्रौतस्मार्तसम्प्रदायव्यवस्थापकभट्टोजिदीक्षितविरचितस्तन्त्राद्यधिकारिनिर्णयस्समाप्तः ॥

No. 5769. देवताप्रतिष्ठा.

DĒVATĀPRATIṢṬHĀ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 126*a* of the MS. described under No. 2898.

Forms part of the Jyautiṣasaṁhitārṇava.

Complete.

On certain details connected with the consecration of divine images for worship.

Beginning:

अथ देवताप्रतिष्ठा—

पुरं चेह ग्रामं [वा] हरिहरगृह(ा)भावसहितं
सदा सद्भिर्द्रष्टुं न(खलु) विधितः स्थातुमपि यत् ।
ततः शम्भोर्विष्णोरितरसुरसङ्घन्य(स्य)रुचिरां
प्रतिष्ठां वक्ष्येऽहं समुनि(वर)वृन्दैरभिहिताम् ॥

उत्तरायणयुते सिते ज्येष्ण्यो(दळे) मूढदोषरहिते शुभे दिने ।
देवतानवतटाकदीर्घिका[दि]स्थापनं शुभफलप्रदं भवेत् ॥

वापीकूपतटाकानां देवतानां वनस्य च ।
कार्या प्रतिष्ठा शास्त्रोक्तविधिना च शुभार्थिभिः ॥

End:

हन्त्यर्थहीने भ्य(प)रमप्रतिष्ठाकर्त्तारमृत्विग्वरविप्रमुख्यम् ।
मन्त्रैर्विहीने त्वथ . . . हानतश्च ॥

Colophon:

इति ज्यौतिषसंहितार्णवे देवताप्रतिष्ठानिरूपणं नाम पञ्चदशस्तरङ्गः ॥

No. 5770. देवताप्रतिष्ठाविधिः.

DĒVATĀPRATIṢṬHĀVIDHIḤ.

Substance, paper. Size, $11\frac{3}{4} \times 4\frac{1}{2}$ inches. Pages, 61. Lines, 10 on a page. Character, Dēvanāgarī. Condition, injured. Appearance, old.

Mayūkhas 1 to 8.

Forms part of the Bhagavantabhāskara.

A work bearing on the consecration of divine images: by Bhaṭṭa Nīlakaṇṭha, son of Śaṅkarabhaṭṭa.

Beginning:

महो (मह)त्समाराध्य जलोत्सर्गमथोक्तवान् ।
प्रतिष्ठां सर्वदेवानां नीलकण्ठो वदत्यसौ ॥

तत्र तत्कालो विष्णुधर्मोत्तरे—

"चैत्रे वा फाल्गुने वापि ज्येष्ठे वा माधवे तथा ।
माघे वा सर्वदेवानां प्रतिष्ठा शुभदा सिते ॥
रिक्तान्यतिथिषु स्यात्सा(वा)रे भौमान्यके तथा ।" इति ॥

तत्रैव—

आषाढे द्वे तथा मूलमुत्तरात्रयमेव च ।
ज्येष्ठाश्रवणरोहिण्यः पूर्वा भाद्रपदा तथा ॥

End:

ततो लिङ्गं प्रतिमां वा तत्रैव विधिवत्संस्थाप्य ध्रुवा द्यौरित्यादिमन्त्रान् पठित्वा स्थिरीकृत्य बहु संपूज्य प्रार्थयेत् ।

ज्ञानतोऽज्ञानतो वापि यथोक्तं न कृतं यदि ।
तत्सर्वं पूर्णमेवास्तु त्वत्प्रसादान्महेश्वर ॥
कर्तू राज्ञः प्रजानां च शान्तिर्भवति सर्वदा ।
अस्माकं शिल्पिनां चैव सुप्रीतो भव सर्वदा ॥ इति ॥

Colophon:

इति श्रीमीमांसकशङ्करभट्टात्मजभट्टनीलकण्ठेन कृते भास्करे प्रतिष्ठामयूखोऽष्टमः ॥

No. **5771.** नवग्रहयज्ञः.

NAVAGRAHAYAJÑAḤ.

Pages, 30. Lines, 5 on a page.

Begins on fol. 4*a* of the MS. described under No. 2641.

Complete.

On the propitiatory worship of the nine planets.

Beginning:

पूर्वोक्तैवङ्गुणविशेषणविशिष्टायां पुण्यतिथौ मम जन्मराशिवशात् नामराशिवशात् . . . . . . श्वेततण्डुलोपरि स्वर्चितस्वर्णप्रतिमां(मायां)·स्थण्डिलभूमौ रङ्गवल्लीविरचितनवकोष्ठे तत्तन्मण्डले आवाहनादिषोडशोपचारपूजां चाधिदेवताप्रत्यधिदेवताङ्गदेवतावरणदेवतानां च इन्द्राद्यष्टदिक्पालकानां च एतेषां पूजां चाभिषेकार्थं कलशाराधनं च होमेषु च सम्भवद्भिरुपचारैस्सम्भवता नियमेनादित्यादिनवग्रहमखमहं करिष्ये ।

End:

क्षेत्रस्य पतिनेत्यस्य मन्त्रस्य कण्वपुत्रः प्रस्कण्व ऋषिः, अनुष्टुप् छन्दः, क्षेत्रपालको देवता । क्षेत्रपालकासिद्ध्यर्थे विनियोगः ।

शुद्धस्फटिकसंङ्काशं सहस्रादित्यवर्चसम् ।
नीलजीमूतसङ्काशं नीलाञ्जनसमप्रभम् ॥

क्षेत्रस्य पतिना वयं . . . दशे । क्षेत्रपालकं साङ्गं सायुधं क्षेत्रपालमावाहयामि । तदुत्तरं वास्तुपूजां कुर्यात् ॥

No. 5772. पुरश्चरणादिप्रयोगः.

PURAŚCARAṆĀDIPRAYŌGAḤ.

Pages, 24. Lines, 6 on a page.

Begins on fol. 28*a* of the MS. described under No. 4384.

Complete.

On details relating to the silently meditative repetition of certain religious Mantras.

Beginning:

ओं पुरश्चर्याविधिः वाराहीतन्त्रे योगिनीहृदये—

गुरोराज्ञां समादाय शुद्धान्तःकरणो नरः ।
ततः पुरश्चर्यां कुर्यान्मन्त्रसंसिद्धिकां यया ॥
जीवहीनो यथा देहो(हः) सर्वकर्मसु न क्षमः ।
पुरश्चरणहीनोऽपि तथा मन्त्रः प्रकीर्तितः ॥
स्निग्धं शास्त्रविदं मित्रं नानागुणसमन्वितम् ।
स्त्रियं वा सद्गुणोपेतां सपुत्रां विनियोजयेत् ॥
आदौ पुरश्चर्यां कर्तुं स्थाननिर्णय उच्यते ।

योगिनीहृदये—

पुण्यक्षेत्रं नदीतीरं गुहा पर्वतमस्तकम् ।
तीर्थप्रदेशास्सिन्धूनां सङ्गमः पावनं वरम् ॥
उद्यानानि विविक्तानि बिल्वमूलं तटं गिरेः ।
तुलसीकाननं गोष्ठं वृषशून्यशिवालयम् ॥

*　　*　　*　　*

एषामन्यतमं स्थानमाश्रित्य च समाचरेत् ।
यत्र ग्रामे जपेन्नित्यं तत्र कूर्मं विचिन्तयेन् ॥
पर्वते सिन्धुतीरे च पुण्यारण्ये नदीतटे ।
यदि कुर्यात्पुरश्चर्यां तत्र कूर्मं न चिन्तयेत् ॥

अथ पुरश्चरणे भक्ष्यादिनियमः—

पुरश्चरणकृन्मन्त्रं भक्ष्याभक्ष्यं विचिन्तयेत् ।
अन्यथाभोजनाद्दोषात् सिद्धिहानिश्च जायते ॥

अत्र अगस्त्यसंहिता—

दधि क्षीरं घृतं गव्यमैक्षवं गुडवर्जितम् ।
तिलाश्चैव सिता मुद्गाः कन्दं कैमुकवर्जितम् ॥
एवमादींश्च नियमान् पुरश्चरणकृच्चरेत् ।
विण्मूत्रोत्सर्गशङ्कादियुक्तः कर्म करोति यः ॥
जपार्चनादिकं सर्वमपवित्रं भवेत्प्रिये ।

* * * *

जपेदेकमनाः प्रातःकालम(लान्म)ध्यंदिवा(ना)वधि ।
यत्संख्यया समारब्धं तत्कर्तव्यमहर्निशम् ।
यदि न्यूनाधिकं कुर्याद्व्रतभ्रष्टो भवेन्नरः ॥

मुण्डमालायां—

यत्संख्यया समारब्धं तज्जप्तव्यं दिनेदिने ।
न्यूनाधिकं न कर्तव्यमासमाप्ति सदा जपेत् ॥

End:

सनत्कुमारीये—

यद्यदङ्गं विहीयेत तत्संख्याद्विगुणो जपः ।
होमाभावे जपः कार्यो होमसंख्या चतुर्गुणः ॥

No. **5773.** पुरुषसूक्तन्यासः.

PURUṢASŪKTANYĀSAḤ.

Substance, palm-leaf. Size, $14\frac{3}{8} \times 1\frac{1}{8}$ inches. Page, 1. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 8*b*. The other works herein are Kṛṣṇajayantyarghyaślōka 1*a*, Rāmanavamyarghyaślōka 1*b*, Gōmayabhakṣaṇa-

vratakalpa 2*a*, Dīpavratapūjāvidhi 9*a*, Lakṣavartivratakalpa 14*a*, Śivarātryarghyaślōka 19*a*, Sūryacandravrata 21*a* and 39*a*, Budhāṣṭamīvrata 26*a*, Lakṣadīpavratakalpa 30*a*, Kārtikadīpādidāna 45*a*, Māsaśivarātrivratakalpa 46*a*, Māsaśivarātryudyāpana 53*a*, Māsaśivarātripūjāvidhāna 57*a*.

Incomplete.

Regarding the ceremonial touching of the several parts of the body uttering the appropriate Ṛks of the Puruṣasūktamantra as an aid to meditation.

Beginning:

ततः गुरूपदिष्टमार्गेण अष्टादशऋगात्मकस्य पुरुषसूक्तस्य नारायण ऋषिः, अनुष्टुप् छन्दः, जगद्बीजं, श्रीपुरुषोत्तमः परमात्मा देवता ।

End:

पद्मनाभं कट्यां दामोदरं पादयोः भूर्भुवस्सुवरोमिति दिग्बन्धः ।

No. 5774. पुरुषार्थरत्नाकरः.

PURUṢĀRTHARATNĀKARAḤ.

Substance, palm-leaf. Size, 17 × 1¾ inches. Pages, 408. Lines, 10 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete in 15 Taraṅgas.

By Raṅganāthasūri, disciple of Kṛṣṇānandasarasvatī.

The subjects treated of herein are :—

१. पुराणप्रामाण्यविवेकः.
२. त्रिवर्गतत्त्वविवेकः.
३. मोक्षतत्त्वविवेकः.
४. चतुर्वर्गसाधनविवेकः.
५. वर्णाश्रमधर्माणां भगवदाराधनत्वविवेकः.
६. वर्णादिधर्मविवेकः.
७. भगवदाराधनविशेषविवेकः.
८. नामकीर्तनादिप्रायश्चित्ततत्त्वविवेकः.
९. भगवदाराधनोपपत्तिविवेकः.

१०. अधिकारिविवेकः.
११. तत्त्वंपदार्थविवेकः.
१२. विवेकज्ञानविषयैकात्म्यविवेकः.
१३. योगबहिरङ्गविवेकः.
१४. संयमविषयफलविवेकः.
१५. मुक्तगतिविवेकः.

Beginning:

यस्मिन्नायतते निरन्तरसदानन्दैकसंविन्मये
सर्गस्थेमलयं समस्तजगतामस्तादिमायामयम् ।
तं प्रत्यञ्चमशेषबुद्धिकलनासर्वस्वदीपाङ्कुरं
कुर्मस्सन्नतिकर्म शर्मपरमं यत्तत्पदं वैष्णवम् ॥

अस्ति श्रीविश्वनाथो भुवि सकलकलासार्वभौमस्सुशील-
स्तस्याम्बार्येति यार्या द्विगुणगुणतया विश्रुता धर्मपत्नी ।
तस्याश्शुक्तेरिवासीदतिगुणमिव यो मौक्तिकं मुक्तसङ्ग-
स्सोऽयं श्रीकृष्णयोगी जगति विजयते देशिकेन्द्रो यतीन्द्रः ॥

प्रागाञ्जनेयमुखमौनिकुलाय तत्त्वं योऽदिक्षदादिमगुरुर्विजयाय यश्च ।
श्रीरामभद्रयमिसंयमिवासुदेवौ तौ यद्गुरू तमुपयामि पतिं यतीनाम् ॥

कावेरीपरिवाहवीचिनिवहप्रेङ्खोळपर्यङ्किका-
हिण्डत्कुण्डलिमण्डलीशशयनं यत्राधिशेते हरिः ।
श्रीरङ्गं महदस्ति धाम परमं यत्प्राहुरेकान्तिनः
प्रत्यक्षं परमं पदं तदिति यत्पर्यङ्कविद्याविदाम् ॥

श्रीरङ्गावनिभागे सदातिथेयैरधिष्ठितस्सुजनैः ।
चोळकनल्लूरस्ति ग्रामः श्रीमान् कवेरजोपान्ते ॥

मिमानस्त्रैलोक्यं मिषति दिविषद्द्वेषिणि बलौ
पराश्चर्यैः पर्यापितविबुधकार्यस्सुचरितैः ।

दयादृष्ट्या वृष्ट्या कळममिव काले सफलयन्
जगत्यत्र श्रीशो जयति कुहनावामनवटुः ॥

कळमधुरात्यभिरामे कलमधुरालापकोकिलारामे ।
तस्मिन् सुजनावासे कावेरीहारिणि ग्रामे ॥

शुभचरि(तो)ऽखिलमित्रं सज्जनसामान्यसम्पदार्यमतिः ।
गुरुजनवृद्धविनीतो गुणमणिखनिरस्ति रङ्गनाथसुधीः ॥

सुमतिरिह स रङ्गनाथो बुधो रचयति पुरुषार्थरत्नाकरम् ।
विशदतरपुराणसारामृतैस्सुनिभृतमवगाहनीयं सताम् ॥

सङ्गृह्य वैष्णवपुराणसुभाषितानि कापीतरार्षवचनानि स रङ्गन(ा)थः ।
आत्रेयगोत्रतिलकः कुरुते पुमर्थरत्नाकरं कुरविशेरिकुलप्रदीपः ॥

*　　　*　　　*　　　*

इह खलु विद्यास्थानेषु ब्राह्मादिपुराणानि परिगणितानि—

पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥ इति । तथा—

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥

Colophon:

इति श्रीमदात्रेयगोत्रकुरविशेरिकुलमणिदीपरङ्गनाथसूरिविरचिते पुरुषार्थरत्नाकरे पुराणप्रामाण्यविवेकः प्रथमस्तरङ्गः ॥

पुरुषार्था लक्ष्यन्ते—

इह खलु धर्मार्थकाममोक्षाख्याश्चत्वारः पुरुषार्था लोकशास्त्रप्रसिद्धाः । तत्र प्रमाणकार्याभ्यां धर्मो लक्षितो जैमिनिना—चोदनालक्षणोऽर्थो धर्म इति । चोदनेति क्रियायाः प्रवर्तकं वचनमाहुः । तल्लक्षणस्तत्प्रमाणकः । अर्थः श्रेयस्साधनम् ।

End:

परमात्माराधने सम्यक् प्रणिधातव्यमित्यशेषमतिमङ्गळम् ॥

विश्वोद्भूतिविभूतिसंस्थितिमहालीलारसज्ञो मृषा-
मायाशक्तिवशंवदात्ममहिमा यः प्रत्यगेकात्मकः ।
यस्याराधनमीप्सितार्थघटनादीक्षागृहीतव्रतं
स्वं स्वाराधनमेव मत्कृतिमिमामङ्गीक्रियादीश्वरः ॥
निर्णेतुं पुरुषार्थतत्त्वमखिलं ज्ञातुं च तत्साधनं
विष्णवाराधनमञ्जसा भगवतस्तत्त्वं विवेक्तुं परम् ।
निर्वाणं प्रतिपत्तुमत्र परमं ह्यायता लालसा
गाहध्वं पुरुषार्थरत्ननिलयं शक्यावगाहं सताम् ॥
प्राचीनानि निबन्धनानि भुवने सन्त्येव पारे शता-
दश्रद्धानमिहाद्य नूतनतया मा यात मेधाविनः ।
को यत्नाप्य(त्त)चिरत्नरत्ननिचये सत्यप्ययत्नागमं
नूत्नं रत्नमुपेक्षते शितमतिस्स्याच्चेत्परीक्षाक्षमः ॥
शास्त्रार्थं प्रतिपत्तुमर्हतितमामर्वाक्षु कस्सर्वशो
निर्वक्तुं प्रतिपन्नमर्थमथ वा निर्वोढुमुर्वीतले ।
हन्ता हन्तु चिरं प्रबन्द्धृयशसा सम्भावितो भूयसा
कृष्णानन्दगुरूत्तमेन कृपया मद्भावमासेदुषा ॥

विद्या ह्यद्यानवद्या विपुलमपि यशो वाग्विलासा विचित्राः
श्लाघा विद्वत्समाजे शुभमपि चरितं शाश्वती सा च लक्ष्मीः ।
भक्तिस्तस्यैव देवद्विजगुरुषु दृढा यत्र कुत्रापि धन्ये
तत्तादृक्षं कटाक्षं कमपि कलयते बालकृष्णो गुरुर्नः ॥

मधुरमधुरं वाचि स्मेरं सदैव मुखाम्बुजे
शिशिरशिशिरं स्निग्धेऽपाङ्गे दयामसृणं हृदि ।

* * * *

स्फुरतु सततं कृष्णानन्दाभिधानमिदं महः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीकृष्णानन्दसरस्वतीभगवत्पूज्यपादशिष्यश्रीमदात्रेयगोत्रकुरविशेरिकुलमणिदीपरङ्गनाथसूरिविरचिते पुरुषार्थरत्नाकरे मुक्तगतिविवेको नाम पञ्चदशस्तरङ्गः ॥

सरळमनसां सर्वज्ञानां सभासु वदावदै-
स्सुरगुरुरयं सा वा संज्ञान्तरेण सरस्वती ।
वटतरुतटीवासी विद्यागुरुः किमिति स्तुमो
जयति नितरां कृष्णानन्दो गुरुर्जगतीगुरुः ॥

पूर्णानन्दाय गुरवे पुरुषोत्तमयोगिने ।
शिवरामसरस्वत्यै श्रीमद्गोपालयोगिने ॥

स्वयम्प्रकाशमुनये रामभद्रव्रतीन्दवे ।
कृष्णानन्दसरस्वत्यै करोम्यनुकलं नमः ॥

त्रय्यन्तप्रतिपादितं प्रतिमुहुस्तात्पर्यलिङ्गैस्स्फुटैः
तत्त्वं किञ्चन तापसैः परिचितं तापत्रयोन्मूलनम् ।
कृष्णानन्दसरस्वतीति कलिताभिख्यं कृपालुं गुरुं
विद्यानामधिदेवतामहरहर्वन्दे परां देवताम् ॥

भजन्तु कतिचिद्भवं भवनिवृत्तिबद्धादरा
व्रजन्तु च परे मुहुर्विबुधसिन्धुमुख्या नदीः ।
मखैर्मघवदादिमान्परिचरन्तु वान्ये त्वहं
गुरुप्रवरपादुके शरणये शरण्ये नृणाम् ॥

सारं सूक्तिसुधाझरीपरिगतं षड्दर्शनीविस्तरं
माधुर्यं मकरन्दफाणितमधुद्राक्षानिभानां गिराम् ।
शीलं साधुजनादृतं शिशिरितापाङ्गाश्रिमद्दैवतं
सेवे सुन्दरमन्दहासवदनं श्रीबालकृष्णं गुरुम् ॥

No. 5775. प्रतिमास्वरूपनिरूपणम्.
PRATIMĀSVARŪPANIRŪPAṆAM.

Substance, paper. Size, 12 × 8 inches. Pages, 11. Lines, 16 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 450*a*. The other works herein are Saṅkalpasūryōdaya 1*a*, Śākuntalavyākhyā 119*a*, Anargharāghavavyākhyā 209*a*, Sāhityaratnākaravyākhyā 307*a*, Bālabhārata 355*a*, Śilpiśāstra 441*a*.

Incomplete.

On the characteristics of the divine images to be used for worship.

Beginning:

चतुर्भुजं त्रिनेत्रञ्च द्विनेत्रं द्विभुजं तथा ।
अभयं टङ्कहस्तञ्च पाशं शूलं तथा परे ॥
द्विभुजे तु प्रकर्तव्यं टङ्कश्चाभयहस्तकम् ।
शुक्लयज्ञोपवीतञ्च शिरो मालिकयान्वितम् ॥

* * * *

शिरश्चक्रप्रभायुक्तं पद्मपीठस्य मध्यमे ।
दाडिमीपुष्पसङ्काशमुरगैश्च विभूषितम् ॥
पाशाङ्कुशपदं ताम्रफलिनन्त्वाखुवाहनम् ।
ध्यायेद्गणाधिपं देवं सर्वविघ्नोपशान्तये ॥

End:

घटं मांसन्तु विन्यस्य तोयं प्राणेन विन्यसेत् ।
रत्नमस्थि न्यसेद्धीमान् सूत्रं नाडि तथैव च ॥
वस्त्रेण त्वक् समाख्यातं नाळिकेरं शिरस्तथा ।
कूर्चेण शुक्लसंयुक्तमाम्रपत्रेण कैशिकम् ॥
सर्वालङ्कारसंयुक्तं घटं प्रति विशेषतः ।

No. 5776. प्रपन्नलक्षणम्.

PRAPANNALAKṢAṆAM.

Pages, 15. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 482.

Incomplete.

On the characteristics and classification of Prapannas.

Beginning:

कूर्मपुराणे—

योगाभ्यासरतो नित्यमारुरुक्षुर्जितेन्द्रियः ।
ज्ञानाय वर्तते भिक्षुः प्रोच्यते पारमेष्ठिकः ॥
यश्चात्मरतिरेव स्यान्नित्यतृप्तो महामुनिः ।
सम्यग्दर्शनसम्पन्नस्स योगी भिक्षुरुच्यते ॥
ज्ञानसन्न्यासिनः केचित्कर्मसन्न्यासिनः परे ।
वेदसन्न्यासिनः केचित्त्रिविधाः पारमेष्ठिकाः ॥

End:

तत्रैव दत्तात्रेयः—

स्वर्गार्थिनां यतीनां तु प्रेतत्वस्य प्रमुक्तये ।
दशाहं प्रेतपिण्डं च तर्पणं श्राद्धमेव च ॥
द्वादशब्राह्मणानां तु भोजनं बलिरेव च ।
प्रेतकृत्यानि सर्वाणि कार्याण्येव सुतादिभिः ॥
एकोद्दिष्टं यतीनां तु पिशाचत्वाविमुक्तये ।
स्वर्गिणां सर्वथा कार्यं प्रेतश्राद्धानि षोडश ॥
कृत्वा स्वर्गी तु सन्न्यासी ब्रह्मानन्दमवाप्य च ।
प्रळयान्ते तु तत्त्य[ा]क्त्वा ब्रह्मणा सह मोक्षभाक् ॥
भिक्षुस्स(स्स्व)र्ग्यपि तस्मा(त्)स यतिर्मोक्षाश्रमी भवेद् ।

इति प्रतिपादितत्वात्.

No. 5777. प्राणाग्निहोत्रम्.

PRĀṆĀGNIHŌTRAM.

Substance, palm-leaf. Size, 13¼ × 1⅛ inches. Pages, 4. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 68*a*. The other works herein are Nyāsatilaka 1*a*, Nyāsavimśati 3*a*, Gōdāstuti 8*a*, Abhītistava 10*a*, Śrīguṇaratnakōśa 13*a*, Jitantēstōtra 20*a*, 22*a*, 51*a* and 52, Sundarabāhustava 23*a*, Śaraṇāgatidīpikā 24*a*, Atimānuṣastava 31*a*, Nityārcanavidhi 41*a*, Varadarājaśataka 45*a*, Catuśślōkī 53*a*, Kṣamāṣōḍaśī 55*a*, Daśāvatārastōtra 59*a*, Rahasyatrayārtha 61*b*, Śrīraṅgarājamaṅgalāśaṁsana 67*a*, Yatirājasaptati 70*a*.

Complete.

On how the sacrificial ceremony indicative of self-surrender to God should be performed.

Beginning:

प्राणाग्निहोत्रं करिष्ये—

अन्नपतेऽन्नस्य नो धेहि, भूरन्नमग्नये पृथिव्यै स्वाहा, भुवोऽन्नं वायवेऽन्तरिक्षाय स्वाहा, सुवरन्नमादित्याय दिवे स्वाहा ।

End:

समानाहुतिमन्त्रस्य विद्युद्वर्णो रूपाग्नि ऋषिः, पङ्क्तिश्छन्दः, पर्ज, न्यो देवता ।

श्रद्धायां समाने नि . अयमहमग्नि ऋषिः, वैश्वानरीयच्छन्दः-वायुर्देवता ।

सच्चिदानन्दात्मनि गोविन्दाय स्वाहा ॥

No. 5778. प्राणाग्निहोत्रविधिः.

PRĀṆĀGNIHŌTRAVIDHIḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 22*a* of the MS. described under No. 2902.

Complete.

On the sacrificial ceremonial of self-surrender to God with a view to attain the final emancipation of the soul.

Beginning :

नारद उवाच—

विनयेनोपसङ्क्रम्य ब्रह्माणं नारदोऽब्रवीत् ।
प्राणाग्निहोत्रं विधिवत् वद लोकपितामह ॥

ब्रह्मोवाच—

प्राणाग्निहोत्रं वक्ष्यामि सर्वयज्ञेषु दुर्लभम् ।
यज्ज्ञात्वा मुच्यते जन्तुर्जन्ममृत्युज्वरादिभिः ॥
परिज्ञानेन मुच्यन्ते नराः पातककिल्बिषैः ।
विधिना भुञ्जते येन मुच्यते च ऋणत्रयात् ॥
हृत्पुण्डरीकमरणी मनो मथनसंज्ञिताः(तम्) ।
वायुरज्वा मथेदग्निरा(मा)त्माध्वर्युः प्रकीर्तितः ॥

End :

पञ्चभिः पञ्चकोट्यस्तु न सन्तृप्तिर्यदा भवेत् ।
दातुश्चैव तु यत्पुण्यं भोक्तुश्चैव तु यत्फलम् ॥
तत्फलं समवाप्नोति विष्णुसायुज्यमाप्नुयात् ।
भोक्ता भोजयिता चैव उभौ तौ स्वर्गगामिनौ ॥

Colophon :

इति ब्रह्मप्रोक्ते नारदसंवादे प्राणाग्निहोत्रविधिः ॥

No. 5779. भारतसावित्री.
BHĀRATASĀVITRĪ.

Substance, palm-leaf. Size, $18\frac{5}{8} \times 1\frac{5}{8}$ inches. Pages, 11. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 1 and 16*a*. The other works herein are Kṛṣṇakarṇāmṛta 5*a*, Praṇayakalaha (Maṇipravāla) 9*a*, Bhārataparvasūci 18*a*.

Complete.

Gives what is conceived to be the sacred essence of the teachings contained in the Mahābhārata, this essence being held to be the discarding of the disabilities of caste in relation to all true worshippers of Viṣṇu.

Beginning:

द्वारवत्यां स्थितं कृष्णं समाहूय युधिष्ठिरः ।
सन्ध्यर्थं प्रेषयामास कुरूणां पाण्डवैस्सह ॥
कृष्णस्स रथवेगेन गत्वा वै हस्तिनापुरीम् ।
विदुरस्य गृहं गत्वा दृष्टस्तेन महात्मना ॥

* * * *

कृष्ण उवाच—

साधु साधु महाप्राज्ञ सर्वशास्त्रविशारद ।
प्रीतोऽस्मि ते वरं ब्रूहि दास्यामि कुरुनन्दन ॥

विदुर उवाच—

भोजनं विप्रसङ्कीर्णं बन्धुसङ्कीर्णमन्दिरम् ।
शयनं सुतसङ्कीर्णं देहि मे मधुसूदन ॥

सञ्जय उवाच—

कृष्णस्यागमनं श्रुत्वा राजराजस्सुयोधनः ।
विदुरस्य गृहं गत्वा राजा वचनमब्रवीत् ॥
भीष्मद्रोणावतिक्रम्य मां चैव मधुसूदन ।
किमर्थं पुण्डरीकाक्ष कृतं वृषलभोजनम् ॥

कृष्ण उवाच—

न शूद्रा भगवद्भक्ता विप्रा भागवतास्स्मृताः ।
सर्ववर्णेषु ते शूद्रा ये ह्यभक्ता जनार्दने ॥

शुद्धं भागवतस्यान्नं शुद्धं भागीरथीजलम् ।
शुद्धं विष्णुपदध्यानं शुद्धमेकादशीव्रतम् ॥
चण्डालमपि मद्भक्तं नावमन्येत बुद्धिमान् ।

End:

अहोरात्रकृतं पापं श्रवणादेव नश्यति ।
पठतां शृण्वतां चैव विष्णुमाहात्म्यमुत्तमम् ॥
दुस्स्वप्ननाशनं तेषां सुखोदर्कों भविष्यति ।
स द्विजः पाण्डवा धन्य(ा): प्रसन्ने पुरुषोत्तमे ॥

Colophon:

भारतसावित्री सम्पूर्णा ॥

No. 5780. भारतसावित्री.
BHĀRATASĀVITRĪ.

Substance, paper. Size, $7\frac{1}{2} \times 4\frac{5}{8}$ inches. Pages, 4. Lines, 14 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 2*a*. The other works herein are Prāṇapratiṣṭhāmantra 1*a*, Gāyatrīrāmāyaṇa 4*a*, Guruparamparā 5*a*, Aṣṭōttaraśatadivyadēśanāmāni 6*a*, Vēṅkaṭēśasuprabhāta 8*a*

Complete.

Same work as the above.

No. 5781. भारतसावित्री.
BHĀRATASĀVITRĪ.

Substance, palm-leaf. Size, $7\frac{7}{8} \times 1\frac{3}{8}$ inches. Pages, 11. Lines, 8 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Begins on fol. 12*a*. The other works herein are Pāṇḍavanīti and Pañcāyudhastōtra 17*a*, Rāmakavaca 18*a*, Sūryakavaca 19*a*, Viṣṇubhujaṅga 19*b*, Mānasikasnānavidhi 21*b*, Garuḍakavaca 22*a*.

Complete.

Same work as the above.

No. 5782. भारतसावित्री.
BHĀRATASĀVITRĪ.

Pages, 4. Lines, 9 on a page.

Begins on fol. 17*a* of the MS. described under No. 2372.

Complete.

Same work as the above.

No. 5783. भारतसावित्री.
BHĀRATASĀVITRĪ.

Pages, 9. Lines, 9 on a page.

Begins on fol. 30*a* of the MS. described under No. 2046.

Complete.

Same work as the above.

No. 5784. भारतसावित्री.
BHĀRATASĀVITRĪ.

Substance, palm-leaf. Size, $14\frac{1}{8} \times 1\frac{1}{8}$ inches. Pages, 10. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 85*a*. The other works herein are Subhāṣita (of Bhartṛhari) 1*a*, Mēghadūtavyākhyā 42*a*.

Complete.

Same work as the above.

Colophon:

इत्यष्टादशपर्वसारे व्यासकृतौ स्कन्दपुराणे भारतसावित्री[स्तोत्रं]-सम्पूर्णा ॥

No. 5785. भारतसावित्री.
BHĀRATASĀVITRĪ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 41*a* of the MS. described under No. 2571.

Incomplete.

Same work as the above.

No. 5786. भारतसावित्री.

BHĀRATASĀVITRĪ.

Substance, palm-leaf. Size, $13\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 10. Lines, 6 on a page. Character, Nandināgarī. Condition, slightly injured. Appearance, old.

Begins on fol. 43*a*. The other works herein are Śarīraśuddhimantra 1*a*, Tattvanyāsa 2*a*, Mātṛkānyāsa 3*b*, Praṇavamantra 4*b*, Nārāyaṇāṣṭākṣaramantra 5*a*, Vyāhṛtimantra 5*b*, Vāsudēvadvādaśākṣaramantra 6*a*, Brahmagāyatrī 6*b*, Mātṛkāmantra 7*a*, Puruṣasūktamantra, Viṣṇuṣaḍakṣaramantra 7*b*, Varāhatrayastriṁśadakṣaramantra 8*a*, Varāhasaptākṣaramantra 8*b*, Varāhacaturdaśākṣaramantra, Śrīkarāṣṭākṣaramantra 9*a*, Nṛsiṁhadvātriṁśadakṣaramantra, 9*b*, Nṛsiṁhamantra Nṛsiṁhagāyatrī 10*a*, Haṁsamantra, Haṁsasaptākṣaramantra 10*b*, Haṁsāṣṭākṣaramantra, Dadhivāmanamantra 11*a*, Vāmanamantra, Trivikramagāyatrī 11*b*, Paraśurāmamantra 12*a*, Rāmamantra, Bhārgavāṣṭākṣaramantra 12*b*, Rāghavamantra, Bhārgavaikākṣaramantra, Rāghavaikākṣaramantra 13*a*, Madanagōpālamantra, Kṛṣṇaṣaḍakṣaramantra 13*b*, Kṛṣṇaikākṣaramantra, Vēdavyāsāṣṭākṣaramantra 14*a*, Vēdavyāsagāyatrī, Vēdavyāsanavākṣarīmantra 14*b*, Hayagrīvāṣṭākṣaramantra, Kapilāṣṭākṣaramantra 15*a*, Dattātrēyamantra, Dattātrēyanavākṣaramantra, Viṣṇusūktamantra 15*b*, Yōjātasūktamantra 16*a*, Parōmātrētimantra 17*a*, Ya-imāviśvētimantra 18*a*, Lakṣmīsūkta 19*a*, Lakṣmīmantra 19*b*, Bhūbījaikākṣaramantra, Durgābījaikākṣaramantra 20*a*, Bhūpañcākṣaramantra, Durgāṣaḍakṣaramantra 20*b*, Durgaikarcamantra, Hiraṇyagarbha ūktamantra 21*a*, Brahmapañcākṣaramantra, Hiraṇyagarbhāṣṭākṣaramantra, Mukhyaprāṇamantra 22*b*, Pañcaprāṇamantra 23*b*, Brahmāṇīmantra, Bhāratīmantra 25*a*, 25*b*, Brahmāṇī-ṛṅmantra 25*b*, Brahmāṇīpañcākṣaramantra, Bhāratīpañcākṣaramantra, Śivapañcākṣarīmantra 26*a*, Pārvatīpañcākṣarīmantra, Śēṣaṣaḍakṣarīmantra 26*b*, Garuḍapañcākṣarīmantra, Dikpālāṣṭakamantra 27*a*, Īśānamantra, Skandamantra, Sūryāṣṭākṣarīmantra 29*a*, Vināyakāṣṭākṣarīmantra, Dhanvantarimantra 29*b*, Dhanvantarimantra (different) 30*a*, Śiṁśumāramantra 30*b*, Viṣṇupūjā (of Madhva-religion) 31*a*,

Mahābhiṣēkakhaṇḍa 41*a*, Rāmāṣṭōttaraśatanāmastōtra 48*a*, Pañcāyudhastōtra 49*a*, Viṣṇukavaca 49*b*, Hanumatkavaca 50*b*, Rāmāṣṭōttaraśatanāmāvalī 52*a*.

Complete.

Same work as the above.

No. 5787. भारतसावित्री.

BHĀRATASĀVITRĪ.

Substance, palm-leaf. Size, $11\frac{7}{8} \times 1\frac{1}{4}$ inches. Pages, 9. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, new.

Begins on fol. 4*a*. The other works herein are Śivaliṅgāṣṭaka 1*a*, Rāmastōtra 1*b*, Rāmalakṣmaṇāṣṭaka 3*a*, Kṛṣṇāṣṭaka 3*b*, Viśvēśvarāṣṭaka 8*b*, Viśvanāthāṣṭaka 9*b*, Maṇikarṇikāṣṭaka 10*a*, Bhāgīrathyaṣṭaka 11*a*, Bījabhairavāṣṭaka 11*b*, Sarasvatīstōtra 13*a*.

Complete.

Same work as the above.

No. 5788. भारतसावित्री.

BHĀRATASĀVITRĪ.

Substance, palm-leaf. Size, $7\frac{7}{8} \times 1\frac{3}{8}$ inches. Pages, 10. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, new.

Begins on fol. 1*a*. The other works herein are Rāmadvādaśanāmastōtra 6*a*, Mānasikasnāna 7*a*, Śanaiścarastōtra 8*a*, Dattātrēyamantra 14*b*, Dattātrēyakavaca 15*b*, Hanumatkavaca 20*b*, Nārāyaṇakavaca 22*b*, Ādityahṛdaya 28*b*, Gāyatrīkavaca 29*b*, Hanūmanmālāmantra 31*a*, (Kanarese work) 35*a*, Śrīnivāsagadya 51*a*, (Kanarese Kīrtanas) 54*a*.

Complete.

Same work as the above.

No. 5789. मानसिकस्नानम्.
MĀNASIKASNĀNAM.

Substance, palm-leaf. Size, $12\frac{1}{8} \times 1\frac{3}{8}$ inches. Pages, 3. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 7*b*. The other works herein are Viṣṇusahasranāmastōtra 1*a*, Vighnēśvarāṣṭōttaraśatanāmāvalī 2*a*, Śivāṣṭōttaraśatanāmāvalī 5*b*, Lakṣmyaṣṭōttaraśata 9*a*, Ādityahṛdaya (Āraṇyaparvastha) 12*a*, Aparādhastōtra 24*a*, Narasimhāṣṭōttaraśata 25*a*, Dēvyaṣṭōttaraśata 27*a*, Śivāṣṭōttaraśata 27*b*, Narasimhāṣṭōttaraśatanāmāvalī 29*b*.

Complete.

On the efficacy of the ceremonial mental bath and purification.

Beginning:

स्वस्थितं पुण्डरीकाक्षं चिन्तयेत्पुरुषोत्तमम् ।
अनन्तादित्यसङ्काशं वासुदेवं चतुर्भुजम् ॥
शङ्खचक्रगदापद्मधारिणं वनमालिनम् ।
ध्वजवज्राङ्कशैलक्ष्यपादपद्मैस्सुनिर्मलम् ॥
त्वत्पादपद्मजां गङ्गां निपतन्तीं स्वमूर्धनि ।
चिन्तयेद्ब्रह्मरन्ध्रेण प्रविशन्तीं स्वकां तनुम् ॥
तया संक्षाळयेत्सर्वमन्तर्देहगतं मलम् ।
तत्क्षणाद्विरजामन्त्रो जायते स्फटिकोपमः ॥
इदं मानसिकं स्नानं प्रोक्तं हरिहरादिभिः ।
सार्धत्रिकोटितीर्थेषु स्नानात् कोटिगुणाधिकम् ॥

End:

ब्रह्मैवाहं न संसारी मुक्तोऽहमिति भावयेत् ।
अशक्नुवन् भावयितुं वाक्यमेवैतदभ्यसेत् ॥
कृष्णोऽनन्तोऽच्युतश्चक्री वैकुण्ठोऽथ जनार्दनः ।

* * * *

गोविन्देति सदा स्नानं गोविन्देति सदा जपः ।
गोविन्देति सदा ध्यानं सदा गोविन्दकीर्तनम् ॥

No. **5790.** मानसिकस्नानम्.

MĀNASIKASNĀNAM.

Pages, 3. Lines, ' on a page.

Begins on fol. 34*a* of the MS. described under No. 2821.

Incomplete.

Same work as the above.

No. **5791.** मानसिकस्नानम्.

MĀNASIKASNĀNAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 21*b* of the MS. described under No. 5781.

Complete.

Same work as the above.

No. **5792.** मानसिकस्नानम्.

MĀNASIKASNĀNAM.

Pages, 2. Lines, 13 on a page.

Begins on fol. 30*a* of the MS. described under No. 2398.

Complete.

Same work as the above.

No. **5793.** मानसिकस्नानम्.

MĀNASIKASNĀNAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 7*a* of the MS. described under No. 5788.

Complete.

Same work as the above.

No. 5794. मानसिकस्नानम्.

MĀNASIKASNĀNAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 72*b* of the MS. described under No. 757.

Complete.

Same work as the above.

This is taken from the Brahmāṇḍa Purāṇa and is attributed to Harihara.

No. 5795. मानसिकस्नानम्.

MĀNASIKASNĀNAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 58*a* of the MS. described under No. 2040.

Complete.

Same work as the above.

No. 5796. मुद्राप्रकरणम्.

MUDRĀPRAKARAṆAM.

Pages, 22. Lines, 7 on a page.

Begins on fol. 57*a* of the MS. described under No. 5670.

Complete.

On the characteristics of the different kinds of Mudrās, and on when to use them.

Beginning:

मुद्रालक्षणम् —

अथातस्संप्रवक्ष्यामि मुद्राणां लक्षणान्यघ(ह)म् ।
विनियोगश्च मुद्राणां क्रमेण कथयामि ते ॥
अङ्कुशं कुम्भमुद्रा च अग्निप्राकारमुद्रिका ।
ऋष्यादिन्यासमुद्रा च मालिनी धेनुमुद्रिका ॥

शङ्खमुद्रा योनिमुद्रा मत्स्यमुद्रा तथैव च ।
आवाहनादिमुद्राणां नवं गणपतेस्तथा ॥
मुद्रासप्तकमाख्यातं शक्तेस्तु दश मुद्रिकाः ।
विष्णोरेकोनविंशच्च शिवस्य दश मुद्रिकाः ॥
गन्धादिपञ्चमुद्राश्च चक्रग्रासाख्यमुद्रिके ।
प्राणादिपञ्चमुद्राश्च सप्तजिह्वाख्यमुद्रिका ॥

End:

मध्यमामध्यपार्श्वाधः कनिष्ठाग्रविपर्ययात् ।
अनामिकेऽधो व्यत्यस्ते तर्जन्यावङ्कुशाकृती ॥
इतरे तन्नखाग्राग्रे बीजमुद्रेयमीरिता ।
कनिष्ठाङ्गुष्ठसंयोगान्महायोनित्रिकण्टना ॥
कनिष्ठानामिकामध्या व्यत्यस्ताः पृष्ठतः क्रमात् ।
पलिता ऊर्ध्वयोगेन तर्जनीकौ करौ . . ॥
शक्त्यु(प)स्था[प]नमुद्रैषा जपपूजासमाधिषु ।
मूर्त्तिकारणमेतस्या रचनैषा समन्विता ॥

Colophon:

इति मुद्राप्रकरणं संपूर्णम् ॥

No. **5797.** मुद्राविधानलक्षणम्.

MUDRĀVIDHĀNALAKṢAṆAM.

Pages, 15. Lines, 25 on a page.

Begins on fol. 55*b* of the MS. described under No. 5482.

Incomplete.

Describes the different kinds of Mudrās.

Beginning:

स्पृशेत् कन्दा(स्कन्धा)दिपादान्तं तर्जन्यङ्गुष्ठसृष्टया ।
करद्वंशे(द्वे)न वामोरु मुद्रेयं वनमालिका ॥

वामाङ्गुष्ठन्तु सङ्गृह्य दक्षिणेन तु मुष्टिना ।
कृत्वोत्तानं ततो मुष्टिमङ्गुष्ठन्तु प्रसारयेत् ॥

वामाङ्गुल्यः तथाश्लिष्टाः संसक्ताः संप्रसारिणः ।
दक्षिणाङ्गुष्ठसन्तुष्टा मुद्रैषा शङ्खसंज्ञिका ॥

End:

अङ्गुभ्य[illegible]तु करयोरथोक्तान्यकनिष्ठिके ।
अधोमुखीभिः सर्वाभिः सेन्द्रियैर्नृहरेर्मता ॥

देवोपरि करं कामं कृत्वा नासमधस्सुधीः ।
नामातिनीतिसंप्रोक्ता मुद्रा नाराचसंज्ञिका ॥

No. 5798. रामपट्टाभिषेकविधिः.

RĀMAPAṬṬĀBHIṢĒKAVIDHIḤ.

Substance, (Śrītāla) palm-leaf. Size, $17\frac{1}{8} \times 1\frac{1}{8}$ inches. Pages, 16. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Mantrajāla 9*a* Complete.

On the religious celebration of the coronation of Śrī-Rāma at the conclusion of the religious reading of the Rāmāyaṇa.

Beginning:

मया प्रतिदिननियमाचर(रित)रामायणपारायणसमग्रसम्पूर्णफलावाप्त्यर्थं काण्डसर्गश्लोकश्लोकार्द्धपादादिकृत्स्नसाङ्गतफलसिद्ध्यर्थं श्रीसीतारामप्रीत्यर्थं श्रीरामपट्टाभिषेचनं कर्तुकामः शान्त्यर्थं पुण्याहवाचनङ्करिष्ये, यथाविधि पुण्याहं कृत्वा आचार्यान्वरयित्वा—

पट्टाभिषेचनं कुर्वे श्रीरामस्य द्विजोत्तम ।
तत्राचार्यं वृणे त्वान्तु श्रीरामोऽसि त्वमेव हि ॥

मण्टपं कृत्वा चतुर्दिक्षु चतुश्शाला[न्]स्स्थापयेत् ।

End:

सर्वेभ्यो दक्षिणान्दद्यात्, दशदानकन्यादान . . . . सर्वो(प)स्करशूर्पोपायनानि भूदानादिकन्दद्यात् । सीताप्रीत्यै गुरुपत्न्यादिभ्यो दद्यात् । ब्राह्मणान् भोजयेत् ॥

Colophon:

इत्युमासंहितोक्तपट्टाभिषेकविधिः सम्पूर्णः ॥

No. **5799.** रामपूजा.

RĀMAPŪJĀ.

Pages, 8. Lines, 9 on a page.

Begins on fol. 61*a* of the MS. described under No. 3776.

Complete.

On the worship of Rāma.

Beginning:

रामपूजां प्रवक्ष्यामि धर्मादीनां सुसिद्धये ।
शुद्धासने समासीनः प्राणानायम्य तत्परः ॥
ततस्सङ्कल्प्य विधिवत् नत्वा गणपतिं शिवम् ।
क्षेत्रपालं तथा दुर्गां नत्वा गुरुपरम्पराम् ॥
भूतशुद्धिं ततः कृत्वा मातृका विन्यसेत्क्रमात् ।
अथ श्रीराममन्त्रस्य करन्यासादिकं ततः ॥
मनोरक्षरविन्यासमृष्यादीनां तु विन्यसेत् ।

End:

विशुद्धज्ञानरूपाय नमो रामाय वेधसे ।
अन्तःकरणमे(सं)शुद्धिं देहि मे रघुनन्दन ॥
प्रार्थनम् ॥

No. 5800. राममानसपूजा.

RĀMAMĀNASAPŪJĀ.

Pages, 24. Lines, 5 on a page.

Begins on fol. 109*a* of the MS. described under No. 5660.

Incomplete.

On the mental worship of Rāma.

Beginning:

सुतीक्ष्ण उवाच—

हृदये मानसे पूजा कीदृशी वा वद प्रभो ।
उपचारैः कतिविधैः कीर्त्यते रघुनन्दनः ॥

अगस्त्य उवाच—

रामं पद्मपलाशाक्षं कालाम्बुदसमप्रभम् ।
स्मितवक्त्रं सुखासीनं चिन्तयेच्चिन्तितार्थदम् ॥
रागादिकलुषं चित्तं वैराग्येण सुनिर्मलम् ।
कृत्वा ध्यायेत्सदा रामं भवबन्धविमुक्तये ॥

End:

नमो नमस्ते भरताग्रजाय नमोऽस्तु(सत्य)प्रतिपालकाय ।
नमो नमस्तेऽस्तु जगन्मयाय वेदान्तवेद्याय नमो नमस्ते ॥
अनन्त विश्वेश हरे मुकुन्द . . . . . . ।
(श्री)वल्लभानन्तजगन्निवास श्रीराम राजेन्द्र नमो नमस्ते ॥

No. 5801. रुद्रमन्त्रहोमविधिः.

RUDRAMANTRAHŌMAVIDHIḤ.

Pages, 6. Lines, 7 on a page.

Begins on fol. 126*a* of the MS. described under No. 5600.

Complete.

On the performance of a fire-sacrifice with the aid of **Vedic Mantras** relating to Śiva.

Beginning:

नमस्ते रुद्रमन्यव . उतो ते नमः स्वाहा । रुद्रायेदम् । या त इषु . मृडय । या ते रुद्र . शीहि । यामिषुं . जगत् । शिवेन वचसा . असत् । अध्यवोचत् . धान्यः । असौ यस्ता . महे । असौ यो . हार्यः ।

End:

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् ।
रत्नासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्वरूपं निखिलभयहरं पञ्चवक्त्रं त्रिणेत्रम् ॥
नमस्ते विघनानेतुप्राणो रुद्रः प्रकीर्तितः(?) ।
नमो रुद्राय वै चेति पञ्च रुद्राः प्रकीर्तिताः ॥

No. 5802. वनभोजनविधिः.

VANABHŌJANAVIDHIḤ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 19*b* of the MS. described under No. 2908.

Complete.

On details connected with Vanabhōjana, which is a religious feast in which Brahmins are fed in a garden.

Beginning:

द्वादश्यां वा चतुर्दश्यां पौर्णमास्यामथापि वा ।
पञ्चम्यां वा महाप्राज्ञ वनभोजनमाचरेत् ॥
सर्वोपस्करसंयुक्तं वृद्धबालैश्च संयुतः ।
वनं प्रवेशयेद्धीमान् धात्रीवृक्षैस्सुशोभितम् ॥
चूतैर्बिल्वैस्तथाश्वत्थैः पिचुमन्दैः कदम्बकैः ।
न्यग्रोधैः तिन्त्रिणीवृक्षैः समन्तात्परिशोभितम् ॥

तत्र गत्वा महाप्राज्ञ पुण्याहं वाचयेत्पुरा ।
वास्तुपुरुषं तथा पूज्य धात्रीमूले तु कारयेत् ॥

End:

अश्वमेधसहस्रेण वाजपेयशतेन च ।
यत्फलं समवाप्नोति तत्फलं वनभोजने ॥

Colophon:

इति श्रीपाञ्चरात्रे भरद्वाजसंहितायां ब्रह्म . . . संवादे-वनभोजनविधिर्नाम पञ्चत्रिंशोऽध्यायः ॥

No. 5803. विश्वामित्रसंहिता.

VIŚVĀMITRASAṀHITĀ.

Pages, 111. Lines, 7 on a page.

Begins on fol. 21*a* of the MS. described under No. 5192.

Adhyāyas 1 to 12 complete, 13th incomplete.

On the use and value of the Gāyatrīmantra

Beginning:

सहस्रदळपङ्कजे विमलशीतरश्मिप्रभे
वराभयकराम्बुजं विमलगन्धपुष्पाम्बरम् ।
प्रसन्नवदनेक्षणं सकलदेवतारूपिणं
स्मरेच्छिरासि हंसगं तदभिधानपूर्वं गुरुम् ॥
चतुःपञ्चघटिकामानं मुहूर्तं ब्रह्मसंज्ञिकम् ।
(पञ्च)पञ्चघटी ज्ञेया उषःकाल इति स्मृतः ॥

* * * *

प्रातःकाले जपं कुर्यान्नित्यं नित्यविदो विदुः ।
रविबिम्बं समालोक्य उपस्थानं समाचरेत् ॥
कालातीतं न कर्तव्यं कालसं . . . यमे ।
तस्मात्सर्वप्रयत्नेन कालतो नियमस्स्मृतः ॥

End:

इति विश्वामित्रसंहितायां प्राणायामलक्षणं नाम द्वादशोऽध्यायः ॥

भगवन् सर्वलोकेश सर्वशास्त्रार्थपारग ।
श्रुतिस्मृतिपुराणानां रहस्यं त्वन्मुखाच्छ्रुतम् ॥
सर्वपापहरं देव केनाविद्या निवर्तते ।
केन वा ब्रह्मविज्ञानं किं वा मोक्षस्य कारणम् ॥

* * * *

पृथुजङ्घा पृथुभुजा पृथुपादा पृथूक(द)रा ।
प्रवाळशोभा पिङ्गाक्षी पीतवास(स्समावृ)ना ॥

No. 5804. शाण्डिल्यसूत्रभाष्यम्.

SĀṆḌILYASŪTRABHĀṢYAM.

Pages, 30. Lines, 12 on a page.

Begins on fol. 19*a* of the MS. described under No. 4577.

Complete.

A commentary on the Bhaktisūtras of Śāṇḍilya: by Svapnēśvarācārya. It is called Trilakṣaṇā Bhaktimīmāṁsā.

Beginning:

शाण्डिल्यशतसूत्रीयभाष्यम्—

गोविन्दचरणाम्भोजमधुनो महदद्भुतम् ।
यत्पायिनो न मुह्यन्ति मुह्यन्ति यदपायिनः ॥
प्रपद्य परमं देवं श्रीस्वप्नेश्वरसूरिणा ।
शाण्डिल्यशतसूत्रीयभाष्यमाभाष्यतेऽधुना ॥

जीवानां ब्रह्मभावापत्तिर्मुक्तिरिति वक्ष्यते — जीवा ब्रह्मणोऽत्यन्तमभिन्ना इति । तेषां संसारास्त्रिगुणान्तःकरणकृतोपाधिकृतो न साहजिकः स्फटिकस्येव जपाकुसुमादिसन्निधिकृतं लौहित्यादिकम्; स चौपाधिकत्वादेव न

ज्ञानेन निवर्तनीयः ? किमुपाध्युपधेययोरन्यतरहानेन तत्संबन्धहानेन वा ? न हि निपुणतरदर्शिनोऽप्युपाधियोगे स्फटिकलौहित्यभ्रमनिवृत्तिरस्ति। तत्रेह व(न) सर्वसत्तास्फुरणात्मनो हानिः संभवति ; न च संबन्धस्य तस्य तदुभयस्वरूपानतिरेकात्परिशेषादुपाधिहानादेव भ्रमनिवृत्तिर्वा । आत्मज्ञानात् उपाधिहाने च कारणान्तरमन्वेष्टव्यम् ; तच्चेश्वरभक्तिरेव अलौकिकत्वाच्छ्रुतिस्मृतिसिद्धा यथा—

तत्र सत्त्वं निर्मलत्वात् प्रकाशकमनामयम् ।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ॥
रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् ।
तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम् ॥
तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् ।
प्रमादालस्यनिद्राभिस्तां निबध्नाति भारत ॥ इत्युपक्रम्य,
मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।
सगुणान् स व्यतीत्यैतान् ब्रह्मभूयाय कल्पते ॥ इत्युपसंहरन्,

भगवानेवात्ममुक्तेस्त्रिगुणात्मकान्तःकरणलयपूर्वकब्रह्मानन्दावाप्तिलक्षणमुक्ति - हेतुतामाह—आत्मसिद्धिस्तु सर्वसत्ताप्रकाशतयेति । सर्वमेतद्द्वितीयतृतीया-(ध्याययोः)स्फुटीभविष्य(ती)ति । तस्मात्पुरुषार्थहेतुत्वाद्धर्मस्येव भक्तेर्मीमांसाविधित्सया इदं सूत्रम्—“अथातो भक्तिजिज्ञासा” अथेत्ययमधिकारार्थो न त्वानन्तर्यार्थः ।

End:

नचाविर्भावस्याविर्भावान्तरावश्यकत्वे अनवस्थागौरवयोरन्यतरप्रसङ्गः ; घटसामग्र्या एवाविर्भावादस्याविर्भावत्वात् । एवं च घटस्य पूर्वपूर्वाविर्भावतिरोभावपरम्परैव प्रागभावः, तिरोभाव एव नाशः । स च क्वचिदात्यन्तिकोऽपि यथा देवदत्तशरीरस्य यथा वा मुक्तबुद्ध्यादीनामन्योन्याभावात्यन्ताभावौ च परस्परविरुद्धधर्मतदधिकरणयोर्नातिरिच्येते ; अन्यथा अभा-

वेऽप्यभावान्तरस्वीकारप्रसङ्गादिति । प्रलये तु प्रलयाख्यो विकारातिरिक्तवि-कारस्याभाव एव । संस्कारास्तु सूक्ष्मात्मना सन्तीति न कोऽपि दोषः ॥

Colophon:

इति श्रीस्वप्नेश्वराचार्यविरचिते शाण्डिल्यशतसूत्रीयभाष्ये तृतीयाध्यायस्य द्वितीयमाह्निकम् ॥

समाप्तश्च तृतीयाध्यायः ॥

समाप्ता चेयं त्रिलक्षणा भक्तिमीमांसा ॥

No. 5805. शिवमानसिकस्नानम्.

ŚIVAMĀNASIKASNĀNAM.

Substance, palm-leaf. Size, $13\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 5. Lines, 5 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 20*a*. The other works herein are Āhnika 1*a*, Dakṣiṇāmūrtikavaca 12*a*, Gāyatrīśāpavimōcanamantra 15*a*, Mṛtyulāṅgūlastōtramantra 16*a*, Sūryanamaskāramantra 23*a*, Mṛtyulāṅgūlamantrajapavidhi 28*a*.

Complete.

On self-purification by meditating on Śiva.

Beginning:

शिवमानसिकम्—

अखण्डं सच्चिदानन्दमवाङ्मनसगोचरम् ।
आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये ॥
व्योमस्थं प्रभुमीशानं सोमसूर्याग्निलोचनम् ।
सर्वमन्त्रात्मकं देवं सर्वतीर्थमयं स्मरेत् ॥

End:

शारदाभ्रप्रतीकाशं चन्द्रार्धकृतशेखरम् ।
स्मरामीशं महादेवं तेन स्नातो भवाम्यहम् ॥

No. 5806. शौनकप्रतिष्ठा.

ŚAUNAKAPRATIṢṬHĀ.

Substance, paper. Size, 13 × 7⅜ inches. Pages, 22. Lines, 18 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 200*b*. The other work herein is Vaidyārṇava 1*a*.

Incomplete.

On the consecration of the images of Viṣṇu for worship: according to Śaunaka.

Beginning:

शौनकोऽहं प्रवक्ष्यामि प्रतिष्ठाविधिमुत्तमम् ।
साम्प्रतं देवदेवस्य विष्णोरमिततेजसः ॥

विशेषेण मुहूर्तानां तिथिवारर्क्षयोगतः ।
योगादीनां च विज्ञात्वा(य)लक्षणं चापरं वरम् ॥

शिलया दारुणा वापि मृदाद्यैर्निर्मिते गृहे ।
शिल्पलक्षणसंयुक्तां शैलमूर्तिं सदेविकाम् ॥

वक्ष्यमाणशुभे योगे विहायानिष्टवासरम् ।
विधिनास्थाप्य लोकेऽस्मिन् विष्णुलोकं स गच्छति ॥

End:

अधिवासत्रयं चैव मधूच्छिष्टक्रियोत्तमम् ।
तुष्टिकर्मविशेषेण मीनलग्नं विशेषतः ॥

Colophon:

प्रतिष्ठाकर्मणि नक्षत्रलग्नप्रशंसायोगोऽध्यायस्समाप्तः ॥
अस्य ग्रन्थसङ्ख्या सप्तशताधिकपञ्चसहस्रम् ।
इदं पुस्तकं लोकनाथशास्त्रिणा लिखितम् ॥

No. 5807. सद्भागवतशुक्तिमुक्ताफलम्.

SADBHĀGAVATAŚUKTIMUKTĀPHALAM.

Substance, paper. Size, $11\frac{1}{8} \times 9$ inches. Pages, 74. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

Determines the characteristics of those who are piously devoted in love to the worship of Viṣṇu.

By Vōpadēva.

Beginning :

विष्णुं पञ्चात्मकं वन्दे भक्त्याष्टादशभेदया ।
साङ्गवर्गोनविंशत्या भक्तैर्नवभिराश्रितम् ॥

विष्णुप्रीत्यै चतुर्वर्गचिन्तामण्यामजीगणत् ।
भेदान्व्रतानां दानानां तीर्थानां मोक्षवर्त्मनाम् ॥

मूर्तिप्रसादपूजानां हेमाद्रिर्गणकाग्रणीः ।
विष्णुभक्त्यङ्गभक्तानां गणयत्युक्तसारधीः ॥

मुक्ताफलेन ग्रन्थेन सद्भागवतशुक्तिना ।
भक्तिस्वात्यम्बुना मुग्धमार्कण्डेयाशिशुश्रियम् ॥

मुक्ताफलं सुखचितस्फुटभक्तिभेदप्रत्यक्षराचितलसत्पदपद्मरागम् ।
हेमाद्रिसम्भवसुवर्णनिवेशरम्यं कण्ठे कुरुध्व(ष्व)मनुजाद्यपवर्गलक्ष्मीम् ॥

* * * *

सर्वथा निराकारस्साकारश्च । अनवच्छिन्नचैतन्यं निराकारः । सत्त्वावच्छिन्नं साकारः । स चतुर्धा रजस्तमोभ्यां युक्ते पुरुषे सत्त्वः (सत्त्वे पुरुषः), रजसा ब्रह्मा, तमसा रुद्रः, शुद्धे विष्णुरेव । अगोचरस्य गोचरत्वे हेतुः प्रकृतिगुणः सत्त्वम् । गोचरस्य बहुरूपत्वे रजः । बहुरूपस्य तिरोहितत्वे तमः ।

* * * *

अथ भक्तिष्वधिकारिणः—

गोप्यः कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृपाः ।
सम्बन्धाद्वृष्णयः स्नेहाद्यूयं भक्त्या वयं विभो ॥

भक्त्या वयमित्यत्र विभागः—

निर्विण्णानां ज्ञानयोगो ज्ञानिनामिह कर्मसु ।
तेष्वनिर्विण्णचित्तानां कर्मयोगस्तु कामिनाम् ॥

* * * *

इति श्रीक्ष्मापालङ्करणाधीश्वरेण हेमाद्रिणा विबुधचक्रचूडामणिवोपदेव-कारितं मुक्ताफलं सम्पूर्णम् ॥

End:

श्रेयसामपि सर्वेषामात्मा ह्यवधिरर्थतः ।
सर्वेषामपि भूतानां हरिरात्मात्मदः प्रियः ॥
यथा तरोर्मूलनिषेचनेन तृप्यन्ति तत्स्कन्धभुजोपशाखाः ।
प्राणोपहाराच्च तथेन्द्रियाणां तथैव सर्वार्हणमच्युतेज्या ॥

Colophon:

Begins on fol. 97*a* of the MS. described under No. 5566.

Complete.

Same as the above.

In the end, the following passage is found in addition :—

अक्षरलक्षपुरश्चरणं कुर्यात् । तर्पणहोमदशांशः ॥

No. 5981. आपदुद्धारणवटुकभैरवमन्त्रः.

ĀPADUDDHĀRAṆAVAṬUKABHAIRAVAMANTRAḤ.

Pages, 2. Lines, 14 on a page.

Begins on fol. 17*b* of the MS. described under No. 5673.

Complete.

Similar to the above.

Beginning:

अस्य श्रीआपदुद्धारणवटुकभैरवमहामन्त्रस्य स्कन्द ऋषिः, अनुष्टुप् छन्दः, श्रीआपदुद्धारणवटुकभैरवो देवता; ह्रां बीजं, ह्रीं शक्तिः, ह्रूं कीलकं, मम श्रीआपदुद्धारणवटुकभैरवप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

मनुः—

ओं ह्रीं वटुकाय आपदुद्धारणाय कुरु कुरु वटुकाय ह्रीम् ॥

No. 5982. आपदुद्धारणवटुकभैरवमन्त्रः.

ĀPADUDDHĀRAṆAVAṬUKABHAIRAVAMANTRAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 5*a* of the MS. described under No. 673.

Complete.

Similar to the above.

Beginning:

अस्य श्रीआपदुद्धारणमहामन्त्रस्य स्वच्छन्दभैरव ऋषिः, अनुष्टुप् छन्दः, आपदुद्धारणमहाभैरवो देवता; ओं बीजं, वं शक्तिः, स्वाहा कीलकं, मम वटुकभैरवप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

ओं ह्रीं वटुकाय आपदुद्धारणाय कुरु कुरु वटुकाय ह्रीं ओं स्वाहा—वटुकां श्रीपादुकां पूजयामि तर्पयामि नमः ॥

No 5983. आपदुद्धारणवटुकभैरवमन्त्रः.

ĀPADUDDHĀRAṆAVAṬUKABHAIRAVAMANTRAḤ.

Pages, 4. Lines, 14 on a page.

Begins on fol. 47*a* of the MS. described under No. 5673.

Complete.

Similar to the above.

Beginning:

अस्य श्रीआपदुद्धार(ण)वटुकभैरवमहामन्त्रस्य बृहदारण्य ऋषिः, गायत्री छन्दः, श्रीआपदुद्धारणवटुकभैरवो देवता; वटुकायेति बीजं, वं शक्तिः, नमः कीलकं, मम सकलापन्निवृत्त्यर्थे श्रीमदापदुद्धारकवटुकभैरवप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

कुरुद्वयं ततः पश्चाद्वटुकाय पुनः क्षिपेत् ।
देवीप्रणवमुद्धृत्य मन्त्रोद्धारमिमं प्रिये ॥

No. **5984.** आपदुद्धारणस्तोत्रमन्त्रः.

ĀPADUDDHĀRAṆASTŌTRAMANTRAḤ.

Pages, 11. Lines, 6 on a page.

Begins on fol. 38b of the MS. described under No. 5822.

Complete.

This Mantra is addressed to Rāma as an incarnation of Viṣṇu, and is supposed to enable one to win the favour of Rāma and to overcome difficulties and dangers.

Beginning:

अस्य श्रीआपदुद्धारणस्तोत्रमहामन्त्रस्य ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, श्रीरामचन्द्रो देवता, श्रीरामचन्द्रप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

संसारबन्धनान्मुक्तिर्विरक्तिस्सर्वदा भवेत् ।
इह भुक्त्वाखिलान् भोगान् याति विष्णोः परं पदम् ॥

Colophon:

इति विष्ण्वापदुद्धारणमन्त्रः समाप्तः ॥

No. **5985.** आम्नायमन्त्रमालिकाध्यानम्.

AMNĀYAMANTRAMĀLIKĀDHYĀNAM.

Pages, 10. Lines, 21 on a page.

Begins on fol. 116a of the MS. described under No. 2373.

Complete.

A collection of stanzas describing the different ways in which the goddess Śakti should be meditated upon while reciting the different Śakti-mantras.

Beginning :

नवाक्षरध्यानम्—

ओंबीजमादीन्दुसमानवर्णं ह्रींसूर्यतेजःप्रतिमद्वितीयम् ।
क्लींमूर्तिवैश्वानरतुल्यरूपं तृतीयमानन्दसुखाय चिन्त्यम् ॥
चांशुद्धजाम्बूनदकान्तितुल्यं मुंपश्चमं रक्ततरं प्रकल्प्यम् ।

* * * *

एतानि बीजानि नवाक्षराणि हेतुं प्रपद्ये सकलार्थसिद्ध्यै ॥

मनुः ओं ह्रीमित्यादि । अम्बिकापादुकाध्यानम्—

निशासमयमध्यस्थां सोमसूर्याग्निलोचनाम् ।
भोगमोक्षकरीं देवीं पादुकारूपिणीं शिवाम् ॥

End :

ध्यायेदिक्षुशरासनं स्मरशरं जिह्वां रिपोस्सर्वदा
हस्तैः कालगदां रुषा प्रदधतीं पीताभगात्रोज्ज्वलाम् ।
पीतालेपनवस्त्रभूषणगदां भास्वत्त्रिणेत्रोज्ज्वलां
भक्तानुग्रहकारिणीं भगवतीं श्रीचण्डचामुण्डिकाम् ॥

No. 5986. आयुर्वर्धनगोपालमन्त्रः.

ĀYURVARDHANAGŌPĀLAMANTRAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 52*a* of the MS. described under No. 5885.

Complete.

This Mantra is addressed to Gōpāla or cow-herd Kṛṣṇa, and is supposed to have the power of bestowing long life.

Beginning:

अस्य श्रीआयुर्वर्धनगोपालमन्त्रस्य नारद ऋषिः, अनुष्टुप् छन्दः, आयुर्वर्धनगोपालो देवता; आं बीजं, ई शक्तिः, ऊं कीलकं, आयुर्वर्धनगोपालप्रीत्यर्थे जपे विनियोगः ।

End:

मनुः——

ओं नमो भगवते गोपालाय स्वाहा ॥

No. 5987. आवहन्तीमन्त्रः.

ĀVAHANTĪMANTRAḤ.

Substance, palm-leaf. Size, 8 × 1⅜ inches. Pages, 3. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 43*b*. The other works herein are Mahāvidyā 1*a*, Bagalācakrōddhāra 35*a*, Śrīcakradhyāna 36*a*, Bētālamantra 37*a*, Tryambakamantra 41*a*, Śivāṣṭōttaraśatanāmāvali 45*a*, Śivāṣṭōttaraśatanāmastōtra 47*a*, Kṛṣṇāṣṭōttaraśatanāmastōtra 48*a*, Śivapūjāvidhāna 50*a*, Śivastōtra 54*a*, Annapūrṇāṣṭōttaraśatanāmāvali 56*b*, Pañcaratnastōtra 57*a*, Prasūtimantra (Telugu) 58*a*, Vāruṇamantra 59*a*, Lakṣmyaṣṭōttaraśatanāmāvali 62*a*, Annapūrṇāṣṭōttaraśatanāmāvali 64*a*, Annapūrṇāṣṭōttaraśatanāmastōtra 66*a*, Rājarājēśvarīstōtra 69*a*.

Complete.

In praise of the goddess Lakṣmī and Annapūrṇēśvarī.

It is supposed to have the power of bestowing prosperity on the supplicant.

Beginning:

अस्य श्रीआवहन्ती अन्नपूर्णे(श्वरी)श्रीमहाविष्णुलक्ष्मीमहामन्त्रराजस्य उमामहेश्वर ऋषिः, अनुष्टुप् त्रिष्टुप् छन्दः, अन्नपूर्णे(श्वरी)श्रीमहाविष्णुः(ष्णोः) लक्ष्मीर्देवता; ओं श्रीम् आवहन्ती वितन्वाना कुर्वाणा चीरमात्मनः इति बीजम् ।

ममान्नपूर्णाश्रीमहाविष्णोर्लक्ष्मीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

मनुः—

ओं श्रीम् आवहन्ती वितन्वाना कुर्वाणा चीरमात्मनः। वासांसि मम गावश्च। अन्नपाने च सर्वदा। ततो मे श्रियमा वह। लोमशां पशुभिस्सह स्वाहा। अन्नपूर्णश्रीमहाविष्णोः लक्ष्मीपादुकां पूजयामि तर्पयामि नमः॥

No. **5988.** आवेशहनूमन्मन्त्रः.

ĀVĒŚAHANŪMANMANTRAḤ.

Pages, 2. Lines, 19 on a page.

Begins on fol. 154*a* of the MS. described under No. 5585.

Complete.

This Mantra is supposed to lead Hanūmat to enter into the spirit of a person so as to enable him to become possessed with the spirit of Hanūmat.

Beginning:

अस्य श्रीआवेशहनूमन्मन्त्रस्य नारदभगवान् ऋषिः, पङ्क्तिश्छन्दः, श्रीआञ्जनेयो देवता; यं बीजं, ह्रीं शक्तिः, ग्लौं कीलकं, क्षिप्रावेशसिद्ध्यर्थे जपे विनियोगः।

End:

जगत्प्राणतनूभवप्राणवायुस्वरूपाय क्षिप्रमावेशयावेशय हुं हुम्फट् स्वाहा॥

ओं नमो रामदूताय . . . . स्वस्थानं गच्छ गच्छ स्वाहा॥

No. **5989.** आशुगरुडमन्त्रः.

ĀŚUGARUḌAMANTRAḤ.

Pages, 2. Lines, 18 on a page.

Begins on fol. 335*b* of the MS. described under No. 5477.

Complete

This Mantra is addressed to Garuḍa and is supposed to destroy all evil-doers and enemies and to act as an antidote to poisons of various kinds.

Beginning :

अस्य श्रीआशुगरुडमन्त्रस्य शङ्कर ऋषिः, जगती छन्दः, आशुगरुडो देवता ; गं बीजं, स्वाहा शक्तिः, सर्वविषहरणे विनियोगः । गामित्यादिषडङ्गन्यासः ।

End :

सर्वशत्रून् विद्रावय विद्रावय, सर्वदुष्टान् विनाशय विनाशय, सर्वविषं नाशय नाशय स्वाहा ॥

इति षट्सप्तत्युत्तरशताक्षरोऽयं मन्त्रः ॥

विषहरणभूतनिग्रहप्रधानश्च । द्वादशसहस्रं जपः । नागरूपपिष्टेन तिलदळैः शतांशं होमः पूर्वोक्तवत् ॥

No. **5990.** आशुगरुडमन्त्रः.

ĀŚUGARUḌAMANTRAḤ.

Pages, **2**. Lines, 6 on a page.

Begins on fol. 168*a* of the MS. described under No. 2848

Complete

Same as the above.

No. **5991.** आशुगरुडमन्त्रः.

ĀŚUGARUḌAMANTRAḤ.

Pages, 10. Lines, 6 on a page.

Begins on fol. 26*b* of the MS. described under No. 5822

Complete.

Similar to the above.

Beginning :

अस्य श्रीआशुगरुडस्तोत्रमहामन्त्रस्य शङ्ख ऋषिः, अनुष्टुप् छन्दः, श्रीआशुताक्ष्यो देवता ; गां बीजं, गीं शक्तिः, गूं कीलकं, ममाशुगरुडप्रीत्यर्थे जपे विनियोगः ।

End:

ओं पच पच हन हन दह दह सर्वसर्पान् भक्षय भक्षय सर्वसर्पविषं नाशय नाशय हुं फट् स्वाहा ।

गां अङ्गुष्ठाभ्यां नमः . . . . . गोः वीर्यायास्त्राय फट्, भूर्भुवस्सुवरोम्—इति दिग्बन्धः ॥

Colophon:

गरुडमन्त्रः समाप्तः ॥

No. 5992. आशुतार्क्ष्यमन्त्रः.

ĀŚUTĀRKṢYAMANTRAḤ.

Page, 1. Lines, 19 on a page.

Begins on fol. 3*b* of the MS. described under No. 2886.

Complete.

The proper repetition of this Mantra is supposed to counteract the effect of poisons of various kinds.

Beginning:

अस्य श्रीआशुतार्क्ष्यमहामन्त्रस्य शङ्कर ऋषिः, जगती छन्दः, आशुतार्क्ष्यो देवता ; गं बीजं, स्वाहा शक्तिः, सर्वविषहरणे विनियोगः ।

End:

ताम्रपट्टे समालिख्य स्थापितं निजवेश्मनि ।
सर्पानुच्चालयेदाशु देशाद्देशान्तरं क्षणात् ।

यद्यानन्दकदूतोऽसीत्यादिगारुडोपनिषदुक्तेः अष्टनागविषयो यद्यानन्दमन्त्रः तत्त्वगारुडमन्त्रः ॥

No. 5993. आसनमन्त्रः.

ĀSANAMANTRAḤ.

Page, 1. Lines, 4 on a page.

Begins on fol. 22*a* of the MS. described under No. 764.

Complete.

A preliminary **Mantra** to be used for the purpose of sanctifying one's seat for the conduct of religious rites.

Beginning:

आसनमन्त्रः—

पृथिव्या मेरुपृष्ठ ऋषिः, जगती छन्दः, सुतलकूर्मो देवता, मम अतलब्रह्मासने विनियोगः।

आसनं चाधिदेवेभ्यश्शिवकर्म समारभे ।

End:

पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥

No. 5994. आसुरीमन्त्रः.
ĀSURĪMANTRAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 107*b* of the MS. described under No. 537.

Complete.

This Mantra is addressed to Āsurī, who is the same as Pārvatī and is supposed to bring about the fulfilment of one's desires and to nullify the evil effect of witchcraft.

Beginning:

अस्य श्रीआसुरीमन्त्रस्य ऋषिर्ब्रह्मा, गायत्री छन्दः, (ईश्वरो) देवता; रुद्रपत्नी बीजं, प्रणवमुच्छेते शक्तिः, सुशक्ति बीजं, स्वाहा कीलकं भवेत्, मम सर्वकार्याणि (णां) सिद्ध्यर्थे जपे विनियोगः ।

End:

ओं ह्रीं श्रीं क्लीं कटके कटकपत्रके सुभगे आसुरि रक्तवासिनि आथर्वणदुहिते(तः) घोरे घोरकर्मिणि कारके . . . . गच्छति वशमानय हुं हुं फट् स्वाहा—इत्यासुरीमन्त्रः ॥

* * * *

विषं नास्ति यक्षिणीप्रयोगं नाशय नाशय रे रे च स्वाहा मनुः ॥

No. 5995. इन्द्राक्षीमन्त्रः.
INDRĀKṢĪMANTRAḤ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 15*a* of the MS. described under No. 2854.

Complete.

This Mantra is addressed to the goddess Indrākṣī, and is supposed to have the power of removing all kinds of pain from the body.

Beginning :

अस्य श्रीइन्द्राक्षीमन्त्रस्य धन्वन्तरि ऋषिः, अतिजगती छन्दः, इन्द्राक्षी देवता; ह्रां बीजं, ह्रीं शक्तिः, ह्रूं कीलकं, इन्द्राक्षीप्रसादसिद्ध्यर्थे जपे विनियोगः। ह्रामित्यादिषडङ्गन्यासः।

End :

शिरश्शूलहृदयशूलकुक्षिशूलाक्षिशूलाङ्गशूलकटिशूलपार्श्वशूलाण्डशूलादिमहारोगान् संहारय संहारय भञ्जय भञ्जय आवेशयावेशयाकर्षय उच्चाटयोच्चाटय आं ह्रीं ओं इन्द्राक्षीं ओं आं ह्रीं ह्रूं क्रों फट् फट् इन्द्राक्षि सर्वमङ्गले स्वाहा ॥

No. 5996. इन्द्राक्षीमन्त्रः.
INDRĀKṢĪMANTRAḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 42*a* of the MS. described under No. 5924.

Complete.

Similar to the above.

Beginning :

अस्य श्रीइन्द्राक्षीमन्त्रस्य धन्वन्तरि ऋषिः, मध्ये जगती छन्दः, इन्द्राक्षी देवता; हुं बीजं, मं शक्तिः, श्रीं कीलकं, ममेष्टार्थसिद्ध्यर्थे जपे विनियोगः।

End:

मारिभयं भञ्जय भञ्जय मनोग्रन्थिप्राणग्रन्थीन् विमोचय विमोचय समस्तपीडां हुम्फट् स्वाहा ॥

No. **5997.** इन्द्राक्षीमालामन्त्रः.

INDRĀKṢĪMĀLĀMANTRAḤ.

Page, 1. Lines, 19 on a page.

Begins on fol. 24*a* of the MS. described under No. **2886**.

Complete.

This Mantra is also addressed to Indrākṣī. It describes her various characteristics under her various significant names.

Beginning:

ओंनमो भगवति इन्द्राक्षि सर्वजनसम्मोहनि कालरात्रि नारसिंहि शत्रुसंहारिणि अनले अभये अजरे अपराजिते महासिंहवाहिनि।

End:

यरलवशषसह संहर संहर छेदय ह्रां ह्रीं ह्रुं सर्वमङ्गलिनि स्वाहा मूलम्---ओं ऐं श्रीं ह्रीं इन्द्राक्षि नमः ॥

No. **5998.** इन्द्राक्षीस्तोत्रमन्त्रः.

INDRĀKṢĪSTŌTRAMANTRAḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 48*a* of the MS. described under No. **5661**.

Complete.

The concluding stanzas give a description of the value and efficacy of this Mantra.

Beginning:

अस्य श्रीइन्द्राक्षीस्तोत्रमन्त्रस्य शचीपुरन्दर ऋषिः, अनुष्टुप् छन्दः, इन्द्राक्षी बीजं, भुवनेश्वरी शक्तिः, महेश्वरी कीलकं, ममेन्द्राक्षीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

* * * *

प्रथमं भारती नाम द्वितीयं तु सरस्वती ।
तृतीयं शारदा देवी चतुर्थं कंसमर्दनी ॥

End:

नश्यन्ति क्षणमात्रेण सर्वं चैव कथं तथा ।
क्रूरग्रहैश्च रोगैश्च कथं व्याधेरुपक्रमः ॥

* * * *

शौर्यं वीर्यबलं चायुस्सौभाग्यं सर्वसम्पदाम् ॥
योगिनीचक्रमाप्नोति भुक्तिमुक्तिफलप्रदम् ॥

No. **5999.** इन्द्राक्षीस्तोत्रमन्त्रः.
INDRĀKṢĪSTŌTRAMANTRAḤ.

Pages, 15. Lines, 6 on a page.

Begins on fol. 51*b* of the MS. described under No. 5822.

Incomplete.

Same as the above.

No. **6000.** इन्द्राक्षीस्तोत्रमन्त्रः.
INDRĀKṢĪSTŌTRAMANTRAḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 183*a* of the MS. described under No. 537.

Complete.

Same as the above.

No. **6001.** इन्द्राक्षीस्तोत्रमन्त्रः.
INDRĀKṢĪSTŌTRAMANTRAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 25*a* of the MS. described under No. 831.

Incomplete.

This Mantra is addressed to the goddess Indrākṣī, and is intended to help one in accomplishing one's desires.

Beginning:

अस्य श्रीइन्द्राक्षीस्तोत्रमन्त्रस्य शचीपुरन्दर ऋषिः, अनुष्टुप् छन्दः, इन्द्राक्षी देवता; ह्रीं बीजं, भुवनेश्वरीति शक्तिः, भवानीति कीलकं, मम सकलदुरितक्षयद्वारा इष्टसिद्ध्यर्थे जपे विनियोगः।

End:

अथ मनुः—

ओन्नमो भगवति इन्द्राक्षि भूतभविष्यद्वर्तमानकारिणि भूतानां जम्भिनि स्तम्भिनि मोहिनि द्राविणिशिरस्के रक्तपाणि(विनि)ज्वालारूपिणी.

No. **6002.** इन्द्राक्षीस्तोत्रमन्त्रः.

INDRĀKṢĪSTŌTRAMANTRAḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 181*a* of the MS. described under No. 537.

Complete.

Same as the above.

No. **6003.** इन्द्राक्षीस्तोत्रमन्त्रः.

INDRĀKṢĪSTŌTRAMANTRAḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 37*a* of the MS. described under No. 673.

Complete.

With Nyāsa.

Same as the above.

No. **6004.** इन्द्राक्षिस्तोत्रमन्त्रः.

INDRĀKṢĪSTŌTRAMANTRAḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 190*a* of the MS. described under No. 5417.

Incomplete.

With Nyāsa.

Same as the above.

No. 6005. इन्द्राक्षिस्तोत्रमन्त्रः.
INDRĀKṢĪSTŌTRAMANTRAḤ.

Substance, palm-leaf. Size, 7⅝ × 1⅝ inches. Page, 1. Lines, 4 on a page. Character, Telugu. Condition, slightly iujured. Appearance, old.

Begins on fol. 20*b*. The other works herein are Pāmumantramu (Telugu) 1*a*, 2*a* and 3*a*, Kaṭṭumantramu (Telugu) Vippumantramu (Telugu) 1*b*, Dṛṣṭimantramu (Telugu) 3*b*, Kaṭṭumantramu and Vippumantramu (Telugu) 4*a*, Pāmumantramu (Telugu) different 5*a*, Sarpaviṣacikitsā (Telugu) 6*a*, Pāmumandulu (Telugu) 8*a*, Naḍumunoppimantramu (Telugu) 8*b*, Vaidyayōgasaṅgrahamu (Telugu) 9*a*, Nānāyantrasaṅgrahamu (Telugu) 10*a*, Hanumanmālāmantra 17*a*, Vīrabhadramālāmantra 20*a*, Śivapūjāvidhi 21*a*, Hanumanmālāmantra 27*a*, names of some antidotal medicines (in Telugu verse) 28*a*, Hanumanmālāmantra 29*a*, Indrākṣīstōtramantra 30*b*, Vīrabhadramantra 31*a*, Śivapūjāvidhi 32*a*, Pāmumantramu (Telugu) 33*a*, Ilukumantramu (Telugu) 33*b*.

Incomplete.

Same as the above.

No. 6006. इन्द्राक्षीस्तोत्रमन्त्रः.
INDRĀKṢĪSTŌTRAMANTRAḤ.

Pages, 2. Lines, 4 on a page.

Begins on fol. 30*b* of the MS. described under No. 6005.

Incomplete.

Same as the above.

No. 6007. ईशानमन्त्रः.
ĪŚĀNAMANTRAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 29*a* of the MS. described under No. 5786.

Complete.

This Mantra is intended to propitiate Śiva, as the deity protecting the North-east quarter.

Beginning:

अस्य श्रीईशानमन्त्रस्य कश्यप ऋषिः, गायत्री छन्दः, ईशानो देवता, ईशानप्रेरणया ईशानप्रीत्यर्थे जपे विनियोगः।

End:

ओं ईशानाय नमः ओं इति जपः॥

उपसंहारः पूर्ववत्॥

No. **6008.** उच्छिष्टगणपतिमन्त्रः.

UCCHIṢṬAGAṆAPATIMANTRAḤ.

Page, 1. Lines, 27 on a page.

Begins on fol. 246*a* of the MS. described under No. 581.

Complete.

This Mantra is addressed to Ucchiṣṭagaṇapati and is supposed to enable one to realize one's desires.

Beginning:

अस्य श्रीउच्छिष्टगणपतिमन्त्रस्य गणक ऋषिः, निचृद्गायत्री छन्दः, गणपातिपरमात्मा देवता; गं बीजं, स्वाहा शक्तिः, क्लीं कीलकं, मम इष्टकाम्यार्थसिद्ध्यर्थे विनियोगः।

End:

मन्त्रः—

ओं हस्तिमुख(ाय)लम्बोदराय उच्छिष्टमहात्मने कृं तृं ह्रीं ह्रीं भैं भैं उच्छिष्टाय स्वाहा॥

No. **6009.** उच्छिष्टगणपतिमन्त्रः.

UCCHIṢṬAGAṆAPATIMANTRAḤ.

Pages, 2. Lines, 18 on a page.

Begins on fol. 290*a* of the MS. described under No. **5477.**

Complete.

Same as the above.

No. 6010. उच्छिष्टगणपतिमन्त्रः.
UCCHIṢṬAGAṆAPATIMANTRAḤ.

Pages, 2. Lines, 21 on a page.

Begins on fol. 81*a* of the MS. described under No. 2961.

Complete.

Same as the above.

No. 6011. उच्छिष्टगणपतिमन्त्रः.
UCCHIṢṬAGAṆAPATIMANTRAḤ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 5686.

Complete.

Similar to the above.

Beginning:

अस्य श्रीउच्छिष्टगणपतिमन्त्रस्य गणक ऋषिः, देवी गायत्री छन्दः, उच्छिष्टगणपतिर्देवता ; गं बीजं, ह्रीं शक्तिः, क्लीं कीलकं, मम इष्टार्थसिद्ध्यर्थे जपे विनियोगः । . . . .

मनुः—

ओं ह्रीं ल्रीं हस्तिमुखाय लम्बोदराय उच्छिष्टाय स्वाहा ॥
धुत्तूरपुष्पैः संपूज्य अष्टोत्तरशतं जपेत् ।

स राजा स्वयमागच्छति यस्याः प्रियः पादपांसुं गृहीत्वा तन्मध्ये नाम लिखित्वा तस्योपरि विनायकं प्रतिष्ठाप्य जपेत् ।

End:

प्रतिवासरमामन्त्र्य गणनाथं च पूजयेत् ।
भक्ष्यभोज्यैश्च लेह्यैश्च पानीयैरमृतोत्तमैः ॥
तोषयित्वा गणाध्यक्षं मन्त्रसिद्धिर्भवेद्ध्रुवम् ॥

इति मन्त्रसाधनफलम् ॥

No. 6012. उच्छिष्टगणपतिमन्त्रः.
UCCHIṢṬAGAṆAPATIMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 60*a* of the MS. described under No. 21.

Complete.

Similar to the above.

Beginning:

अस्य श्री उच्छिष्टगणपतिमन्त्रस्य गणक ऋषिः, शांकरिः देवता, ह्रीं बीजं, . . . मम उच्छिष्टगणपतिप्रसादसिद्ध्यर्थे विनियोगः। ओम् हस्तिमुखाय अङ्गुष्ठाभ्यां नमः ।

End:

मूलम्—

ओं हस्तिमुखाय लम्बोदराय उच्छिष्टात्मने आं ह्रीं क्लीं क्लां ग्लौं गं गणेशाय खे खे खे उच्छिष्टाय स्वाहा।

No. 6013. उच्छिष्टगणपतिमन्त्रः.
UCCHIṢṬAGAṆAPATIMANTRAḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 158*a* of the MS. described under No. 537.

Complete.

Same as the above.

No. 6014. उच्छिष्टगणपतिमन्त्रः.
UCCHIṢṬAGAṆAPATIMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 96*a* of the MS. described under No. 5566.

Complete.

Same as the above.

No. 6015. उन्मत्तभैरवीमन्त्रः.
UNMATTABHAIRAVĪMANTRAḤ.

Page, 1. Lines, 18 on a page.

Begins on fol. 314*b* of the MS. described under No. 5477.

Incomplete.

This Mantra is addressed to Pārvatī as Bhairavī; it is intended to make one's enemy go mad.

Beginning and **End**:

ओं नमो भगवति उन्मत्तत्रिभुवनभैरवि त्रिभुवनेश्वरि स्वाहा.

The remaining portion of this Mantra is in the Tamil language, the characters used being Telugu.

Colophon:

इति उन्मत्तभैरवम् ॥

No. 6016. उमामहेश्वररश्मिमाला.
UMĀMAHĒŚVARARAŚMIMĀLĀ.

Pages, 3. Lines, 22 on a page.

Begins on fol. 40*a* of the MS. described under No. 2961.

Complete.

This Mantra is addressed to Pārvatī and Paramēśvara; it is intended to gain the favour of Śiva.

Beginning:

प्राणानायम्य, तिथिवारादि सङ्कल्प्य, प्राणायामत्रयं कृत्वा, उमामहेश्वररश्मिमालासूक्तस्य भगवन्तो वामदेवाद्या ऋषयः, नानाच्छन्दांसि, रश्मिमालारूपी श्रीसदाशिवो देवता, मम श्रीसदाशिवप्रीत्यर्थे जपे विनियोगः ॥

असङ्ख्यातमहःपुञ्जपिञ्जरीकृतविग्रहम् ।
रश्मिमालामयं वन्दे सदाशिवमुमापतिम् ॥

End:

ओम् ओम् ओम् नमश्शिवायै ह्रीं ह्रीं ह्रीं नमश्शिवाय ह्रीम् ओं ह्रीम् ओम् ह्रीम् ओम ॥

Colophon:

इत्युमामहेश्वररश्मिमाला ॥

No. 6017. एकाक्षरकृष्णमन्त्रः.

ĒKĀKṢARAKṚṢṆAMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 93*b* of the MS. described under No. 5566.

Complete.

This Mantra consists of only one syllable, viz., Klīṁ. It is addressed to Kṛṣṇa and is supposed to be capable of securing his favour and thereby to enable one to accomplish one's desires.

Beginning:

अस्य श्री एकाक्षरमन्त्रस्य नारद ऋषिः, गायत्री छन्दः, श्रीकृष्णो देवता; कं बीजं, हें शक्तिः, लं कीलकं, मम इष्टकाम्यार्थसिद्ध्यर्थे विनियोगः । पञ्चाङ्गन्यासः ।

End:

ध्यानार्चनादि पूर्ववत् ।

मन्त्रः—

क्लीम् । पुरश्चरणं पूर्ववत् ॥

No. 6018. एकाक्षरकृष्णमन्त्रः.

ĒKĀKṢARAKṚṢṆAMANTRAḤ.

Pages, 2. Lines, 27 on a page.

Begins on fol. 242*a* of the MS. described under No. 581.

Complete.

Same as the above.

No. 6019. एकाक्षरकृष्णमन्त्रः.

ĒKĀKṢARAKṚṢṆAMANTRAḤ.

Page, 1. Lines, 19 on a page.

Begins on fol. 285*a* of the MS. described under No. 5477.

Complete.

Same as the above.

No. 6020. एकाक्षरीबगलामहालक्ष्मीमन्त्रः.

ĒKĀKṢARĪBAGALĀMAHĀLAKṢMĪMANTRAḤ.

Pages, 2. Lines, 23 on a page.

Begins on fol. 192*a* of the MS. described under No. 5643.

Complete.

This Mantra is addressed to Lakṣmī and is supposed to enable one to overcome one's enemies.

Beginning:

अस्य श्रीएकाक्षरीबगलामहालक्ष्मीमन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, चिन्मयरूपिणी महाशक्तिर्बगलामुखी सर्वस्तम्भनकारिणी देवता ; लं बीजं, ह्रीं शक्तिः, रं कीलकं, मम श्रीबगलामहाशक्तिप्रसादसिद्ध्यर्थे सकलशत्रुवाक्-स्तम्भनार्थे विनियोगः ।

End:

मनुः बगलामन्त्रराजम् ॥

No. 6021. एकाक्षरीबन्धविमोचनीमन्त्रः.

ĒKĀKṢARĪBANDHAVIMŌCANĪMANTRAḤ.

Pages, 2. Lines, 27 on a page.

Begins on fol. 255*a* of the MS. described under No. 581.

Complete.

This Mantra consists also of only one syllable, and is supposed to be able to free one from bondage.

Beginning:

अथ श्रीएकाक्षरीबन्ध(वि)मोचनीमन्त्रस्य अगस्त्य ऋषिः, देवी गायत्री छन्दः, बन्धी (न्धाविमोचनी) देवता ; झ्रां बीजं, ई शक्तिः, मम बन्धविमोच-नार्थे विनियोगः ।

End:

बन्धप्रमोचनीं सौम्यां मन्दहासविभासिनीम् ।
एवं ध्यात्वा जपेन्मन्त्रं लक्षमेकं समुच्चरेत् ॥

मनुः—ओं झ्रीम् ॥

No. **6022.** एकाक्षरीबन्धविमोचनीमन्त्रः.

ĒKĀKṢARĪBANDHAVIMŌCANĪMANTRAḤ.

Page, 1. Lines, 18 on a page.

Begins on fol. 302*b* of the MS. described under No. 5477.
Complete.
Same as the above.

मन्त्रः—

ओं (झ्रीं) कालि मृत्युविनाशिनि शृङ्खलाबन्धविमोचनं कुरु कुरु स्वाहा ॥

No. **6023.** एकाक्षरीबन्धविमोचनीमन्त्रः.

ĒKĀKṢARĪBANDHAVIMŌCANĪMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 101*b* of the MS. described under No. 5566.
Incomplete.
Same as the above.

No. **6024.** कंसमर्दनगोपालमन्त्रः.

KAṀSAMARDANAGŌPĀLAMANTRAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 49*a* of the MS. described under No. 5885.
Complete.
In praise of Kṛṣṇa as the destroyer of Kaṁsa.

Beginning :

अस्य श्रीकंसमर्दनगोपालमन्त्रस्य नारद ऋषिः, गायत्री छन्दः, कंसमर्दनगोपालो देवता; श्रीं बीजं, क्लीं शक्तिः, ह्रीं कीलकं, श्रीकंसमर्दन-गोपालप्रीत्यर्थे जपे विनियोगः ।

End :

श्रीं क्लीं ह्रीं कृष्णाय ज्वल ज्वल हुं फट् स्वाहा ॥

No. 6025. कपालभैरवीमन्त्रः.
KAPĀLABHAIRAVĪMANTRAḤ.

Substance, palm-leaf. Size, $7\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 2. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 12*a*. The other works herein are Durgāmālāmantra 1*a*, Śūlinīmantra 8*b*, Pratikriyāśūlinīdigbandhanamālāmantra 9*b*, Gajārūḍhāmantra 12*a*, Pratikriyāśūlinīdurgāvidyāmantra 13*a*, Pratikriyāśūlinīstōtra 14*b*, Mahāmārīstōtramantra 22*a*, Baḍabānalaraudravīrahanumanmantra 25*a*, Ucchiṣṭagaṇapatiyantra 26*b*, Baḍabānalāñjnēyamantra 28*a*, Śivastōtra 31*a*, Pañcamudrā 32*a*.

Complete.

This Mantra is addressed to Śiva, and is considered to have the power of driving away evil spirits and thus protecting one from all evil agencies and influences.

Beginning :

ओं नमो भगवति कपालभैरवि सहिते इन्द्राणीश्वरि वायव्यादिशं बन्ध बन्ध मां रक्ष रक्ष सर्वग्रहोच्चाटनं कुरु कुरु.

End :

ग्रहोच्चाटनं कुरु कुरु ओं लं ह्रां फट् स्वाहा ॥

No. 6026. कपिलाष्टाक्षरमन्त्रः.

KAPILĀṢṬĀKṢARAMANTRAḤ.

Pages, 5. Lines, 18 on a page.

Begins on fol. 15*a* of the MS. described under No. 5786.

Complete.

This Mantra is supposed to enable one to win the favour of Kapila. It consists of eight syllables.

Beginning:

अस्य श्रीकपिलाष्टाक्षरीमहामन्त्रस्य ब्रह्मा ऋषिः, देवी गायत्री छन्दः, कपिलो देवता, कपिलप्रेरणया कपिलप्रीत्यर्थे जपे विनियोगः ।

End:

कपिलप्रेरणया कपिलप्रीत्यर्थं कपिलाष्टाक्षरमहामन्त्रजपं करिष्ये । आं कपिलाय नमः आं । इति जपः । उपसंहारः पूर्ववत् ॥

No. 6027. करन्यासः.

KARANYĀSAḤ.

Page, 1. Lines, 16 on a page.

Begins on fol. 6*b* of the MS. described under No. 424.

Complete.

Regarding certain ways of bringing the thumb into contact with the other fingers when uttering certain Mantras.

Beginning:

अथ करन्यासः—

ओं दक्षाङ्गुष्ठपर्वणि ओं मध्यपर्वाणि, ओं अग्रपर्वाणि नमः ।

End:

ओं खां ओन्नमः तदनामिकायां, ओं हां ओं नमः तत्कनिष्ठिकायाम् ॥

Colophon:

इति करन्यासः ॥

No. 6028. कर्णपिशाचिनीमन्त्रः.
KARṆAPIŚĀCINĪMANTRAḤ.

Page, 1. Lines, 27 on a page.

Begins on fol. 252*a* of the MS. described under No. 581.

Complete.

This Mantra is addressed to a certain minor spirit which is supposed to be capable of revealing secrets.

Beginning:

ओं ह्रीं श्रीं सः नमो भगवति कर्णपिशाचिनि चण्डवेगिनि स्वाहा ।

End:

हस्तपादप्रलेपेन स्वप्ने वक्ति शुभाशुभम् ।
त्रैलोक्ये यादृशी वार्ता तादृशीं कथयत्यलम् ॥

No. 6029. कर्णपिशाचिनीमन्त्रः.
KARṆAPIŚĀCINĪMANTRAḤ.

Pages, 2. Lines, 18 on a page.

Begins on fol. 298*b* of the MS. described under No. 5477.

Complete.

Same as the above.

No. 6030. कर्णपिशाचिनीमन्त्रः.
KARṆAPIŚĀCINĪMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 99*b* of the MS. described under No. 5566.

Complete.

Same as the above

No. 6031. कर्णयक्षिणीमन्त्रः.
KARṆAYAKṢIṆĪMANTRAḤ.

Page, 1. Lines, 18 on a page.

Begins on fol. 313*a* of the MS. described under No. 5477.

Complete.
Similar to the above.

Beginning :

अस्य श्रीकर्णयक्षिणीमन्त्रस्य पातालभैरव ऋषिः, पङ्क्तिश्छन्दः, कर्णयक्षिणी देवता, मम भूतभविष्यद्वर्तमानसिद्ध्यर्थे सकलरक्षार्थे जपे विनियोगः ।

End :

क्लीं ह्रीं कर्णेऽसि कर्णयक्षिणि कनकाम्बरि यं यं याक्षिणि स्वाहा ॥
द्वात्रिंशत्सहस्रं जपः ॥

No. **6032.** कलान्यासः.

KALĀNYĀSAḤ.

Substance, palm-leaf. Size, 8½ × 1¼ inches. Pages, 4. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 12*a*. The other works herein are Tāntrikapūjāprakāra 1*a*, Mātṛkānyāsa 9*a*, Kēśavādinyāsa 13*b*, Rāmapūjāvidhāna 16*a*, Śivasahasranāmastōtra 25*a*, Aparādhastōtra 42*a*, Vēdapādastava 46*a*, Tryambakamantra 60*a*.

Complete.

Regarding the ceremonial touching of certain parts of the body while repeating the typical Mantras signifying the various attributes Sarasvatī.

Beginning :

अस्य श्रीकलान्यासमन्त्रस्य प्रजापति ऋषिः, गायत्री छन्दः, श्रीकलासरस्वती देवता; हलो बीजानि, स्वराः शक्तयः, बिन्दवः कीलकानि, श्रीकलासरस्वतीप्रसादासिद्ध्यर्थे जपे विनियोगः ।

End :

सं स्वरूपा कला, हं कपिलाकलायै नमः । एता हस्तपादयुगलसन्धिषु

न्यस्तव्याः । लं हव्यवाहनकलायै नम इति मस्तके । क्षं कव्यवाहन-
कलायै नम इति व्यापकं न्यसेत् ॥

Colophon:

इति कलान्यासः ॥

No. **6033.** कल्याणमातङ्गीमन्त्रः.

KALYĀṆAMĀTAṄGĪMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 87*b* of the MS. described under No. 5566.

Complete.

The beginning cannot be made out clearly.

The Mantra is addressed to Kalyāṇamātaṅgī who is a manifestation of Pārvatī, and its repetition is supposed to be conducive to one's prosperity.

Beginning:

अस्य श्रीकल्याणमातङ्गीमन्त्रस्य . . . .

End:

मन्त्रः—ऐं ह्रीं श्रीं कल्याणमाताङ्गि करन्धिानिलये सौभाग्यप्रदे हलगल-
सरिम् श्री—(मः) ॥

No. **6034.** कल्याणमातङ्गीमन्त्रः.

KALYĀṆAMĀTAṄGĪMANTRAḤ.

Page, 1. Lines, 27 on a page.

Begins on fol. 232*a* of the MS. described under No. 581.

Incomplete.

Same as the above.

No. **6035.** कल्याणमातङ्गीमन्त्रः.

KALYĀṆAMĀTAṄGĪMANTRAḤ.

Page, 1. Lines, 19 on a page.

Begins on fol. 276*a* of the MS. described under No. 5477.

Complete.

Similar to the above.

Beginning:

अस्य श्रीकल्याणमातङ्गिनीमन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, कल्याणमातङ्गिनी देवता; ऐं बीजं, ह्रीं शक्तिः, श्रीं कीलकं, मम सर्व-साधने धर्मार्थे काममोक्षार्थे विनियोगः।

End:

ऐं श्रीं कल्याणमातङ्गि करन्ध्रिनिलये सौभाग्यं देहि स्वाहा॥

No. **6036.** कामकलान्यासमन्त्रः.

KĀMAKALĀNYĀSAMANTRAḤ.

Pages, 2. Lines, 12 on a page.

Begins on fol. 1*a* of the MS. described under No. 547.

Incomplete.

This Mantra is supposed to be helpful in bringing about the accomplishment of one's desires.

Beginning and End:

अस्य श्रीकामकलान्यासमहामन्त्रस्य नारदारण्यप्रजापतिऋषयः, त्रिष्टुबनुष्टुप्पङ्क्तिश्छन्दांसि, महाविद्या महाकामकला महातिरस्करणी देवताः, आं ह्रीं दुं बीजानि, मम इष्टार्थे जपे विनियोगः.

No. **6037.** कामकलामन्त्रः.

KĀMAKALĀMANTRAḤ.

Pages, 2. Lines, 14 on a page.

Begins on fol. 19*b* of the MS. described under No. 5673.

Complete.

Similar to the above.

Beginning:

अस्य श्रीकामकलामन्त्रस्य मन्मथ ऋषिः, जगती छन्दः, श्रीकाम-कलाम्बा देवता; रं बीजं, ह्रीं शक्तिः, ई कीलकं, मम श्रीकामकलाम्बाप्रसा-दासिद्ध्यर्थे जपे विनियोगः।

End:

निष्कळा समयेश्वरी पराम्बा ह्यौं ह्स्रूक्ष्फ्रें श्रीं ह्स्रैं ह्स्रं ह्स्रैः पश्चि-
माम्नायसमयेश्वर्यै नमः

* * * *

इति पश्चिमाम्नायदेवताश्च स्वाधिष्ठाने हुतवहचक्रे च पूजयेत् ॥

No. 6038. कामकलामन्त्रः.

KĀMAKALĀMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 231*b* of the MS. described under No. 124.

Complete.

Same as the above.

No. 6039. कामकलामन्त्रः.

KĀMAKALĀMANTRAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol, 6*b* of the MS. described under No. 673.

Complete.

Same as the above.

No. 6040. कामगिरिपीठमन्त्रः.

KĀMAGIRIPĪṬHAMANTRAḤ.

Page, 1. Lines, 23 on a page.

Begins on fol. 144*a* of the MS. described under No. 5643.

Complete.

This Mantra is addressed to the seat on which the goddess Śakti is supposed to sit. The seat itself is considered to be divine.

Beginning:

श्रीकामगिरिपीठमन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, कामगिरिपीठ-
शक्तिः ब्रह्माणी देवता ; ऐं बीजं, आं शक्तिः, क्लीं कीलकं, कामगिरि-
पीठदेवताप्रीत्यर्थे जपे विनियोगः ।

End:

ऐं ह्रीं श्रीं ऐं क्लीं सौः आं आं सौः कामगिरिपीठब्रह्मात्मशक्तिदिव्य-श्रीपादुकां पूजयामि नमः।

No 6041. कामगिरिपीठमन्त्रः.
KĀMAGIRIPĪṬHAMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 229*b* of the MS. described under No. 124.
Complete.
Same as the above.

No. 6042. कामधेनुमन्त्रः.
KĀMADHĒNUMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 97*b* of the MS. described under No. 5566.
Complete.

This Mantra is addressed to Kāmadhēnu, the divine cow, which is supposed to bestow on one whatever one desires.

Beginning:

अस्य श्रीकामधेनुमन्त्रस्य वसिष्ठभगवानृषिः, गायत्री छन्दः, श्रीकामधेनुर्देवता; क्लीं बीजं, ह्रीं शक्तिः, श्रीं कीलकं, मम दारिद्र्यहरणार्थे विनियोगः।

End:

क्लीं ह्रीं श्रीं धें धेनवे नमः ॥

No. 6043. कामधेनुमन्त्रः.
KĀMADHĒNUMANTRAḤ.

Page, 1. Lines, 27 on a page.

Begins on fol. 248*b* of the MS. described under No. 581.
Complete.
Same as the above.

No. 6044. कामधेनुमन्त्रः.
KĀMADHĒNUMANTRAḤ.

Pages, 2. Lines, 18 on a page.

Begins on fol. 293*b* of the MS. described under No. 5477.

Complete.

Same as the above.

No. 6045. काममालामन्त्रः.
KĀMAMĀLĀMANTRAḤ.

Substance, paper. Size, $7\frac{7}{8} \times 6\frac{1}{8}$ inches. Page, 1. Lines, 19 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 14*b*. The other works herein are Yantracintāmaṇi 1*a*, Rāmaṣaḍakṣarī 13*b*, Nāmatrayam (Telugu) 13*b*, Stēnavāgbandhanarājavaśīkaraṇamantra 14*a*, Sūryakavaca 15*b*, Gaṇapatyaṣṭōttaraśatanāmastōtra 16*b*.

Complete.

Supposed to bring on the favour of the god of love.

Beginning:

काममालामन्त्रस्य नारदाय ऋषये नमः. कामदेवाय देवतायै नम, क्लीं बीजाय नमः, स्वाहा शक्तये नमः, मम कामदेवताप्रसादासिद्ध्यर्थे जपे विनियोगः ।

End:

सर्वजनसम्मोहनाय ज्वल ज्वल प्रज्वल(प्र)ज्वल सर्वभुवनस्य हृदयं मम वशीकरं कुरु कुरु स्वाहा ॥

No. 6046. कामराजमन्त्रः.
KĀMARĀJAMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 97*b* of the MS. described under No. 5566.

Complete.

Similar to the above.

Beginning:

अस्य श्रीकामराजमन्त्रस्य सम्मोहन ऋषिः, गायत्री छन्दः, श्रीमकरध्वजसम्मोहनो देवता; कं बीजं, ईं शक्तिः, लं कीलकं, (मम) सकलत्रिभुवनवश्यार्थे विनियोगः।

End:

क्लीं इति मूलमन्त्रः। क्लीन्नमः कामराजाय सर्वजनप्रियाय सर्वजनसम्मोहनाय ज्वल ज्वल प्रज्वल प्रज्वल सर्वजनस्य हृदयं मम वशं कुरु कुरु स्वाहा॥

चतुर्लक्षजपपुरश्चरणम्, त्रिमधुसंयुक्तेन पुष्पेण होमयेत्, दशांशः॥

No. **6047.** कामराजमन्त्रः.
KĀMARĀJAMANTRAḤ.

Page, 1. Lines, 27 on a page.

Begins on fol. 248*b* of the MS. described under No. 581.

Complete.

Same as the above.

No. **6048.** कामराजमन्त्रः.
KĀMARĀJAMANTRAḤ.

Page, 1. Lines, 18 on a page.

Begins on fol. 294*a* of the MS. described under No. 5477.

Complete.

Same as the above.

No. **6049.** कामराजमन्त्रः.
KĀMARĀJAMANTRAḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 59*a* of the MS. described under No. 58;9.

Complete.

Similar to the above.

Beginning:

अस्य श्रीकामराजमन्त्रस्य सम्मोहन ऋषिः, विराट् छन्दः, श्रीकामराजो देवता, कामराजप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

सर्वजन[वश्य]हृदयं मम वशङ्कुरु कुरु स्वाहा ।
कामदेवाय विद्महे पुष्पबाणाय धीमहि । तन्नोऽनङ्गः प्रचोदयात् ॥

No. **6050.** कामराजमन्त्रः.
KĀMARĀJAMANTRAḤ.

Page, 1. Lines, 19 on a page.

Begins on fol. 44*b* of the MS. described under No. 2886.

Complete.

Same as the above.

Beginning:

कामराजस्य, सम्मोहनः, गायत्री, अनङ्गः, क्लीं ईं श, योगो मोहने, क्लामित्यादि न्यासः.

End:

कामदेवाय विद्महे सम्मोहनाय धीमहि ।
महामन्त्रमिदं दिव्यं तन्नोऽनङ्गः प्रचोदयात् ॥
चतुर्विंशतिसहस्रं जपेत् ॥

No. **6051.** कामरूपपीठमन्त्रः.
KĀMARŪPAPĪṬHAMANTRAḤ.

Pages, 2. Lines, 14 on a page.

Begins on fol. 2*a* of the MS. described under No. 5673.

Complete.

This Mantra is addressed to Sarasvatī presiding over Kāmarūpapīṭha.

Beginning:

अस्य श्रीकामरूपपीठमन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीकामरूपपीठसरस्वती देवता; ऐं बीजं, आं शक्तिः, क्लीं कीलकं, मम कामरूपपीठसिद्ध्यर्थे विनियोगः ।

End :

ऐं ह्रीं श्रीं क्लीं सौः श्रीकामरूपपीठशक्तिसरस्वती श्री ॥

No. **6052.** कामरूपपीठमन्त्रः.

KĀMARŪPAPĪṬHAMANTRAḤ.

Page, 1. Lines, 4 on a page.

Begins on fol. 18*a* of the MS. described under No. 2848.

Complete.

Same as the above.

No. **6053.** कामेश्वरीखड्गमालामन्त्रः.

KĀMĒŚVARĪKHAḌGAMĀLĀMANTRAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 44*a* of the MS. described under No. 5572.

Incomplete.

This Mantra is in praise of Kāmēśvarī, a manifestation of Durgā.

Beginning :

ओं ह्रीं नमः। हृदयदेवि शिरोदेवि शिखादेवि कवचदेवि नेत्र-देवि अस्त्रदेवि कामेश्वरि भगमालिनि नित्यक्लिन्ने भेरुण्डे वह्निवासिनि महाविद्येश्वरि ।

End :

अनङ्गरेखे अनङ्गमालिनि वेगिनि अनङ्गाङ्कुरे अनङ्गमालिनि सर्व-संक्षोभिणि चक्रस्वामिनि गुप्ततरयोगिनि साङ्ख्यदर्शनाङ्गि.

No. **6054.** कामेश्वरीत्रिपुरसुन्दरीकामकलामन्त्रः.

KĀMĒŚVARĪTRIPURASUNDARĪKĀMAKALĀ-MANTRAḤ.

Pages, 2. Lines, 14 on a page.

Begins on fol. 25*b* of the MS. described under No. 5673.

Complete.

Similar to the above.

Beginning:

अस्य श्रीकामेश्वरीत्रिपुरसुन्दरीकामकलामहामन्त्रस्य परमानन्दभैरव ऋषिः, देवी गायत्री छन्दः, श्रीकामेश्वरीत्रिपुरसुन्दरीकामकलाप्रसादसिद्ध्यर्थे जपे विनियोगः।

End:

ऐं ह्रीं श्रीं ऐं क्लीं सौः सकलह्रीं श्रीमहात्रिपुरसुन्दरी सहहराङ्कित-बिन्दुराचितरेखायोनिश्रीपादुकाम् ।

अकारस्सर्ववर्णाग्रः प्रकाशः परमश्शिवः ।
हकारोऽन्त्यः कलारूपो विमर्शाख्यः प्रकीर्तितः ॥

No. **6055.** कार्तवीर्यार्जुनकवचः.

KĀRTAVĪRYĀRJUNAKAVACAḤ.

Substance, palm-leaf. Size, $13\frac{1}{2} \times 1\frac{1}{8}$ inches. Pages, 28. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 15*a*. The other works herein are Kārtavīryārjunamantra 1*a*, Kārtavīryārjunapūjāvidhi 4*a*, Kārtavīryārjunayantrapūjā 9*a*, Kārtavīryārjunamantra 14*a*.

Complete.

This Mantra is addressed to Kārtavīryārjuna and is supposed to protect one from fears arising from kings, thieves, etc.

Beginning:

देवादिदेव सर्वज्ञ सर्वभूतहिते रत।
केन रक्षा भवेन्नृणां भूतानां विविधापदि॥
राजचोरादिपीडासु शस्त्राग्निविषपातके।
मारिदुस्स्वप्नपीडासु गृहरोगभयेषु च॥

* * * *

ईश्वर उवाच—

श्रृणु गुह्यतमं देवि गोपनीयं प्रयत्नतः।
अवाच्यमपि वक्ष्यामि तव लोकहिताय वै ॥

कवचं कार्तवीर्यस्य साङ्गावरणकं क्रमात्।
समूर्तिशक्तिमन्त्रौघसजपध्यानपूर्वकम् ॥

* * * *

श्रीमच्चक्रधरस्यांशादवतीर्णं महाबलम्।
सम्यगात्मावभेदेन ध्यात्वा रक्षामुदीरयेत् ॥

दत्तात्रेय ऋषिः प्रोक्तोऽनुष्टुप् छन्दः प्रकीर्तितः।
कार्तवीर्यार्जुनो विष्णुश्चक्र महा(वर्ती तु) देवता ॥

विनियोगोऽस्य रक्षायै सर्वतः परिकीर्तितः।
सर्वदुष्टविनाशाय सर्वार्थस्य च सिद्धये ॥

अस्याङ्गमूर्तयः पञ्च पान्तु मां स्फटिकोज्ज्वलाः।
अग्नीशासुरवायव्यकोणेषु हृदयादिकाः ॥

परतोऽस्य ज्वलद्रूपवरचर्मासिपाणयः।
अव्याहतबलैश्वर्यशक्तिसामर्थ्यविग्रहाः ॥

क्षेमङ्करीशक्तियुक्तश्चोरारिमुर(ख)भञ्जनः।
प्राचीन्दिशं रक्षतु मे बाणो बाणासनायुधः ॥

End:

रक्ताम्बुजाक्षमतिभीषणमेघनादं नीलाम्बुजाभगजपुष्पगतं नमामि।
सर्वेष्टदं सकलदुःखहरं विशिष्टं शिष्टेष्टदं सकलदुःखनिवारणाय॥

Colophon:

इति श्रीमदुड्डामरेश्वरीतन्त्रे उमामहेश्वरसंवादे ईश्वरप्रोक्तं कार्तवीर्यार्जुनकवचं सम्पूर्णम् ॥

No. 6056. कार्तवीर्यार्जुनकवचः.
KĀRTAVĪRYĀRJUNAKAVACAḤ.

Substance, palm-leaf. Size, $10\frac{5}{8} \times 1\frac{1}{8}$ inches. Pages, 22. Lines, 5 on a page. Character, Kanarese. Condition, injured. Appearance, new.

Incomplete.

Similar to the above.

Beginning:

अस्य श्रीकार्तवीर्यार्जुनकवचस्तोत्रमन्त्रस्य दत्तात्रेयभगवानृषिः, अनुष्टुप् छन्दः, कार्तवीर्यार्जुनो महाविष्णुश्चक्रवर्ती देवता ; छूं बीजं, छ्रीं शक्तिः, क्रों कीलकं, मम कार्तवीर्यार्जुनप्रसादसिद्ध्यर्थे जपे विनियोगः ।

The remaining portion is the same as in the work described under the previous number.

No. 6057. कार्तवीर्यार्जुनकवचः.
KĀRTAVĪRYĀRJUNAKAVACAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 47*b* of the MS. described under No. 5924.

Incomplete.

Same as the above.

No. 6058. कार्तवीर्यार्जुनपञ्जरम्.
KĀRTAVĪRYĀRJUNAPAÑJARAM.

Pages, 5. Lines, 6 on a page.

Begins on fol. 48*a* of the MS. described under No. 5924.

Complete.

Similar to the above.

Beginning:

पञ्जरं संप्रवक्ष्यामि कार्तवीर्यस्य भूपतेः ।
यं प्रविष्टा न हन्यन्ते बाणैरपि नरा भुवि ॥

* * * *

प्राच्यां वज्रस्थितोऽव्यान्मां पीतवर्णमहाबलः ।
कार्तवीर्याय विद्महे महावीर्याय धीमहि । तन्नोऽर्जुनः प्रचोदयात् ।

कार्तवीर्य महावीर्य सर्वदुष्टविनाशन ।
सर्वत्र सर्वदा तिष्ठ दुष्टान्नाशय नाशय ॥

End:

धन्यं यशस्यमायुष्यं स्वर्ग्यं ते कथितं मया ।
गोपनीयं प्रयत्नेन न देयं यस्य कस्यचित् ॥

No. **6059.** कार्तवीर्यार्जुनमन्त्रः·
KĀRTAVĪRYĀRJUNAMANTRAḤ.

Page, 1. Lines, 14 on a page.

Begins on fol. 45*a* of the MS. described under No. 5673.

Complete.

This Mantra is intended to propitiate and win the favour of Kārtavīryārjuna.

Beginning:

अस्य श्रीकार्तवीर्यार्जुनमन्त्रस्य दत्तात्रेयभगवानृषिः, अनुष्टुप् छन्दः, श्रीकार्तवीर्यार्जुनो देवता ; ओं फ्रों बीजं, श्रीं शक्तिः, क्लीं कीलकं, मम श्रीकार्तवीर्यार्जुनप्रसादसिद्ध्यर्थे विनियोगः ।

End:

ओं ह्रीं श्रीं क्लीं ब्रूं आं ह्रीं क्रों श्रीं एं हुं फट् श्रीकार्तवीर्यार्जुनाय नमः ॥

No. **6060.** कार्तवीर्यार्जुनमन्त्रः.

KĀRTAVĪRYĀRJUNAMANTRAḤ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 6055.

Complete.

Similar to the above.

Beginning:

ओं कार्तवीर्याय हुं फट् स्वाहा—इति मन्त्रेण द्वादशसु द्वादशाक्षराणि विलिख्य. . . . . . . यथाशक्ति मूलमन्त्रं जपेत्। दशबीजात्मको मन्त्रः।

इति सन्ध्याविधिः।

अस्य श्रीकार्तवीर्यार्जुनदशबीजात्मकमन्त्रराजमन्त्रस्य दत्तात्रेयभगवान् ऋषिः, अनुष्टुप् छन्दः, श्रीकार्तवीर्यार्जुनमहाविष्णुश्चक्रवर्ती देवता ; फ्रों बीजं, छ्रीं शक्तिः, क्रों कीलकं, मम कार्तवीर्यार्जुनप्रसादसिद्ध्यर्थे कार्तवीर्यार्जुनमन्त्रजपं करिष्ये।

End:

ओं नमो भगवते कार्तवीर्यार्जुनाय सहस्रबाहवेऽमितविक्रमाय सर्वदुष्टचोरदमनाय हुं फट्॥

No. **6061.** कार्तवीर्यार्जुनमन्त्रः.

KĀRTAVĪRYĀRJUNAMANTRAḤ.

Pages, 10. Lines, 5 on a page.

Begins on fol. 50*a* of the MS. described under No. 5819.

Complete.

Similar to the above.

अस्य श्रीकार्तवीर्यार्जुनमन्त्रराजमन्त्रस्य दत्तात्रेय ऋषिः, अनुष्टुप् छन्दः, श्रीकार्तवीर्यार्जुनो महाविष्णुश्चक्रवर्ती देवता; फ्रां बीजं, छ्रीं शक्तिः,

छ्रूं कीलकं, मम निरन्तरनिरतिशयश्रीकार्तवीर्यार्जुनप्रसादसिद्ध्यर्थे जपे विनियोगः।

End:

ओं फ्रां छ्रीं क्लीं छ्रूं आं ह्रीं क्रों श्रीं हुं फट् कार्तवीर्याय नमः ॥

Colophon:

इति मूलमन्त्रः ॥ यथाशक्ति जपेत् ॥

No. **6062.** कार्तवीर्यार्जुनमन्त्रः.

KĀRTAVĪRYĀRJUNAMANTRAḤ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 14*a* of the MS. described under No. 6055.

Complete.

Similar to the above.

Beginning:

ब्रह्माद्यशेषगुरुभ्यो नमः। गुं गुरुभ्यो नमः । गं गणपतये नमः . . . . कार्तवीर्यार्जुनप्रीत्यर्थं यथाशक्ति मन्त्रजपं करिष्ये।

अस्य श्रीकार्तवीर्यार्जुनाय नमः, लं पृथिव्यात्मने नमः गन्धं समर्पयामि। अस्य श्रीकार्तवीर्यार्जुनमन्त्रस्य दत्तात्रेय ऋषिः, अनुष्टुप् छन्दः, कार्तवीर्यार्जुनो देवता ; कृत इति बीजं, सहस्रभुजभृच्छक्तिः, अव्याहत इति कीलकं, कार्तवीर्यार्जुनप्रसादसिद्ध्यर्थे जपे विनियोगः।

End:

ओं ह्रीं छ्रीं क्लीं ज्रूं आं ह्रीं क्रों श्रीं हुं फट् स्वाहा ॥

श्रीकार्तवीर्यार्जुनाय नमः ॥

No. 6063. कार्तवीर्यार्जुनमन्त्रः.

KĀRTAVĪRYĀRJUNAMANTRAḤ.

Pages, 12. Lines, 7 on a page.

Begins on fol. 16*a* of the MS. described under No. 5819.

Complete.

Similar to the above.

Beginning:

श्रीकार्तवीर्यार्जुनाय नमः । दत्तात्रेयाय नमः ।

अस्य श्रीकार्तवीर्यार्जुनमन्त्रस्य दत्तात्रेय ऋषिः, गायत्री छन्दः, श्रीविष्णुः परमात्मा देवता ; ओं बीजं, ह्रीं शक्तिः, कार्तवीर्यार्जुनप्रीत्यर्थे जपे विनियोगः ।

End:

सर्वलक्षणसम्पन्नं सर्वाभरणभूषितम् ।
भक्तानुकम्पिहृदयं सर्वदुःखनिषूदनम् ॥
कार्तवीर्यार्जुनं विष्णुं ध्यात्वा मन्त्रमिमं जपेत् ।
शत्रुरोगभयाद्भीतास्सन्ध्यामष्टसहस्रकम् ॥

ओं नमो भगवते कार्तवीर्यार्जुनाय सहस्रार हुं फट् ॥

Colophon:

इति मन्त्रः ॥

No. 6064. कार्तवीर्यार्जुनमालामन्त्रः.

KĀRTAVĪRYĀRJUNAMĀLĀMANTRAḤ.

Substance, palm-leaf. Size, $7\frac{5}{8} \times 1\frac{3}{8}$ inches. Pages, 7. Lines, 9 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Complete.

Similar to the above.

Beginning :

अस्य श्रीकार्तवीर्यार्जुनमालामन्त्रस्य दत्तात्रेय ऋषिः, अनुष्टुप् छन्दः, कार्तवीर्यार्जुनो देवता ; ओं बीजं, फट्छक्तिः, हुं कीलकं, मम सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः ।

End :

सर्वराजन्यचूडामणये महाशक्तिमते सहस्रकवचाय हुं फट् स्वाहा ॥

No. **6065.** कार्तवीर्यार्जुनमन्त्रः.

KĀRTAVĪRYĀRJUNAMANTRAḤ.

Pages, 2. Lines, 18 on a page.

Begins on fol. 314*a* of the MS. described under No. 5477.

Complete.

Similar to the above.

Beginning :

अस्य श्रीकार्तवीर्यार्जुनमन्त्रस्य दत्तात्रेयभगवानृषिः, अनुष्टुप् छन्दः, श्रीकार्तवीर्यार्जुनो देवता ; छ्रीं बीजं, फ्रों शक्तिः, ह्रीं कीलकं, मम सकलमनोरथदुष्टचोरग्रहनिग्रहार्थे श्रीकार्तवर्यार्जुनप्रसादसिद्ध्यर्थे विनियोगः ।

End :

ओं फ्रों छ्रीं क्रीं ब्रुं ह्रीं ह्रीं श्रीं क्रूं हुं फट् स्वाहा ॥

द्वादशाक्षरोऽयं मन्त्रः, द्वादशलक्षं जपः, दशांशं तर्पणं, तद्दशांशं होमः, तद्दशांशं भोजनमिति ॥

No. **6066.** कार्तवीर्यार्जुनमन्त्रः.

KĀRTAVĪRYĀRJUNAMANTRAḤ.

Pages, 2. Lines, 18 on a page.

Begins on fol. 334*b* of the MS. described under No. 5477.

Complete.

Similar to the above.

Beginning:

अस्य श्रीकार्तवीर्यार्जुनमन्त्रस्य दत्तात्रेय ऋषिः, अनुष्टुप् छन्दः, श्रीकार्तवीर्यार्जुनो देवता, कार्तवीर्यप्रसादसिद्ध्यर्थे विनियोगः ।

End:

कृतवीर्यसुतो राजा सहस्रभुजमण्डनः ।
अवतारो हरेस्साक्षात्पालयेत्सकलं मम ॥
इति द्वात्रिंशदक्षरोऽयं मन्त्रः नष्टद्रव्याकर्षणरक्षाप्रधानः ॥

No. **6067.** कार्तवीर्यार्जुनमालामन्त्रः.

KĀRTAVĪRYĀRJUNAMĀLĀMANTRAḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 22*a* of the MS. described under No. 5819. Complete.

Similar to the above.

Beginning:

अस्य श्रीकार्तवीर्यार्जुनमालामन्त्रस्य दत्तात्रेय ऋषिः, अनुष्टुप् छन्दः, कार्तवीर्यार्जुनो देवता ; ओं बीजं, ह्रीं शक्तिः, कार्तवीर्यार्जुनप्रीत्यर्थे जपे विनियोगः ।

End:

सर्वचोरान् स्तम्भय स्तम्भय मोहय मोहय मारय मारय हुं फट् स्वाहा ॥ मन्त्रः ॥

गायत्री—
कार्तवीर्याय विद्महे सहस्रकराय धीमहि । तन्नोऽर्जुनः प्रचोदयात् ॥
इति कार्तवीर्यार्जुनगायत्रीमन्त्रः ॥

ओन्नमो भगवते श्रीकार्तवीर्यार्जुनाय सर्वदुष्टान्तकाय तपोबलपालित-सप्तद्वीपाय सर्वराजन्यचूडामणये महाशक्तिमते स्वाहा हुं फट् ॥

No. 6068. कार्त्तिकेयमन्त्रः.

KĀRTTIKĒYAMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 101*a* of the MS. described under No. 5566.

Incomplete.

The proper repetition of this Mantra is supposed to please Subrahmaṇya otherwise known as Kārttikēya.

Beginning:

अस्य श्रीकार्त्तिकेयमन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीकार्त्तिकेय-गुहो देवता ; प्रणवो बीजं, एकारः शक्तिः, श्रीकार्त्तिकेयप्रीत्यर्थे विनियोगः ।

End:

ध्याये(ध्येयो) देवो गुहः शक्तिकुक्कुटेक्षोपद(टाक्षिद्विषट्क) धृत् ।
रक्तारक्तांशुको रक्तः प्रचुराकल्पभूषितः ॥
मन्त्रः—ओं रं भुवने(वे) नमः ।

No. 6069. कार्त्तिकेयमन्त्रः.

KĀRTTIKĒYAMANTRAḤ.

Page, 1. Lines, 27 on a page.

Begins on fol. 248*a* of the MS. described under No. 581.

Incomplete.

Same as the above.

No. 6070. कार्त्तिकेयमन्त्रः.

KĀRTTIKĒYAMANTRAḤ.

Page, 1. Lines, 18 on page.

Begins on fol. 293*a* of the MS. described under No. 5477.

Incomplete.

Same as the above.

No. **6071.** कालकर्षिणीयक्षिणीमन्त्रः.

KĀLAKARṢIṆĪYAKṢIṆĪMANTRAḤ.

Pages, 2. Lines, 27 on a page.

Begins on fol 251*a* of the MS. described under No. 581.

Complete.

A Mantra addressed to a time-attracting spirit.

Beginning:

ब्लैं कालकर्षिके ठ ठ स्वाहा । लक्षजपं कुर्यात् ।

End:

तत्तद्दिनोदकार्ये तु तत्तत्कार्यं विचिन्तयेत् ।
पूर्वस्थाने जपहोमं कुर्यात् ॥

No. **6072.** कालकर्षिणीयक्षिणीमन्त्रः.

KĀLAKARṢIṆĪYAKṢIṆĪMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 99*a* of the MS. described under No. 5566.

Complete.

Same as the above.

No. **6073.** कालमन्त्रः.

KĀLAMANTRAḤ.

Page, 1. Lines, 19 on a page.

Begins on fol. 45*a* of the MS. described under No. 2886.

Complete.

This Mantra is addressed to Yama and is supposed to enable one to destroy one's enemies.

Beginning:

कालस्य पुलस्त्यः, जगती छन्दः, कालः ; त्रं बी, प्रकृतिः श, सर्वनाशने, द्रामित्यादिन्यासः ।

End:

ओं नमो भगवते कालाय घोराय वज्रदंष्ट्राय शत्रुनाशाय सर्वभूतदमनाय हुं फट् स्वाहा । पञ्चत्रिंशल्लिपिरियम् ॥

No. **6074.** कालकूटमोहिनीमन्त्रः.

KĀLAKŪṬAMŌHINĪMANTRAḤ.

Pages, 2. Lines, 18 on a page.

Begins on fol. 313*b* of the MS. described under No. 5477.

Complete.

This Mantra is addressed to Mōhinī and is considered to be able to bestow on one whatever one may desire.

Beginning:

अस्य श्रीकालकूटमोहिनीमन्त्रस्य मन्मथ ऋषिः, त्रिष्टुप् छन्दः, कालकूटमोहिनी देवता ; ऐं बीजं, क्लीं शक्तिः, ह्रीं कीलकं, मम इष्टकाम्यार्थसिद्ध्यर्थे विनियोगः ।

End:

क्लीं ह्रीं ऐं हन हन समस्तमातृकाभ्यो हुं फट् स्वाहा ॥
द्वात्रिंशत्सहस्रं जपः, दशांशतर्पणहोमः ॥ इति ॥

No **6075.** कालसङ्कर्षिणीदेवतामन्त्रः.

KĀLASAṄKARṢAṆĪDĒVATĀMANTRAḤ.

Pages, 2. Lines, 14 on a page.

Begins on fol. 24*a* of the MS. described under No. 5673.

Complete.

This Mantra is supposed to be able to obtain for one the favour of the time-drawing deity.

Beginning:

अस्य श्रीकालसङ्कर्षिणीदेवतामन्त्रस्य ओं सृष्टिनित्ये स्वाहा बीजं, हं स्थितिपूर्णे नमः शक्तिः, ई महासंहारिणी कृशे चण्डकाली फट् कीलकं, मम श्रीकालसङ्कर्षिणीप्रसादसिध्यर्थे जपे विनियोगः ।

End:

अनन्तभास्करे चण्डकालि फट् ह्ख्स्फ्रें महाचण्डयोगीश्वरि पञ्च-मन्त्रसमष्टिरूपिण्यै श्रीकालसङ्कर्षिण्यै नमः ॥

No. **6076.** कालसङ्कर्षणीमहामन्त्रः.

KĀLASAṄKARṢAṆĪMAHĀMANTRAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 10*b* of the MS. described under No. 578.

Complete.

Similar to the above.

Beginning:

अस्य श्रीकालसङ्कर्षणीमहामन्त्रस्य सृष्टिस्थितिसंहारभैरव ऋषिः, अनुष्टुप् छन्दः, कालसङ्कर्षणी देवता ; ओं सृष्टिनित्ये स्वाहा बीजं, हं स्थितिपूर्णे नमः शक्तिः, हां महासंहारिणि चण्डकालि फट् कीलकं, कालसङ्कर्षणीप्रसादसिध्यर्थे जपे विनियोगः ।

End:

महाचण्डयोगीश्वरि क्लीं कालसङ्कर्षणि स्वाहा । कालसङ्कर्षण्यम्बा श्रीपा . नमः ॥

No. **6077.** कालिकाकवचः.

KĀLIKĀKAVACAḤ.

Pages, 12. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 5868.

Complete.

This contains extracts in praise of the goddess Kāli from the following works :—

(1) Kalīkākavaca of Virūpākṣa, (2) Aghōrayāmaḷa, (3) Kālīkālāmṛta, (4) Kālīrahasya, (5) Dakṣiṇakālīkavaca; (6) Kālītantra.

Beginning:

नमामि गुरुमक्षोभ्यं मन्त्रशक्तिसमन्वितम् ।
प्रसन्नज्ञानविज्ञानं हेतुबुद्धिप्रकाशकम् ॥
गजेन्द्रवदनं नौमि भक्तविघ्नविदारकम् ।
पाशाङ्कुशवराभीतिलसद्भुजचतुष्टयम् ॥
भैरवः सर्वदा पातु ऋषिर्मे शिरसोपरि ।
मुखे चन्द्रः सदा पातु त्रिष्टुप्प्रविजयात्मकम् ॥
गुणत्रयमयी शक्तिः परशक्तिस्तुरीयका ।
ब्रह्मस्वरूपिणी पातु हृदयं मम कालिका ॥

End:

यशस्विनी यशो वा मां पूर्णं रक्षतु वर्गदा ।
इत्येवं कवचन्देवी(व्याः) पठनीयं सुरासुरैः ॥
* * * *
हविष्याशी यताहारो यदि स्याद्भक्तिभावितः ।
पठेच्छिवगृहे वापि कवचं मन्मुखच्युतम् ॥
तस्य सर्वार्थसिद्धिः स्यात् नात्र कार्या विचारणा ॥

Colophon:

इति श्रीकालीतन्त्रे कालि(का)कवचं सम्पूर्णम् ॥

No. **6078.** कालिकाकवचः.

KĀLIKĀKAVACAḤ.

Pages, 6. Lines, 23 on a page.

Begins on fol. 41*a* of the MS. described under No. 2961.

Complete.

Two pages in the middle are lost.

Forms part of the Uttaratantra.

Addressed to the goddess Kālī as a prayer for protection.

Beginning:

कैलासशिखरे रम्ये भैरवश्चन्द्रशेखरम् ।
वक्षःस्थले समासीना भैरवी परिपृच्छति ॥

भैरव्युवाच—

देवेश परमेशान लोकसंहारकारक ।
कवचं सूचितं पूर्वं किमर्थन्न प्रकाशितम् ॥
यदि मे महती प्रीतिः तवास्ति कुलभैरव ।
कवचं कालिकादेव्याः कथयस्वानुकम्पया ॥

भैरव उवाच—

* * * *

कथयामि शृणु प्राज्ञे कालिकाकवचं परम् ।
गोपनीयं प्रयत्नेन स्वयोनिरपरा यथा ॥

अस्य श्रीसर्वविद्यामहाराज्ञीकवचस्य, भैरव ऋषिः, अष्टिच्छन्दः, अद्वैतस्वरूपा कालिका देवता; ह्रीं बीजं, हुं शक्तिः, श्रीं कीलकं, सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः ।

सहस्रारे शिरः पद्मे कर्पूरधवलो गुरुः ।
वामोरुस्थिततच्छक्तिः सदा मां परिरक्षतु ॥
परमाख्यो गुरुः पातु परापरगुरुस्तथा ।
परमेष्ठी गुरुः पातु दिव्यसिद्धाश्च मानवाः ॥

End:

सर्वकामप्रदा देवी सर्वरोगक्षयङ्करी ।
दक्षिणे बाहुमूले वै यदि तिष्ठति सर्वदा ॥
तथा सर्वार्थसिद्धिः स्याद्यद्यन्मनसि वर्तते ।

* * * *

देयं शिष्याय शान्ताय गुरुभक्तिरताय च ।
सर्वलक्षणयुक्ताय तत्तन्मात्रपराय च ॥

Colophon:

इति श्रीउत्तरतन्त्रे कालीप्रस्तारे भैरवभैरवीसंवादे श्रीमद्दक्षिणकालिकाया घटिकाकवचं सम्पूर्णम् ॥

